17 For the sequence in M_5, cf. v. l. 10. D_7 G_1 om. 17. T reads 17 after 10^{ab}, while G_2 reads it after 8. —^{a}) T_1 अतस् (for इति). Ś$_1$ $K_{2.4}$ एवेदं (for एवैतत्). —^{b}) T G_2 भूतं (for सर्वं). —^{c}) K_6 V_1 $B_{0.6-9}$ Da_3. a_4 $D_{4.9}$ [ऽ]थ (for च). —^{d}) D_4 [ऽ]सकृत् (for तथा). — After 17, T_2 reads 19^{cd}.

18 For the sequence in M_5, cf. v. l. 10. D_5 om. 18^{a}–20^{b}. —^{a}) K_1 पश्यंति. —^{b}) K_7 $D_{4.6.9}$ शृणुते (for शृणोति). — Da_3 reads 18^{c}–19^{d} after 10. Da_4 reads 18^{c}–19^{d} for the first time after 11. —^{c}) B_6 जिघ्रते; $M_{1.6}$ जिघ्रंति. M_7 आह (for आहू).

19 For the sequence in Da_3. a_4 M_5, cf. v. l. 10, 11. D_5 om. 19 (cf. v. l. 18). —^{a}) K_6 V_1 $B_{0.6-9}$ Da_3. a_4 Dn_1. n_4 Ds $D_{2.3.8}$ G_6 स्पर्शयते; $M_{1.6.7}$ च स्पृशति (by transp.). $K_{4.6.7}$ V_1 $B_{0.6-9}$ Da_3. a_4 Dn_1. n_4 Ds $D_{2-4.6.8.9}$ G_6 $M_{1.6.7}$ स्पर्शं (for स्पर्शान्). D_7 T G_{1-3} M_5 त्वचा स्पर्शं विजानाति. —^{b}) G_1 विक्रीयते. K_7 $D_{4.9}$ बुद्धिर्विक्रमते क्वचित्. ❀ Cn: सकृदिति यौगपद्यमुच्यते कर्त्रादिभावस्य। ...... ज्ञात्-

अधिष्ठानानि बुद्धेर्हि पृथगर्थानि पञ्चधा ।
पञ्चेन्द्रियाणि यान्याहुस्तान्यदृश्योऽधितिष्ठति ॥ २०
पुरुषाधिष्ठिता बुद्धिस्त्रिषु भावेषु वर्तते ।
कदाचिल्लभते प्रीतिं कदाचिदनुशोचति ॥ २१
न सुखेन न दुःखेन कदाचिदपि वर्तते ।
एवं नराणां मनसि त्रिषु भावेष्ववस्थिता ॥ २२
सेयं भावात्मिका भावांस्त्रीनेतान्नातिवर्तते ।
सरितां सागरो भर्ता महावेलामिवोर्मिमान् ॥ २३
अतिभावगता बुद्धिर्भावे मनसि वर्तते ।
प्रवर्तमानं हि रजस्तद्भावमनुवर्तते ॥ २४
इन्द्रियाणि हि सर्वाणि प्रदर्शयति सा सदा ।
प्रीतिः सत्त्वं रजः शोकस्तमो मोहश्च ते त्रयः ॥ २५
ये ये च भावा लोकेऽस्मिन्सर्वेष्वेतेषु ते त्रिषु ।
इति बुद्धिगतिः सर्वा व्याख्याता तव भारत ॥ २६

C. 12. 7094
B. 12. 194. 28
K. 12. 192. 37

ज्ञानज्ञेयानां सहैवोत्पत्तिरित्यर्थः । ❀ — D$_7$ T$_1$ G$_{3.6}$ om. 19^{cd}; T$_2$ reads it after 17 and G$_1$ after 16. — ^{c}) K$_7$ D$_{4.9}$ यदा (for येन). V$_1$ संरुधयति (sic) (for संकल्प°). K$_6$ Bo.$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_s$ D$_{2.3.6.8}$ येन (D$_6$ यदा) प्रार्थयते किंचित्. — ^{d}) K$_7$ Bo.$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_s$ D$_{2.3.6.8}$ तदा; T$_2$ कश्चिद्; M$_7$ कंचिद् (for किं°).

20 For the sequence in M$_5$, cf. v. l. 10. D$_5$ om. 20^{ab} (cf. v. l. 18). D$_2$ om. 20^{c}–24^{a}. — ^{a}) K$_7$ बुद्धिर्. — ^{c}) K$_7$ यानाहुस्; D$_7$ T$_1$ G$_{1-3.6}$ तान्याहुस् (for या°). K$_4$ Bo.$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_s$ D$_{3.8}$ इंद्रियाणीति या(Bo.$_{6-9}$ Da$_3$. a$_4$ D$_{s1}$ ता)न्याहुस्. — ^{d}) K$_7$ D$_{4.9}$ M$_{1.5-7}$ तेष्वदृश्यो; D$_7$ G$_1$ नातिदृश्यो; T$_1$ G$_3$ तानदृश्यो (for तान्यदृश्यो). G$_2$ M$_{1.6.7}$ [ऽ]नु- (for ऽधि-).

21 For the sequence in M$_5$, cf. v. l. 10. D$_2$ om. 21 (cf. v. l. 20). — ^{a}) K$_6$ Bo.$_{6.7.8}$ (marg. as in text).$_9$ Da$_3$ Dn$_1$. n$_4$ D$_s$ D$_{3.8}$ पुरुषे तिष्ठती बुद्धिस्; D$_{5.6}$ तिष्ठती पुरुषे बुद्धिस्. — ^{b}) B$_{7.9}$ भावे मनसि वर्तते. ❀ Ca: त्रिषु सुखदुःखमोहेषु भावेषु ॥ Cp: त्रिषु भावेषु सात्त्विकादिषु । ❀ — After 21^{ab}, D$_7$ T G$_{1.3.6}$ read and G$_2$ repeats 14^{cd}. K$_1$ om. (hapl.) 21^{c}–22^{b}. G$_2$ om. 21^{c}–22^{d}. — ^{c}) G$_1$ लभ्यते. Ś$_1$ K$_{2.4}$ बुद्धिः; K$_6$ वृत्तिं (for प्रीतिं).

22 D$_2$ G$_2$ om. 22 (cf. v. l. 20, 21). K$_1$ om. 22^{ab} (cf. v. l. 21). — ^{a}) Dn$_1$ च (for the second न). — ^{b}) D$_{s2}$ M$_5$ अनु- (for अपि). — T$_1$ om. (hapl.) 22^{c}–24^{b}. — ^{c}) M$_{1.5-7}$ या वै (for एवं). D$_5$ मनसस्. — ^{d}) Da$_3$ D$_{s1}$ [अ]वस्थितः; Da$_4$ G$_6$ °स्थिताः; M$_5$ वर्तते.

23 D$_2$ T$_1$ om. 23 (cf. v. l. 20, 22). — ^{a}) D$_5$ येयं (for सेयं). G$_1$ भवात्मिका. K$_6$ भावास्. ❀ Cs: भावात्मिका भावत्रयरूपा बुद्धेः स्वीयावस्था । ❀ — ^{b}) Bo.$_8$ (marg. as in text) Dn$_1$. n$_4$ D$_s$ D$_{3.5.8}$ T$_2$ G$_{3.6}$ अतिवर्तते (for नाति°). — D$_5$ om. (hapl.) 23^{c}–24^{b}. — ^{d}) T$_2$ G$_{1.3}$ महान् (for महा-). K$_7$ D$_{4.9}$ M$_{1.6}$ महावेलो महोर्मिमान्.

24 D$_2$ om. 24^{a} (cf. v. l. 20); D$_5$ T$_1$ om. 24^{ab} (cf. v. l. 23, 22). — ^{a}) K$_{2.4}$ अभिभावगता; B$_9$ अत्रिभागवता; D$_{s1}$ T$_2$ G$_{1.2.6}$ M$_{5-7}$ Cv अवि(M$_{5.7}$ °पि)भाव(T$_2$ M$_{6.7}$ Cv °ग)गता; M$_1$ अविमान° (for अतिभाव°). ❀ Cp: अतिभावगता भावानतिक्रम्य स्थिता ॥ Cv: पञ्चेन्द्रियद्वारा विभागेन पञ्चधा न गता अविभागगता । ❀ — ^{b}) K$_6$ D$_4$ भावो; D$_7$ जीवे (for भावे). — ^{c}) K$_{6.7}$ V$_1$ Bo.$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_s$ D$_{3.5.6.8.9}$ तु; D$_2$ lacuna; D$_4$ नु (for हि). — ^{d}) G$_1$ तद्भावान्; G$_{3.6}$ तान्भावान् (for तद्भावम्). — After 24, D$_7$ T G$_{1-3.6}$ read 36.

25 The sequence in D$_7$ T G$_{1-3.6}$ is: 26^{ab}, 508*, 25^{ab}, 27^{ab}, 26^{cd}, 27^{cd}, 25^{cd}. D$_7$ om. 25^{ab}. — ^{a}) Da$_4$ T$_1$ G$_{1.2}$ च; D$_2$ तु; D$_{5.6.8}$ T$_2$ M$_{1.5-7}$ [इ]ह (for हि). — ^{b}) K$_{4.6}$ V$_1$ Bo.$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_s$ D$_{2.3.8}$ T$_1$ प्रवर्तयति (for प्रदर्श°). K$_6$ Dn$_1$. n$_4$ M$_7$ सा तदा; K$_7$ D$_{4.9}$ T$_1$ G$_{1-3.6}$ सर्वदा; V$_1$ B$_7$ Da$_4$ D$_{s1}$ सा यदा (for सा सदा). — After 25^{ab}, D$_5$ ins. 508*. The sequence in M$_5$ after 25^{ab} is: 36, 27^{ab}, 26^{cd}, 27^{cd}, 35, 26^{ab}, 508*. — ^{c}) G$_1$ प्रीतः. D$_{s1}$ सत्त्वा. G$_1$ दमः (for रजः). — ^{d}) K$_{2.4.6.7}$ V$_1$ Bo.$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_s$ D$_{3.5.6.8}$ M$_{1.6.7}$ तु; D$_4$ lacuna (for च). — After 25, M$_{1.6.7}$ ins. 508*.

26 For the sequence in D$_7$ T G$_{1-3.6}$ M$_5$, cf. v. l. 25. — ^{a}) Ś$_1$ K$_{1.2.4}$ D$_{4.5.9}$ भावा हि; V$_1$ भावाश्च (by transp.). Ś$_1$ K$_{1.2.4}$ लोकेषु (for लोकेऽस्मिन्). — ^{b}) K$_7$ D$_{4.6.9}$ सर्वेष्वेव च; D$_7$ T G$_{1-3.6}$ M$_{1.5-7}$ सर्वे तेष्वेव (for सर्वेष्वेतेषु). K$_6$ V$_1$ Bo.$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_s$ D$_{2.3.8}$ वै (for ते). — D$_5$ ins. after 25^{ab}; D$_7$ T G$_{1-3.6}$ M$_5$ after 26^{ab};

C. 12. 7093
B. 12. 194. 28
K. 12. 192. 37

इन्द्रियाणि च सर्वाणि विजेतव्यानि धीमता ।
सत्त्वं रजस्तमश्चैव प्राणिनां संश्रिताः सदा ॥ २७
त्रिविधा वेदना चैव सर्वसत्त्वेषु दृश्यते ।
सात्त्विकी राजसी चैव तामसी चेति भारत ॥ २८
सुखस्पर्शः सत्त्वगुणो दुःखस्पर्शो रजोगुणः ।
तमोगुणेन संयुक्तौ भवतोऽव्यावहारिकौ ॥ २९
तत्र यत्प्रीतिसंयुक्तं काये मनसि वा भवेत् ।
वर्तते सात्त्विको भाव इत्यवेक्षेत तत्तदा ॥ ३०
अथ यद्दुःखसंयुक्तमतुष्टिकरमात्मनः ।
प्रवृत्तं रज इत्येव तन्नसंरभ्य चिन्तयेत् ॥ ३१
अथ यन्मोहसंयुक्तमव्यक्तमिव यद्भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ ३२
प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता ।
कथंचिदभिवर्तन्त इत्येते सात्त्विका गुणाः ॥ ३३
अतुष्टिः परितापश्च शोको लोभस्तथाक्षमा ।
लिङ्गानि रजसस्तानि दृश्यन्ते हेत्वहेतुभिः ॥ ३४
अभिमानस्तथा मोहः प्रमादः स्वप्नतन्द्रिता ।
कथंचिदभिवर्तन्ते विविधास्तामसा गुणाः ॥ ३५

M$_{1.6.7}$ after 25 :

508* सत्त्वं बुद्धिस्तमोभावः प्रीतियोगात्प्रवर्तते ।

[D$_7$ G$_{1.2}$ सत्त्व- (for सत्त्वं). D$_7$ T G$_{1-3.6}$ ततो (for तमो-).]

— ^{c}) Ś$_1$ K$_{1.2.4.7}$ D$_{4.9}$ -गतीः; G$_1$ -गतः (for -गतिः). — ^{d}) Ś$_1$ K$_{1.2.4.7}$ D$_{4.9}$ व्याख्यातस्.

27 For the sequence in D$_7$ T G$_{1-3.6}$ M$_5$, cf. v. l. 25. — ^{a}) K$_6$ om. च. — ^{b}) M$_7$ विचेतव्यानि (for विजे°). D$_4$ धीमतः. — ^{d}) M$_6$ प्राणिनः. M$_7$ साश्रिताः (for सं°). Dn$_1$ तथा; D$_4$ तदा (for सदा). D$_7$ T G$_{1-3.6}$ प्राणिनः संश्रि(G$_2$ °श्रु-; G$_{3.6}$ °शि)तं सदा.

28 For the sequence in M$_5$, cf. v. l. 25. M$_{1.5.6}$ om. 28^{ab}. — ^{c}) V$_1$ चेति (for चैव). — ^{d}) T$_1$ G$_{2.3}$ M$_{1.5-7}$ चैव (for चेति).

29 For the sequence in M$_5$, cf. v. l. 25. — ^{b}) M$_7$ रजोगुणाः. — ^{c}) Da$_4$ तमोगुणो न; T$_1$ ततो गुणेन. T$_2$ M$_7$ संयुक्तो. — ^{d}) B$_6$ भवेतां (for भवतो). V$_1$ व्यावहारिकः; B$_8$ (marg. as in text) [ऽ]भ्यवहारिकौ (for ऽव्याव°). ❀ Cv : अव्यावहारिकौ स्वस्वफलभूतव्यवहारासाधकौ भवतः । निद्रया संधीकृत्य किमपि द्रष्टुं न मुञ्चतीत्यर्थः । ❀

30 With 30–32, cf. Manu. 12. 27–29. For the sequence in M$_5$, cf. v. l. 25. — ^{a}) K$_6$ तद् (for यत्). — ^{d}) K$_1$ अवेक्षेम; K$_6$ Dn$_1$ Ds D$_{2.3.8}$ आचक्षेत; K$_7$ अवैक्षत; B$_6$ (marg.) आचक्षीत; D$_7$ T G$_{1-3.6}$ M$_{1.5-7}$ Cs उपेक्षेत (for अवे°). B$_{7.8}$ Da$_3$, a$_4$ D$_7$ T$_1$ G$_{1-3.6}$ M$_{6.7}$ तं (for तद्). K$_{4.6}$ V$_1$ B$_{0.6-9}$ Da$_3$, a$_4$ Dn$_1$, n$_4$ Ds D$_{2.3.6.8}$ तथा (for तदा). ❀ Cs : उपेक्षेत, अयमात्मन इति न मन्येत । ❀

31 For the sequence in M$_5$, cf. v. l. 25. — ^{a}) M$_6$ अत्र (for अथ). D$_4$ lacuna for यद्. D$_5$ अथ वा प्रीतिसंयुक्तम्. — ^{b}) K$_6$ V$_1$ B$_{0.6-9}$ Da$_3$, a$_4$ Dn$_1$, n$_4$ Ds D$_{2.3.5.7.8}$ अप्रीति- (for अतुष्टि-). G$_2$ -तरम् (for -करम्). — Ds$_1$ reads 31^{c}–32^{b} twice. — ^{d}) K$_6$ Ds$_1$ D$_8$ तत्र संरभ्य; D$_7$ तत्तत्सं° (for तन्नसंरभ्य). ❀ Cn : संरभ्य भीत्या । दुःखानुसंधानाद्दुःखमेव वर्धिष्यत इति भीत्या दुःखं न चिन्तयेन्न गणयेदित्यर्थः ॥ Cs : संरभ्य यत्नं कृत्वा । ❀

32 For the sequence in M$_5$, cf. v. l. 25. For the repetition in Ds$_1$, cf. v. l. 31. V$_1$ reads 32^{ab} on marg. — ^{a}) G$_3$ अथ धर्मो ह संयुक्तम्. — ^{b}) K$_{6.7}$ V$_1$ B$_{0.6-9}$ Da$_3$, a$_4$ Dn$_1$, n$_4$ Ds D$_{2-6.8.9}$ T G$_{1-3.6}$ M$_{1.5-7}$ अव्यक्तविषयं भवेत्; D$_7$ काये मनसि वा भवेत्. — ^{c}) G$_{3.6}$ अप्रत्यक्षम् (for °तर्क्यम्).

33 For the sequence in M$_5$, cf. v. l. 25. — ^{b}) K$_4$ संशांति-; K$_6$ सुशांत- (for संशान्त-). K$_6$ Ds$_1$ G$_1$ -चिंतता (Ds$_1$ °ना); Da$_4$ -चित्तना; D$_5$ -चित्ततः (for °ता). ❀ Cs : संशांतचित्तता मनस ऊर्मिषट्कनिरासः । ❀ — ^{c}) Ds$_1$ D$_4$ कथंचिद्. B$_6$ इह; B$_7$ Da$_3$, a$_4$ अति-; G$_{1-3.6}$ अपि (for अभि-). — After 33, K$_1$ reads 36^{a} for the first time, repeating it in its proper place.

34 For the sequence in M$_5$, cf. v. l. 25. Ś$_1$ K$_{2.4}$ D$_7$ om. (hapl.) 34–35. — ^{a}) K$_6$ D$_{6.8}$ परतापश्च (for परि°). — ^{b}) V$_1$ मोहस् (for लोभस्). G$_3$ तथाक्षमः. — ^{c}) D$_8$ om. from स्तानि up to यतं (in 36^{c}). — ^{d}) K$_1$ V$_1$ हेतुहेतुभिः; K$_7$ D$_4$ हितहे°; Ds$_1$ M$_{1.6.7}$ हेत्वहेतुतः (M$_1$ °काः) (for °हेतुभिः).

35 For the sequence in M$_5$, cf. v. l. 25. Ś$_1$ K$_{2.4}$ D$_{7.8}$ om. 35 (cf. v. l. 34). — ^{a}) K$_{1.6}$ V$_1$

दूरगं बहुधागामि प्रार्थनासंशयात्मकम् ।
मनः सुनियतं यस्य स सुखी प्रेत्य चेह च ॥ ३६
सत्त्वक्षेत्रज्ञयोरेतदन्तरं पश्य सूक्ष्मयोः ।
सृजते तु गुणानेक एको न सृजते गुणान् ॥ ३७
मशकोदुम्बरौ चापि संप्रयुक्तौ यथा सदा ।
अन्योन्यमन्यौ च यथा संप्रयोगस्तथा तयोः ॥ ३८
पृथग्भूतौ प्रकृत्या तौ संप्रयुक्तौ च सर्वदा ।
यथा मत्स्यो जलं चैव संप्रयुक्तौ तथैव तौ ॥ ३९
न गुणा विदुरात्मानं स गुणान्वेत्ति सर्वशः ।
परिद्रष्टा गुणानां च संस्रष्टा मन्यते सदा ॥ ४०
इन्द्रियैस्तु प्रदीपार्थं कुरुते बुद्धिसप्तमैः ।
निर्विचेष्टैरजानद्भिः परमात्मा प्रदीपवत् ॥ ४१
सृजते हि गुणान्सत्त्वं क्षेत्रज्ञः परिपश्यति ।
संप्रयोगस्तयोरेष सत्त्वक्षेत्रज्ञयोर्ध्रुवः ॥ ४२
आश्रयो नास्ति सत्त्वस्य क्षेत्रज्ञस्य च कश्चन ।
सत्त्वं मनः संसृजति न गुणान्वै कदाचन ॥ ४३

C. 12. 711
B. 12. 194. 44
K. 12. 192. 53

Bo. 6. 7. 8 (marg. as in text). 9 Da4 Dn1. n4 Ds D2. 3. 5 M1. 6 Cs अवमानस्; Csp अभि° (as in text). — ^{b}) K1 D5 प्रसादः; G1. 2 M7 प्रमाद- (for °दः). K7 D4. 9 -तंद्रता (for -तन्द्रिता). ❀ Cs: स्वप्नतन्द्रिता स्वप्नवत्ता तन्द्रावत्ता वेत्यर्थः । ❀ — Ds1 om. 35^{cd}. — ^{c}) B9 T1 G1. 3. 6 अपि; Da4 अति- (for अभि-).

36 For the sequence in M5, cf. v. l. 25. D8 om. up to यतं (cf. v. l. 34). D7 T G1–3. 6 read 36 after 24. K1 reads 36^{a} for the first time after 33. — ^{a}) Ś1 K2 चापि; K1 वापि; D7 T1 G1. 3. 6 M1. 6 -गामी (for -गामि). — ^{b}) K4 प्रार्थनाः (for प्रार्थना-). — ^{c}) Da4 सुनियतां; D7 T1 G1–3. 6 संयमितं. Ś1 (*sup. lin.* as in text) तस्य (for यस्य).

37 ^{b}) K6 तस्य (for पश्य). — ^{c}) Ś1 K1. 2 च; K7 D4–6. 9 T2 G2 [ऽ]त्र; D7 T1 G1 M1. 5–7 त्रि- (for तु). T2 एकम्.

38 ^{a}) K1 मषकोडंबरौ; K4 मशक्योर्दुबरौ; K7 D4–7. 9 T G1–3. 6 °कोदुंबरे; Da4 °कौदुंबरौ. K7 D4–6. 9 चैव; Bo. 7 Da3 Dn1. n4 Ds D2. 3. 7. 8 T1 G1. 3. 6 वापि (for चापि). ❀ Cs: मशकः उदुम्बरफलान्तर्जन्तुः । ❀ — ^{b}) K7 D4–7. 9 T G1–3. 6 संप्रयुक्ते (for °युक्तौ). — V1 om. (hapl.) 38^{c}–39^{b}. — ^{c}) Ś1 K1 अन्यश्च; D7 T G1–3. 6 अन्ये (for अन्यौ). Bo. 8. 9 Da3. a4 D5 स्यातां च; B6 च तथा (for च यथा). K6 B7 Dn1. n4 Ds D2. 8 अन्योन्यमेतौ स्यातां च; M1. 5–7 अन्योन्यत्वाच्च तावन्यौ. — ^{d}) T G1–3. 6 M5 [ए]तयोः (for तयोः).

39 V1 om. 39^{ab} (cf. v. l. 38). — ^{a}) G1 वृथा (for पृथग्-). B6. 9 Da4 D6 M1. 6. 7 -कृतौ; D5 च तौ (for -भूतौ). Ś1 K1. 2 B9 प्रकृत्यैव; K4 °तौ च (for °त्या तौ). — ^{b}) T1 संप्रयुक्ते. K2 संयुक्ते चैव सर्वदा. — ^{c}) D8 मत्स्यौ. K7 D4. 6. 9 यथा मत्स्योऽम्भि- रम्भः सम्. — ^{d}) D4. 6. 9 संप्रयुक्तस् (for °युक्तौ). Ś1 K1. 2 च तौ तथा (for तथैव तौ).

40 ^{a}) Da4 गुणान्. — ^{b}) B9 D5 न (for स). K7 D4. 6. 9 गुणान्वेत्ति स सर्वगः. — ^{c}) K7 परिष्टा; D7 °दुष्टा; T1 °मृष्टा (for °द्रष्टा). K4. 6. 7 V1 Bo. 6. 7. 9 Dn1. n4 Ds D2. 3. 6. 8. 9 G6 तु; D4 नु; D5 यः; D7 T2 G1. 2 M5 सन्; T1 G3 M1. 6. 7 स (for च). ❀ Cs: परिस्रष्टेति पाठे स्वसंनिधिमात्रेण परितः सकलभाव- कर्ता । ❀ — ^{d}) K2 B6. 7 M5 स स्रष्टा; K4 Da4 M1. 6 Cn संसृष्टा; K6 V1 Bo. 9 Da3 Dn1. n4 D2. 3. 7. 8 T1 संसृष्टान्; K7 संहृष्टा; B8 (marg. as in text) D5 स द्रष्टा; Ds2 संस्रष्टान्; D4. 9 संद्रष्टा; Cnp संस्रष्टा (as in text). K6. 7 Dn1. n4 Ds D2–4. 6. 8. 9 G6 M5. 7 तथा; V1 Bo. 6–9 Da3. a4 D7 T G1–3 M1. 6 तदा (for सदा). ❀ Cn: संस्रष्टेति पाठे समित्येकीभावे इति यास्क- वचनात् (Nir. I. i. 3) आत्मन्येकीभावेन तादात्म्येन गुणानां स्रष्टा कल्पकः संस्रष्टा । ❀

41 ^{b}) K1 कुर्वते. Ś1 (before corr.) K1. 2. 4. 6 V1 Bo. 6. 7 Ds1 D2. 5–8 T G1. 2 M1. 5–7 बुद्धिसत्तमैः; K7 D4. 9 °रंतरा (for °सप्तमैः). — ^{c}) ❀ Cv अजानद्भिः रूपा- दिविषयानजानद्भिरिन्द्रियैः । अन्तर्णीतो णिच् । अज्ञापयद्भिरि- न्द्रियैः । ❀ — ^{d}) D8 पदमात्मा (for पर°).

42 ^{a}) D4 सृजते (for सृ°). M6 त्रि- (for हि). — ^{b}) K1 परिपश्यते. — ^{c}) K7 स प्रयोगस्. K7 Da4 D4. 9 M1 एव; G2 एषु (for एष). — ^{d}) G2 सत्य- (for सत्त्व-). K6 V1 Bo. 6–8 Da3. a4 Dn4 Ds D2. 3. 8 M1. 7 ध्रुवं; D5 बुधः (for ध्रुवः).

43 ^{a}) Ds1 आश्रया; D5 आश्रसो. ❀ Ca: आश्रयः उपादानकारणत्वम् । ❀ — ^{b}) D4. 9 च कश्च नः; D7 T1 G1–3. 6 कदाचन (for च कश्चन). B8 (marg.) D8 T2 Ca गुणाः (T2 °णः) सत्त्वस्य चेतना (Ca °नः); M6. 7 क्षेत्रज्ञस्त(M7 °स्त्व)स्य चेतना. — D7 G1 om. (hapl.) 43^{cd}. — ^{c}) G3 रजः (for मनः). K6 V1 Bo. 6. 7

C. 12. 7110
B. 12. 194. 43
K. 12. 192. 54

रश्मींस्तेषां स मनसा यदा सम्यङ्गियच्छति ।
तदा प्रकाशतेऽस्यात्मा घटे दीपो ज्वलन्निव ॥ ४४
त्यक्त्वा यः प्राकृतं कर्म नित्यमात्मरतिर्मुनिः ।
सर्वभूतात्मभूतः स्यात्स गच्छेत्परमां गतिम् ॥ ४५
यथा वारिचरः पक्षी लिप्यमानो न लिप्यते ।
एवमेव कृतप्रज्ञो भूतेषु परिवर्तते ॥ ४६
एवंस्वभावमेवैतत्स्वबुद्ध्या विहरेन्नरः ।
अशोचन्नप्रहृष्यंश्च चरेद्विगतमत्सरः ॥ ४७
स्वभावसिद्ध्या संसिद्धान्स नित्यं सृजते गुणान् ।
ऊर्णनाभिर्यथा स्रष्टा विज्ञेयास्तन्तुवद्गुणाः ॥ ४८
प्रध्वस्ता न निवर्तन्ते निवृत्तिर्नोपलभ्यते ।
प्रत्यक्षेण परोक्षं तदनुमानेन सिध्यति ॥ ४९
एवमेके व्यवस्यन्ति निवृत्तिरिति चापरे ।
उभयं संप्रधार्यैतदध्यवस्येद्यथामति ॥ ५०

Dn1. n4 Ds D2. 3. 8 G1 Cn संसृजते; T1 संसृतिं च (for संसृजति). ❀ Cn : संसृजते निर्दिशति प्रकाशयतीत्यर्थः । ❀ — d) Ś1 K1. 2. 4 गुणान्वै तु कदा च न; Ca as in text.

44 a) Da4 G2 रश्मिस्; T2 रश्मिस्. T2 G1. 2 स्वेषां; M1. 5–7 एषां (for तेषां). B6 समादाय; D5. 7 T1 सुमनसां (D5 °सा); T2 G1. 6 M5–7 स मनसां (for °नसा). ❀ Ca : रश्मीन् इन्द्रियवृत्तीः ॥ Cs : रश्मीन् विषयप्रकाशनप्रकारान् । ...रश्मिनैषामिति पाठे बुद्ध्यादिगुणानामेषां रश्मिना तेजसा । ❀ — b) G6 यथा (for यदा). — c) K7 D5 स्वात्मा; D7 T G1–3. 6 M1. 5–7 ह्यात्मा (for ऽस्यात्मा). Dn1 तदप्रकाशे तस्यात्मा. — d) K7 D4. 6. 9 दीपः कुंभे ज्वलन्निव.

45 45ab is damaged is B7. — a) K4 D4 याः; G1 [अ]धः (for यः). D8 om. from कृतं up to the second लिप्य (in 46b). Ś1 K1. 2 प्रकृतं (for प्रा°). D5 M1. 6. 7 त्यक्त्वा पूर्वकृतं कर्म. ❀ Cs : प्राकृतमिति । प्रकृत्या फलरागस्वभावेन प्रयुक्तं प्राकृतं काम्यं कर्म । ❀ — b) D6 आत्मरतो (for °रतिर्). D7 T G1–3. 6 M1. 5–7 यदा नित्य(T1 G1–3 °त्यं)रतो मुनिः. — c) K6 Dn1. n4 Ds D2. 3 -भूतस्सात्; K7 -भूतं स्यात्; D7 T1 -भूतस्यात् (for -भूतः स्यात्). — d) B8 प्र- (for स). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–7 T G1–3. 6 M1. 5–7 उत्तमां (for परमां).

46 D8 om. up to लिप्य (cf. v. l. 45). — a) G3 वारिचरं; G6 [आ]काशचरः (for वारि°). Da4 पक्षि. — b) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 5–7 सलिलेन; K7 D4. 9 T G1. 3. 6 M1. 5–7 न लिंप(K7 °प्य)ति; G3 न लंपत (sic) (for लिप्यमानो). D5. 7 [अ]वलिप्यते; T1 G1 न लिप्यति (for °प्यते). — c) D7 T1 G1. 2 एष (for एव).

47 B8 om. 47ab. — a) K8 एव (for एवं-). — b) K7 D4. 5. 9 नाबुद्ध्या; D7 T G1–3. 6 संबुध्य (for स्वबुद्ध्या). D7 T2 G6 M5–7 विहरन् (for °रेन्). M5 मुनिः (for नरः). — c) Ś1 K1. 2 चाप्रहृष्यंश्च (for अप्र°). M5 अप्रहृष्यन्नशोचंश्च. — d) K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 समो (for चरेद्). K7 D4–6. 9 सहेत गतमत्सरः.

48 a) K4. 6. 7 V1 Bo. 6. 7. 8 (marg. as in text). 9 Da3 Dn1. n4 Ds D2. 3. 5. 8 -युक्त्या; D4. 9 -बुद्ध्या; T2 -शक्त्या (for -सिद्ध्या). K4. 6. 7 V1 Bo. 6–9 Da3 Dn1. n4 Ds D2–5. 8. 9 G2 M5. 6 युक्तस्तु (Ds °श्च); D7 T G1. 3. 6 M7 युक्तं तु (for संसिद्धान्). M1 स्वातंत्र्यभावयुक्तस्तु. — b) Ś1 K1. 2 द्रष्टा हि; K7 D4. 6. 9 स्रष्टा हि; Da4 स नित्यान्; D7 T G1. 2. 6 M1. 5–7 नित्यं सं- (for स नित्यं). D4 स्रजते. — c) K1 तूर्ण-; D7 और्ण- (for ऊर्ण-). K4. 6. 7 V1 Bo. 7–9 Da3. a4 Dn1. n4 Ds D2–5. 8. 9 सूत्रं; D7 T G1–3. 6 M5 सत्त्वं; M1. 6. 7 सृष्टा (for स्रष्टा). — d) B9 जंतुवद् (for तन्तु°).

49 a) B8 (marg.) वै; M5 वि- (for न). B7 विवर्तंते (for निव°). ❀ Cs : प्रध्वस्ता इति । विवेकज्ञानप्रणष्टा गुणाः । ❀ — b) V1 प्रवृत्तिर् (for नि°). K4 नोपलक्षयेत्; B8 (marg. as in text) Da3. a4 °पद्यते (for °लभ्यते). ❀ Ca : यथा ऊर्णनाभिः मर्कट इव तन्तुवद्गुणाः । न .... ये प्रध्वस्तास्ते निवर्तन्ते । न खलु विनष्टा घटव्यक्तिरीश्वरेण उन्मज्जयितुं शक्यते । एवं सिद्धे, उत्तरकाले तज्जातीयोत्पत्तिमाह — निवृत्तिर्नोपलभ्यते । ❀ — c) K1 प्रत्यक्षे च (for °क्षेण). — d) D6 सिध्यते. ❀ Cp : अनुमीयते श्रुतिरनेनेत्यनुमानं स्मृतिः । तया तत्सिध्यति । ❀

50 a) K1 एकमेके; T2 इति केचिद्. K1 व्यवसंति; K4. 6 B7 Da3 Dn4 Ds D2. 3. 7. 8 [ऽ]ध्यवस्यंति (for व्यव°). — b) D5 T G1. 2 निवृत्तिम्; D7 निर्वृत्तिम्; G6 निवृत्तम् (for °त्तिर्). V1 अपि; D7 इव (for इति). — c) K1 संप्रदार्यैतद्; D2 T2 G1 °धार्यं तद् (for °धार्यैतद्). — d) Ś1 K1. 2 अध्यवसेद्; K4. 6. 7 V1 Bo. 6. 7. 8 (marg. as in text). 9 Da3 Dn1. n4 Ds D2. 3. 8 ऽध्यवस्ये(V1 °से)त (for अध्यवस्येद्). K7 D4. 5. 9 यथाविधि; B9 Ds1 M6 यथा मतिः (for यथामति).

इतीमं हृदयग्रन्थिं बुद्धिभेदमयं दृढम् ।
विमुच्य सुखमासीत न शोचेच्छिन्नसंशयः ॥ ५१
मलिनाः प्राप्नुयुः शुद्धिं यथा पूर्णां नदीं नराः ।
अवगाह्य सुविद्वांसो विद्धि ज्ञानमिदं तथा ॥ ५२
महानदीं हि पारज्ञस्तप्यते न तरन्यथा ।
एवं ये विदुरध्यात्मं कैवल्यं ज्ञानमुत्तमम् ॥ ५३
एतां बुद्ध्वा नरः सर्वां भूतानामागतिं गतिम् ।
अवेक्ष्य च शनैर्बुद्ध्या लभते शं परं ततः ॥ ५४
त्रिवर्गो यस्य विदितः प्राग्ज्योतिः स विमुच्यते ।
अन्विष्य मनसा युक्तस्तत्त्वदर्शी निरुत्सुकः ॥ ५५
न चात्मा शक्यते द्रष्टुमिन्द्रियेषु विभागशः ।
तत्र तत्र विसृष्टेषु दुर्जयेष्वकृतात्मभिः ॥ ५६
एतद्बुद्ध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणम् ।
विज्ञाय तद्धि मन्यन्ते कृतकृत्या मनीषिणः ॥ ५७

C. 12. 7124
B. 12. 194. 59
K. 12. 182. 71

---

51 a) Ds1 हृदयं (for °य-). — b) K6 -चित्तमयं; Bo. 6. 7. 8 (marg. as in text). 9 D3. 8 -चिंता°; D5 -सत्त्व°; G2 -मेध° (for -भेद°). ❀ Cp: हृदयग्रन्थिम्, अहंकारं, अज्ञानं वा जाड्यं वा ॥ Cs: हृदयग्रन्थिम्, अतत्त्वमिथ्याज्ञानरूपं बुद्धिभेदमयम् । ❀ — c) G2 विमुंच. K7 V1 B9 D4. 9 आसीनो (for आसीत).

52 a) K2. 4 मलिनः; M5 (before corr.). 6. 7 (*sup. lin.*) प्रसृताः. K4. 7 D2. 4–7. 9 M5–7 सिद्धिं (for शुद्धिं). — b) Ś1 K1 तथा (for यथा). Da4 M5 पूर्णा. K1 नदी; Da4 नदां. G3. 6 नरः. ❀ Cs: पूर्णां सततप्रवाहिनीम् । ❀ — c) Ś1 K1. 2 D7 G3 अविगाह्य; D6 अवग्राह्य (for °गाह्य). D5 च (for सु-). — d) D5. 7. 8 विधि- (for विद्धि). D6 लोकम् (for ज्ञानम्). D5. 6 इमं (for इदं). — After 52, K7 B9 D4. 9 ins. 509*.

53 K7 om. 53. B9 D4. 9 om. (hapl.) 53^{ab}; V1 reads it on marg. — a) K1 महानदी; K4. 6 Bo. 8 (marg.) Da3. a4 Dn1. n4 Ds D3. 6. 8 °नद्या; B6–8 D5 °नद्यां (for °नदीं). B6 तत्तज्ज्ञस्; Da3. a4 तत्त्वज्ञस्; D7 T G1–3. 6 M1. 5–7 पारज्ञास् (for °ज्ञस्). — b) V1 तीर्यते; D7 T G1–3. 6 M1. 5–7 तरंते (for तप्यते). K4. 6 V1 Bo Dn1. n4 Ds D2. 3. 6–8 T G1–3. 6 M1. 5–7 तद(M6 °दा)न्यथा (for तरन्यथा). — K6 V1 Bo. 6–8 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 ins. after 53^{ab}: K7 B9 D4. 9 after 52:

509* न तु तप्यति तत्त्वज्ञः फले ज्ञाते तरत्युत ।

[V1 न हि; Da4 न नु (for न तु). K7 D4–6. 8 तप्यते न तु तत्त्वज्ञः (for the prior half). V1 Dn4 D4. 9 फल- (for फले). K7 Da4 Dn1 D4. 9 ज्ञाने; Dn4 -जाते (for ज्ञाते).]

— c) V1 Bo. 7. 9 Da4 Ds2 D3. 5. 7 T1 G1. 3. 6 आध्यात्मं; B8 (marg. as in text) M1. 6. 7 आत्मानं (for अध्यात्मं). — d) Ś1 K1 Da4 कैवल्य-; K2. 4 वैकल्य-; K6 केवल्यं; B6–9 Dn1 D2. 4–7. 9 T G1–3. 6 M1. 5–7 केवलं (M6. 7 °ल-) (for कैवल्यं).

54 a) K6 Ds2 D3 M1. 5–7 एवं; B6 एतद् (for एतां). K7 D4. 8. 9 G6 बुद्ध्या (for बुद्ध्वा). B6. 7. 9 नरः सर्वं-; Da3. a4 नरः सर्वं; D7 T G1–3. 6 M1. 5–7 नराः सर्वे (D7 °र्वां) (for नरः सर्वां). — b) D4 om. गतिम्. T2 भूतानामगतिं सतिं. — c) D7 T G1–3. 6 M5 सम्यग् (for बुद्ध्या). — d) Da4 लभ्यते (for लभते). K4. 6. 7 V1 Bo. 6–9 Da3 Dn4 Ds D3. 4. 8. 9 Cp: शमंततः; Da4 Dn1 D2. 5. 6 शमनं ततः (for शं परं ततः). D7 T G1–3. 6 M1. 5–7 लभते (G2 M7 लभंते; M1. 6 वहंते) शममुत्तमं. ❀ Cn: शं सुखम्, अनन्ततः अनन्तम् । शममन्तत इति पाठः स्पष्टार्थः । ❀

55 a) K6 त्रिविधो; D5 त्रिवर्णो (for °र्गो). K7 D4. 9 शास्त्रेण; G1. 2 विहितः (for विदितः). — b) V1 D7 T2 G1. 2 M1. 5–7 प्रेक्ष्य तं; T1 प्रेष्यतां; G3. 6 प्रेष्य(G6 °क्ष्य)तः (for प्राग्ज्योतिः). K6. 7 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 प्रेक्ष्य यश्च विमुंच(D5 °मोक्ष्य)ति. — c) Da4 D7 T G1–3. 6 M1. 5–7 अन्वीक्ष्य (Da4 °ष्य) (for अन्विष्य). K2. 4 अन्विष्यमाणमायुश्च. — d) K7 D4. 6. 9 सोंतर्दर्शी; T2 तद्वद्दर्शी (for तत्त्व°). K2 निरुत्सकः; Da4 °त्सुकैः; G2 °त्सुखः. ❀ Cp: निरुत्सुकोऽतरलचित्तः । ❀

56 a) M1. 7 ज्ञातुम् (for द्रष्टुम्). — b) K6. 7 Dn1. n4 Ds2 D2. 3. 5. 8 इंद्रियैश्च (D5 °यैः सु-); D7 T2 G1 इंद्रियेण (for °येषु). — Da3. a4 om. 56^{cd}. — c) V1 नियुक्तेषु; Dn1. n4 D3. 8 विसृष्टैश्च; D7 T G1–3. 6 M7 निसृष्टेषु (for विसृ°). — d) Ś1 K1. 2. 4 दुर्धरेषु; K6 Dn1. n4 D2. 3. 8 दुर्वार्यैश्च; K7 V1 Bo. 6–8 D5 G3 दुर्वार्येषु; D4. 9 दुर्धार्येषु; D3. 6 दुर्वार्यैर् (for दुर्जयेषु). D7 T G1. 2. 6 अजितात्मभिः (for अकृता°).

57 a) D4 M1. 6. 7 एवं (for एतद्). K2 Ds2 बुद्ध्या (for बुद्ध्वा). Dn1 बुद्धिः (for बुद्धः). — b) D7 G1. 2

C. 12. 7125
B. 12. 194. 60
K. 12. 192. 72

न भवति विदुषां ततो भयं
यदविदुषां सुमहद्भयं भवेत् ।
न हि गतिरधिकास्ति कस्यचि-
त्सति हि गुणे प्रवदन्त्यतुल्यताम् ॥ ५८
यत्करोत्यनभिसंधिपूर्वकं
तच्च निर्णुदति यत्पुरा कृतम् ।
नाप्रियं तदुभयं कुतः प्रियं
तस्य तज्जनयतीह कुर्वतः ॥ ५९
लोक आतुरजनान्विराविण-
स्तत्तदेव बहु पश्य शोचतः ।
तत्र पश्य कुशलानशोचतो
ये विदुस्तदुभयं पदं सदा ॥ ६०

इति श्रीमहाभारते शान्तिपर्वणि सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

M$_{1.6.7}$ बुद्धि- (for बुद्ध-). — After 57^{ab}, Kumbh. ed. Cv ins.:

510* प्रतिगृह्य च निह्नोति ह्यन्यथा च प्रदृश्यते ।
न सर्पति च यं प्राहुः सर्वत्र प्रतिहन्यते ।
धूमेन चाप्रसन्नोऽग्निर्यथार्कं न प्रवर्तयेत् ।
धिष्ण्याधिपे प्रसक्ते तु स्थितिमेतां निरीक्षते ।
अतिदूराच्च सूक्ष्मत्वात्प्रस्थानं न प्रकाशते । [5]
प्रपद्य तच्छ्रुताह्नानि चिन्मयं स्वीकृतं विना ।

[(L. 1) ❀ Cv: अन्यथा तूष्णीमेव निराकरणं प्रदृश्यते । ❀ — (L. 3) ❀ Cv: अप्रसन्नः आच्छादितः । ❀ — (L. 4) ❀ Cv: धिष्ण्याधिपे वैकुण्ठलोकयात्राधिपे । ❀ — (L. 5) ❀ Cv: प्रस्थानं मुक्तिमार्गः । ❀ — (L. 6) ❀ Cv: प्रपद्य ज्ञात्वा । एतत्पर्यन्तं कालं वृथैवायुर्गतमिति वैराग्यं प्राप्येत्यर्थः । ❀]

— ^{c}) D$_{6.7}$ T G$_{1.3.6}$ [ए]तद् (for तद्). K$_{7}$ मन्येत (for मन्यन्ते). — ^{d}) K$_{2}$ कृत्यकृत्या; G$_{1.2}$ कृत(G$_{2}$ °तं)कृत्यं (for °कृत्या).

58 ^{a}) D$_{a4}$ G$_{2}$ भवंति; D$_{n4}$ भवती. D$_{a3}$ विदुष्यां; T$_{2}$ विमष्टां (for विदुषां). Ś$_{1}$ K$_{1.2}$ V$_{1}$ महद्भयं; K$_{7}$ D$_{4.9}$ तथा भयं; B$_{6}$ यतो भयं (for ततो भयं). — ^{b}) K$_{7}$ G$_{2}$ तद्यद् (for यद्). — ^{d}) D$_{5}$ गुणैः (for गुणे). K$_{6}$ प्रवदति; G$_{6}$ प्रभवंति. B$_{6.9}$ D$_{5}$ T$_{2}$ G$_{1.2.6}$ M$_{1.5-7}$ तुल्यतां; D$_{a3}$ [अ]तितुल्यतां; D$_{s2}$ अनल्पतां (for अतुल्यताम्).

59 ^{a}) K$_{6}$ V$_{1}$ B$_{6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_{s}$ D$_{2.3.6-8}$ T G$_{1-3.6}$ M$_{1.5.6}$ Cv यः (for यत्). D$_{a4}$ अनधि- (for अनभि-). — ^{b}) K$_{1}$ [अ]नुणंदति; K$_{6.7}$ B$_{0.6.8}$ D$_{a3.a4}$ D$_{n4}$ D$_{s}$ D$_{4-9}$ T G$_{1.2}$ निर्नुदति; V$_{1}$ विनिंदति (for निर्णु°). — ^{c}) D$_{a4}$ प्रियं (for [अ]प्रियं). D$_{4}$ lacuna for दुभयं कुतः प्रि. — ^{d}) D$_{7}$ G$_{1.2.6}$ M$_{7}$ तं (for तज्). K$_{1.2.4}$ G$_{6}$ सर्वतः (for कु°). — After 59, K$_{6}$ B$_{7-9}$ D$_{a3}$ D$_{n1.n4}$ D$_{s}$ D$_{2.3.8}$ Cp ins.:

511* लोकमातुरमसूयते जन-
स्तस्य तज्जनयतीह सर्वतः ।

[(L. 2) B$_{7-9}$ D$_{a3}$ कुर्वतः (for स°).]

60 B$_{7.9}$ D$_{s1}$ om. 60^{ab}. — ^{a}) K$_{7}$ पश्य; D$_{9}$ यश्च (for लोक). K$_{6}$ -जनाद् (for -जनान्). K$_{1}$ B$_{8}$ विराविशास् (B$_{8}$ °शस्); V$_{1}$ B$_{0}$ D$_{2}$ निराविशं(V$_{1}$ °श)स्; D$_{s2}$ D$_{3.8}$ निराविशत् (for विराविणस्). K$_{2.4}$ लोक आत्तरजनांतराविणस्; B$_{6}$ D$_{6.7}$ T G$_{1-3.6}$ M$_{1.5-7}$ Cs लोकमात(D$_{5}$ T$_{2}$ G$_{2}$ M$_{5.6}$ Cs °तु)रमसूयते जनस्; D$_{a3}$ (also as in text) **आंतरजनास्तदुभयं पदं. ❀ Ca: विराविण इति । बुद्धिद्वयापेक्षसंदेहादुभयशब्दधारिणः, अस्ति मोक्षो नास्ति मोक्ष इति दोलायमानसंदेहव्यञ्जकशब्दान् ॥ Cn (reading निराविशन्?): लोके निराविशन् सम्यगभिनिवेशं कुर्वन् ॥ Cv: विराविणः विशेषेण रोदनध्वनियुक्तानातुरजनान् । ❀ — ^{b}) K$_{4}$ D$_{4.9}$ तत्र देव (for तत्तदेव). K$_{2}$ योगतः; K$_{4}$ शोचत; B$_{6}$ D$_{7}$ T G$_{1-3.6}$ शोचति (for °तः). D$_{5}$ तस्य वै जनयतीह पश्यतः. — ^{c}) D$_{6}$ तत्र वीक्ष्य कुशलो न शोचते; T$_{2}$ M$_{7}$ तत्र पश्य कुशलं (M$_{7}$ °लो) न शोचतो. Csp as in text. — ^{d}) K$_{1}$ D$_{4.9}$ तद्भयं (for तदु°). Ś$_{1}$ K$_{1.2.4}$ सदैव ह; D$_{n1}$ सतां पदं; D$_{s}$ D$_{7.8}$ T G$_{1-3}$ M$_{1.5-7}$ पदं सतां; G$_{6}$ प्रियाप्रियं (for पदं सदा). D$_{a3.a4}$ ये विदुर्भयविरागिणः सदा; D$_{5}$ शोचतोभयविभागिनः सदा.

Colophon. — *Sub-parvan*: Ś$_{1}$ K$_{1.2.4.6.7}$ V$_{1}$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_{s}$ D$_{2.4-9}$ T G$_{1-3.6}$ M$_{1.5-7}$ मोक्षधर्म. — *Adhy. name*: K$_{1.2.4}$ V$_{1}$ B$_{0.6.8.9}$ D$_{a3.a4}$ अध्यात्मं; B$_{7}$ अध्यात्मकथनं; D$_{s}$ अध्यात्मनिरूपणं; T$_{2}$ गुणाचारं; M$_{1.5-7}$ अध्यात्मोपदेशः. — *Adhy. no.* (figures, words or both): B$_{8}$ D$_{n4}$ D$_{s2}$ D$_{7.8}$ T$_{1}$ G$_{1.3.6}$ M$_{1.5-7}$ 20; D$_{n1}$ 21; D$_{2}$ 19; T$_{2}$ G$_{2}$ 34. — *Śloka no.*: K$_{4}$ 62; D$_{a4}$ D$_{n1.n4}$ 63; D$_{s1}$ 61.

१८८

भीष्म उवाच ।
हन्त वक्ष्यामि ते पार्थ ध्यानयोगं चतुर्विधम् ।
यं ज्ञात्वा शाश्वतीं सिद्धिं गच्छन्ति परमर्षयः ॥ १
यथा स्वनुष्ठितं ध्यानं तथा कुर्वन्ति योगिनः ।
महर्षयो ज्ञानतृप्ता निर्वाणगतमानसाः ॥ २
नावर्तन्ते पुनः पार्थ मुक्ताः संसारदोषतः ।
जन्मदोषपरिक्षीणाः स्वभावे पर्यवस्थिताः ॥ ३
निर्द्वंद्वा नित्यसत्त्वस्था विमुक्ता नित्यमाश्रिताः ।
असङ्गीन्यविवादीनि मनःशान्तिकराणि च ॥ ४
तत्र स्वाध्यायसंश्लिष्टमेकाग्रं धारयेन्मनः ।
पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः ॥ ५
शब्दं न विन्देच्छ्रोत्रेण स्पर्शं त्वचा न वेदयेत् ।
रूपं न चक्षुषा विद्याज्जिह्वया न रसांस्तथा ॥ ६
घ्रेयाण्यपि च सर्वाणि जह्याद्ध्यानेन योगवित् ।
पञ्चवर्गप्रमाथीनि नेच्छेच्चैतानि वीर्यवान् ॥ ७
ततो मनसि संसज्य पञ्चवर्गं विचक्षणः ।
समादध्यान्मनो भ्रान्तमिन्द्रियैः सह पञ्चभिः ॥ ८
विसंचारि निरालम्बं पञ्चद्वारं चलाचलम् । C. 12.7137 B. 12.195.9 K. 12.193.10

188

☞ With 188, cf. Bṛhan-Nār. P. 44. 83–105, the variants from which are included in Appendix II (no. 1).

1 a) Da3. a4 तात (for पार्थ). — b) D7 ध्यानयोगश्; G6 ध्यानं योगं. — c) K7 तज्; Da3 ये; D4. 7. 9 T M1. 5–7 यज् (for यं). — d) B6–9 Dn1. n4 Ds D2. 3. 8 [इ]ह महर्षयः (for परम°). ❀ Ca: चतुर्विधम् । महाभूतलयः पूर्वमहंकारात्मकस्तथा । बौद्ध आध्यात्मिकश्चेति ध्यानयोगश्चतुर्विधः ॥ Cs (adds): यद्वा ध्यानस्य चतुर्विधत्वं विषयेभ्य इन्द्रियनिवर्तनं, ततो मनसीन्द्रियलयः, ततो मनसो बुद्धौ लयः, बुद्धेरात्मनीति । ❀

2 a) K7 D4. 9 सुनियतं; B8 (marg. as in text) Da3 सुनिष्ठितं: Ds1 M1 स्वनि° (for स्वनु°). Ś1 K1. 2 कार्यं (for ध्यानं). — b) Da4 यथा (for तथा).

3 a) D7 T1 G1. 3. 6 वर्तंते च (for नावर्तन्ते). — c) D5. 6 सर्व- (for जन्म-). K1. 4 -परिक्षीणः (for °क्षीणाः). — d) Ś1 K2. 4 पर्यवस्थितः; D7 T1 G1. 3. 6 पर्युपस्थिताः.

4 D5 om. (hapl) 4ab. — a) Ś1 K1. 2. 4. 7 D4. 9 निर्द्वंद्वो (K4 °द्वा) नित्यस(K7 D4. 9 °त)त्त्वस्थो. — b) Ś1 K1. 2. 4. 7 D4. 6. 9 विमुक्तो; B6–9 Da3. a4 निर्मुक्ता; Ds T2 M1. 5–7 विमुक्तिं; D7 T1 G1. 3 विमुक्तिर् (for °क्ता). Ś1 K2. 4 D4. 7 नित्यमाश्रितः; K6 V1 Bo. 6–9 Da3. a4 Dn4 D2. 3. 8 Cnp निष्परिग्रहाः: Dn1 नियमस्थिताः; D6 नित्यमास्थिताः (for °माश्रिताः). — c) K4. 6 Bo. 6. 7 Da3 Dn1. n4 D2. 3. 6. 8 G3 असंगानि (for असङ्गीनि). V1 Ds D5. 7 T G1. 6 M1. 6. 7 अविषादीनि; G2 अपकारीणि (for अविवादीनि).

5 a) V1 D4. 5. 9 G2 M6. 7 Cnp [अ]ध्ययनसंश्लिष्टम्; Bo 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 T2 ध्यानेन सं°; D7 T1 G1. 3 ध्यायेत्सुसं°; M1. 5 ध्यायन्नसं° (for स्वाध्यायसं°). ❀ Cn: [ध्याना]ध्ययनसंश्लिष्टमिति प्राचीनपाठे प्रणवेन घण्टानादवदतिदीर्घोच्चारितेन एकीभूतम् । ❀ — b) D7 T G1–3. 6 M1. 5–7 एकाग्रो. — c) ❀ Cn: इन्द्रियाणां मनोमात्रावस्थितिः पिण्डीकारः । ❀ — d) Ś1 K2. 4 आसीनं (for °नः). D9 (before corr.) मुक्तिः (for मुनिः).

6 b) Ś1 K1. 2 स्पर्शं चापि; K7 Da3. a4 Dn1 Ds D4–6. 9 T G1–3. 6 M1. 5–7 त्वचा स्पर्शं (by transp.). V1 Bo. 6–9 नापि च (for त्वचा न). D4 वेदयत्; D5 विंदयेत्. — c) K7 चक्षुषां. K7 Da3 Dn1 Ds1 D4. 6. 9 विंद्याज् (for विद्याज्). — d) D4 (before corr. as in text) G2 जिह्वाया. D5. 7 T G1–3. 6 M1. 5–7 च (for न). K6 D7 T G1. 3. 6 M1 रसं (for रसांस्).

7 a) B9 Da3. a4 प्रियाणि; Ds1 प्रेयाणि; G3 घ्रेयानि. — b) D5 ज्ञानेन; D7 T G1. 3. 6 M5 च ध्यान- (for ध्यानेन). — c) K6 पंचधर्म्यं-; Bo. 6. 8 °धर्म- (for °वर्ग-). — d) Ś1 K7 B8 D5 G6 नैच्छेच्च; G1. 3 T1 नैच्छत (for नेच्छेच्च). K7 D9 (before corr.) धैर्यवान् (for वीर्य°). K1. 2 नै(K2 ने)च्छेच्च तानि वीर्यवान्.

8 a) K4 संभज्य; K6 V1 Bo. 7–9 Da3. a4 Dn1. n4 Ds D2. 3. 5 संगृह्य; D4. 8. 9 संसृष्टं (for संसज्य). — b) T2 पंचवर्ग-. K4 विकक्षणः; K7 विचक्षणैः।

C. 12. 7137
B 12. 196. 9
K. 12. 193. 10

पूर्वे ध्यानपथे धीरः समादध्यान्मनोऽन्तरम् ॥ ९
इन्द्रियाणि मनश्चैव यदा पिण्डीकरोत्ययम् ।
एष ध्यानपथः पूर्वो मया समनुवर्णितः ॥ १०
तस्य तत्पूर्वसंरुद्धं मनःषष्ठमनन्तरम् ।
स्फुरिष्यति समुद्भ्रान्तं विद्युदम्बुधरे यथा ॥ ११
जलबिन्दुर्यथा लोलः पर्णस्थः सर्वतश्चलः ।
एवमेवास्य तच्चित्तं भवति ध्यानवर्त्मनि ॥ १२
समाहितं क्षणं किंचिद्ध्यानवर्त्मनि तिष्ठति ।
पुनर्वायुपथं भ्रान्तं मनो भवति वायुवत् ॥ १३
अनिर्वेदो गतक्लेशो गततन्द्रीरमत्सरः ।
समादध्यात्पुनश्चेतो ध्यानेन ध्यानयोगवित् ॥ १४
विचारश्च वितर्कश्च विवेकश्चोपजायते ।
मुनेः समादधानस्य प्रथमं ध्यानमादितः ॥ १५
मनसा क्लिश्यमानस्तु समाधानं च कारयेत् ।
न निर्वेदं मुनिर्गच्छेत्कुर्यादेवात्मनो हितम् ॥ १६
पांसुभस्मकरीषाणां यथा वै राशयश्चिताः ।

D$_{s1}$ विवक्षणः. —^{c}) T$_{2}$ समां दध्यान्; G$_{2}$ समादध्यन्. K$_{1}$ समादध्यात्मनो भ्रांताम्.

9 ^{a}) Ś$_{1}$ K$_{1.2.4}$ निःसंशयं; K$_{7}$ D$_{4.9}$ विसंवादि; D$_{5.6}$ निःसंचारि; D$_{7}$ T$_{1}$ G$_{1}$ विसंचारं; G$_{3}$ M$_{7}$ °चारी. K$_{7}$ निरालेपं (for °लम्बं). ❀ Cs: विसंचारि बहिःसंचाररहितम् । निरालम्बं विषयस्मरणरहितम् । ❀ —^{b}) G$_{1}$ पंचचारं (for °द्वारं). —^{c}) K$_{4}$ V$_{1}$ B$_{0.6-8}$ D$_{a3, a4}$ D$_{n1, n4}$ Ds D$_{2.3.5-8}$ T$_{2}$ G$_{3.6}$ M$_{1.5-7}$ पूर्वं; B$_{9}$ D$_{4}$ T$_{1}$ G$_{1.2}$ पूर्व- (for पूर्वे). D$_{s2}$ ध्याने यतेद्; D$_{7}$ ध्यानपदं; T G$_{1.3}$ °पदे (for °पथे). K$_{7}$ धीराः; B$_{0}$ T$_{1}$ वीरः (for धीरः). —^{d}) B$_{8}$ समदध्यान्; D$_{a4}$ सदा दध्यान्; T$_{1}$ समादद्यान्. V$_{1}$ B$_{0.6-9}$ D$_{a3}$ D$_{n1.n4}$ Ds D$_{3.5.7.8}$ M$_{6.7}$ (*sup. lin.*) मनोंतरा (D$_{a3}$ °रः); T G$_{1.3.6}$ M$_{1.5.7}$ मनो नरः (for मनोऽन्तरम्).

10 ^{b}) D$_{a4}$ पिंडि-; T$_{2}$ पिंड-. Ś$_{1}$ K$_{1.2.4}$ [अ]सौ (for [अ]यम्). —^{c}) T$_{1}$ एव (for एष). D$_{a3.a4}$ स्थानपथः (for ध्यान°). D$_{a4}$ पूर्वं; D$_{5}$ नित्यं; T$_{2}$ पूर्वें. —^{d}) K$_{6}$ यथा (for मया). K$_{1}$ समनुवर्णिताः.

11 ^{a}) G$_{2}$ तच्च (for तस्य). K$_{6}$ -संशुद्धम् (for -संरुद्धं). ❀ Ca: पूर्वसंरुद्धमिति प्रथमरोधोपक्रमे ध्याने स्थितमपि । ❀ —^{b}) K$_{6}$ B$_{0.7.8}$ (marg.) D$_{n1.n4}$ Ds D$_{2.3.8}$ आत्मनः षष्ठमां(K$_{6}$ D$_{2}$ °मं)तरं; K$_{7}$ D$_{a3.a4}$ D$_{4}$ आत्मषष्ठमनंतरं; V$_{1}$ B$_{6.8}$ D$_{5-7}$ M$_{1}$ आत्मषष्ठं मनोंतरं; T G$_{1-3.6}$ M$_{5-7}$ आत्मषष्ठं (G$_{6}$ °ष्ठ-) मनोंतरा. —^{c}) K$_{1}$ B$_{8}$ (marg. as in text) समुद्भ्रांत-; V$_{1}$ B$_{6.8}$ (marg.) °द्भ्रांते; B$_{6}$ (marg.) °द्भूता; D$_{a3, a4}$ D$_{n4}$ Ds D$_{2.5.7.8}$ G$_{3.6}$ M$_{7}$ °द्भ्रांता; D$_{4}$ °द्वांतं (for °द्भ्रान्तं). —^{d}) D$_{7}$ अंबुधरो (for °रे). ❀ Cs: यथाम्भोधरादन्यत्र सती अपि विद्युदम्भोधरमध्य एव स्थाने स्थाने विचलन्ती लक्ष्यते, एवं समाधौ नाभ्यादिमूर्धान्तरधारणास्थाने क्रमेण स्थाप्यमानं मनस्तत्र चलत्वं न जहातीत्यर्थः । ❀

12 ^{a}) D$_{8}$ लोभः; M$_{1}$ लोलं. —^{b}) G$_{2}$ पत्रस्थः (for पर्णस्थः). D$_{5}$ च सः; M$_{7}$ चरः (for चलः). —^{c}) B$_{0.7-9}$ D$_{a3, a4}$ D$_{n1}$ Ds D$_{2.3.8}$ G$_{6}$ चित्तं (D$_{a4}$ °त्रं) च; B$_{6}$ चित्तं वै (for तच्चित्तं). —^{d}) Ds D$_{7}$ T G$_{1.3.6}$ M$_{1.6.7}$ भ्रमति (for भवति). D$_{7}$ T$_{1}$ G$_{1}$ M$_{5}$ ज्ञानवर्त्मनि; T$_{2}$ ध्यानवर्तनि (sic).

13 ^{a}) D$_{6}$ समाहतं; M$_{7}$ °हितः. B$_{8}$ (marg. as in text) D$_{a4}$ मनः (for क्षणं). Ś$_{1}$ K$_{1.4.6}$ कंचिद्. T$_{1}$ G$_{1.3.6}$ समाधिलक्षणं किंचिज्. —^{b}) T G$_{1.3.6}$ ज्ञान- (for ध्यान-). —^{c}) D$_{7}$ T$_{1}$ G$_{1.3}$ पूर्वं (for पुनर्). K$_{1.6}$ B$_{9}$ वायुपथ-; D$_{a4}$ D$_{s1}$ M$_{1.6}$ °पथे. K$_{7}$ D$_{4.5.9}$ M$_{5.7}$ प्राप्य; D$_{7}$ T G$_{1.3.6}$ M$_{1.6}$ प्राप्तं (T$_{2}$ °प्ता) (for भ्रान्तं). —^{d}) M$_{1.6.7}$ भ्रमति (for भवति).

14 ^{b}) B$_{9}$ ततस्तंद्रीर्; D$_{5.7}$ G$_{1.2}$ M$_{7}$ गततंद्रिर्. K$_{4.6.7}$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_{s2}$ D$_{2-5}$ G$_{2}$ M$_{1.5-7}$ अमत्सरी. D$_{9}$ गततंद्रोप्यमत्सरी. —^{d}) B$_{8}$ ध्यानयोगतः.

15 ^{ab}) K$_{7}$ D$_{4.6.9}$ वितर्कश्च विचारश्च (by transp.); G$_{3}$ हताशश्च वितर्कश्च (for ^{a}). K$_{6}$ D$_{n1.n4}$ D$_{2.3.8}$ transp. वितर्कश्च and विवेकश्च. G$_{3}$ [अ]विग्रहश्च (for विवेकश्च). — K$_{6}$ om. 15^{c}–16^{b}. —^{d}) D$_{7}$ प्रथम-. D$_{5}$ आहितः (for आदितः). D$_{n4}$ प्रमध्यानसमादितः (sic). ❀ Cs: आलोचनमात्ररूपा विषयेन्द्रियवृत्तिर्विचारः । संदेहरूपा मनोवृत्तिर्वितर्कः । निर्णयरूपा बुद्धिवृत्तिर्विवेकः । ❀

16 K$_{6}$ om. 16^{ab} (cf. v. l. 15). —^{a}) K$_{4}$ D$_{4.9}$ सहसा (for मनसा). Ś$_{1}$ K$_{1.2.4}$ क्लेशमानस्य; K$_{7}$ D$_{4.5.9}$ M$_{5}$ क्लिश्यमानश्च; B$_{6}$ °मानं तु; D$_{4}$ °मानोपि; G$_{1}$ °मानस्य. —^{b}) D$_{5}$ तु (for च). Ś$_{1}$ K$_{1.2.4.7}$ D$_{4.6.9}$ G$_{2}$ तत्समाधानकांक्ष(K$_{7}$ D$_{4.6.9}$ G$_{2}$ °काम)या. —^{c}) D$_{5}$ T$_{2}$ G$_{1}$ M$_{1}$ अनिर्वेदं. D$_{s2}$ D$_{5}$ पुनर् (for मुनिर्). D$_{4.7}$ T G$_{1}$ M$_{5.7}$ गच्छन् (for गच्छेत्).

सहसा वारिणा सिक्ता न यान्ति परिभावनाम् ॥१७
किंचित्स्निग्धं यथा च स्याच्छुष्कचूर्णमभावितम् ।
क्रमशस्तु शनैर्गच्छेत्सर्वं तत्परिभावनम् ॥ १८
एवमेवेन्द्रियग्रामं शनैः संपरिभावयेत् ।
संहरेत्क्रमशश्चैव स सम्यक्प्रशमिष्यति ॥ १९
स्वयमेव मनश्चैव पञ्चवर्गश्च भारत ।
पूर्वं ध्यानपथं प्राप्य नित्ययोगेन शाम्यति ॥ २०
न तत्पुरुषकारेण न च दैवेन केनचित् ।
सुखमेष्यति तत्तस्य यदेवं संयतात्मनः ॥ २१
सुखेन तेन संयुक्तो रंस्यते ध्यानकर्मणि ।
गच्छन्ति योगिनो ह्येवं निर्वाणं तन्निरामयम् ॥ २२

इति श्रीमहाभारते शान्तिपर्वणि अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

१८९

युधिष्ठिर उवाच ।
चातुराश्रम्यमुक्तं ते राजधर्मास्तथैव च ।
नानाश्रयाश्च बहव इतिहासाः पृथग्विधाः ॥ १
श्रुतास्त्वत्तः कथाश्चैव धर्मयुक्ता महामते । C. 12. 7152 B. 12. 196. 2 K. 12. 194. 2

---

17 a) K6. 7 V1 Bo. 6–9 Da3. a4 Ds1 D2. 4–6. 8. 9 पांशु- (for पांसु-). D9 (before corr.) -कारीषाणां. ❀ Cn. v: करीषं शुष्कगोमयचूर्णम् । ❀ — b) Da4 M6 (*inf. lin.*) राशयः श्रिताः; D5. 7 M1. 6 °य स्थिताः. — d) B7–9 Da4 D5 प्रयांति (for न यान्ति). Ś1 K1. 2. 4 परि- (K1 °र)भावनात्; K6 Bo. 6–9 Da3. a4 Dn1. n4 D2. 3. 5. 8 °भावनं. ❀ Cn: परिभावनं मूर्त्याद्याकारेण कल्पनम् ॥ Cs: परिभावनाम् अन्योन्यसंश्लेषम् । ❀

18 a) B7 damaged. K6 D7 T G2 M1. 5–7 सिक्तं; K7 D9 स्निग्धे. Ś1 K1 यथा दद्याच् (for यथा च स्याच्). K6 यत् (for च). — b) K7 D4. 7. 9 G1. 3 शुष्क (G3 °ष्कं) पूर्वम् (for शुष्कचूर्णम्). K4 D4. 9 तथा परं; M1. 5 अभाविकं (for °वितम्). Da4 शुकचूर्णमभाषितं. ❀ Cs: अभावितं स्यात्, अन्योन्यसंश्लिष्टं न स्यादित्यर्थः । ❀ — c) D7 T G1. 3 M1. 7 च (for तु). — d) K7 Dn1 D4. 7. 9 T G1–3. 6 M1. 5. 7 परिभावनां; Ds2 °भावना; M6 °भावनात्.

19 a) T1 एकम् (for एवम्). K7 D4–6. 9 एवमिंद्रियसंज्ञानं (D5. 6 °घातं). — b) Da4 स (for सं-). B9 शनैः संपरिवर्तयेत्. — c) K7 D4. 6. 9 T1 G1–3. 6 M1. 5. 7 [ए]नं (for [ए]व). Ś1 K1. 2. 4 क्रमशः संहरेच्चैव (K2. 4 °वं); B6–8 Da3. a4 D5 ततः प्रसाद्य क्रमशः; B8 (marg.) संहारं क्रमशश्चैव. — d) Ś1 K1. 2 सं (K1 स)-पश्यन्; G1 सम्यक्च (for स सम्यक्). Dn4 प्रशमिष्यते. B6 स सम्यक्त्वं गमिष्यति; D5 सम्यक्तं च प्रपश्यति.

20 a) K6 Dn1 Ds D8 एवं (for एव). Bo. 8 Da3 Dn1. n4 D2. 3. 5. 8 चैवं; G2 चैनां (for चैव). — b) K6 V1 Bo. 6–9 Da3 Dn1. n4 Ds D2. 3. 5. 6. 8 M1. 6. 7 (*sup. lin.* as in text) पंचवर्गं. — c) K6 B7 D4 G1 पूर्व-; Da4 पुनर्; Dn1 पूर्वे (for पूर्वं). K6 Bo. 6–9 Dn1. n4 D2. 3. 8 ध्यानपथे; Da3. a4 ज्ञानपथं; T2 ध्यानपदं (for °पथं). K6 Bo. 6–9 Da3 Dn1. n4 D2. 3. 8 स्थाप्य (for प्राप्य). — d) T2 M1. 7 नित्यं (for नित्य-). D5. 6 ध्यानयोगेन गच्छति.

21 b) K7 D9 तद्; D5 [ए]तद् (for च). D2 देवेन. M1. 6 न दै (M1 दे)वेन न केनचित्. — c) K2 अभ्येति (for एष्यति). D5. 6 तत्रास्य; D7 T G1. 3. 6 M1. 5–7 यत्रास्य; G2 यत्तस्य. — d) K7 D4. 9 भाव्येन च विपत्तयः; D5. 7 T G1. 3 M1. 5–7 भवंति न विपत्तयः.

22 a) G2 संयुक्ता. — b) G2 रंस्यंते. — c) K7 D4. 9 T G1. 2 ह्येव; Da3. a4 नित्यं; D5 M1. 5–7 युक्ता; G6 [ऽ]प्येवं (for ह्येवं). — d) ❀ Cn: निर्वाणं कैवल्यम् । निरामयं निर्द्वंतम् । ❀

Colophon. — *Sub-parvan*: Ś1 K1. 2. 4 V1 Bo. 7. 8 Da3. a4 Dn1. n4 Ds D2. 3. 6–9 T G1–3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name*: D8. 9 अध्यात्मयोगः; D7 T2 G1. 6 ध्यानयोगः; M1. 5–7 ध्यानयोगविधिः. — *Adhy. no.* (figures, words or both): Dn1 22; Dn4 Ds2 D7. 8 T1 G1. 3 M1. 5–7 21; D2 20; T2 G2. 6 35. — *Śloka no.*: Da4 Dn1. n4 D8 22.

189

1 a) K6 चतुराश्रमम्. Ś1 K1 D5 °श्रम्ययुक्तास् (for °श्रम्यमुक्तं). ❀ Cn: चतुर्णामाश्रमाणां हितं चातुराश्रम्यम् । ❀ — b) K1 V1 Dn1 राजधर्मस्. K7 lacuna; D5 ते (for च). — c) B6 D9 नानाश्रमाश्च. D7 T1 G1. 3

C. 12. 7152 B. 12. 196. 2 K. 12. 194. 2 संदेहोऽस्ति तु कश्चिन्मे तद्भवान्वक्तुमर्हति ॥ २
जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत ।
किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः ॥ ३
जपस्य च विधिं कृत्स्नं वक्तुमर्हसि मेऽनघ ।
जापका इति किं चैतत्सांख्ययोगक्रियाविधिः ॥ ४
किं यज्ञविधिरेवैष किमेतज्जप्यमुच्यते ।
एतन्मे सर्वमाचक्ष्व सर्वज्ञो ह्यसि मे मतः ॥ ५

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यमस्य यत्पुरा वृत्तं कालस्य ब्राह्मणस्य च ॥ ६
संन्यास एव वेदान्ते वर्तते जपनं प्रति ।
वेदवादाभिनिर्वृत्ता शान्तिर्ब्रह्मण्यवस्थितौ ।
मार्गौ तावप्युभावेतौ संश्रितौ न च संश्रितौ ॥ ७
यथा संश्रूयते राजन्कारणं चात्र वक्ष्यते ।

भगवन् (for बहव). — ^{d}) G1 पुरातनाः (for पृथग्विधाः).

2 ^{a}) K1 Da4 श्रुत्वा (for श्रुतास्). — ^{b}) D7 T1 G1 ब्रह्मयुक्ता (for धर्म°). G3. 6 महामखाः (for °मते). — ^{c}) D5 हि; D7 G1. 3. 6 [इ]ति (for तु). D7 T G1. 3. 6 M1. 5–7 मे कश्चित् (by transp.). — ^{d}) Ś1 K1. 2 G3. 6 M7 तं (for तद्). K6. 7 Da3. a4 D4. 6 G3 अर्हसि (for अर्हति).

3 ^{a}) Ds1 फलाव्याप्तिः; D7 T G1–3. 6 फलप्राप्तिं (T2 °प्तिः). — ^{c}) V1 B7 जपता युक्तं. — ^{d}) D7 T G1–3. 6 M1. 5–7 गच्छंति (for तिष्ठन्ति).

4 Da3. a4 om. (? hapl.) 4^{ab}. — ^{a}) K6. 7 V1 B0. 6. 9 Dn1. n4 Ds D2–5. 7–9 G2. 3. 6 M1. 7 ज(K7 D4. 9 जा)प्यस्य (for जपस्य). M7 तु (for च). Ds कृत्यं (for कृत्स्नं). — ^{b}) G2 अर्हति. K2 om. मेऽनघ. — ^{c}) K2 कं (for किं). — ^{d}) Ś1 K2 Ds2 सांख्यं योगः; D5 सांख्ययोगः. K6 -क्रियादिभिः (for °विधिः). G2 सांख्ययोगं क्रियाविधिं. ❀ Ca: सांख्ययोगक्रियाविधिरिति । किं सांख्यक्रियाया विधिर्जाप्यमुत योगक्रियायाः ॥ Cn: किं जापकशब्देन विचारकृत्, योगकृत्, कर्मठो वा उच्यत इत्यर्थः । ❀

5 ^{b}) B9 अन्यज्; G2 एतं (for एतज्). K6 जपम्; K7 D4. 9 जाप्यम् (for जप्यम्).

6 ^{a}) K7 D4. 6. 9 अत्रैव (for अत्रापि). — ^{c}) T2 G3. 8 च (for यत्). D7 G1 यमस्य पुनरावृत्तं. — ^{d}) B8 (marg.) Da4 मृत्योर् (submetric) (for कालस्य). K1 ब्रह्मणस्य. — K6 V1 B0. 6–9 Da3. a4 Dn1. n4 D2. 3. 5. 6. 8 Cn ins. after 6 (K6 B6–9 Da3. a4 Dn1. n4 D2. 3. 6. 8 Cn Cal. ed. repeating the same [with var.] after 7^{cd}): K7 Ds ins. after 7^{cd}:

511* सांख्ययोगौ तु यावुक्तौ मुनिभिर्मोक्षदर्शिभिः ।

[B6 (marg.). 7. 8 Da3 D6 (all first time) सांख्ययोगस्य या भक्तिर्; D5 सांख्ययोगस्य या युक्तौ (for the prior half). K6 (second time) B6. 7. 9 (all both times) Dn1. n4 D3. 8 Cal. ed. (all second time) शुभदर्शिभिः; K7 Da3 D2 (last two second time) सम°; V1 वेदवेदिभिः; B8 Da4 (both second time) तत्त्वदर्शिभिः; Ds धर्म° (for मोक्ष°).]

On the other hand, D7 T G1. 3. 6 M5 Kumbh. ed. ins. after 6:

512* इक्ष्वाकोश्चैव मृत्योश्च विवादो धर्मकारणात् ।

7 B0 om. 7^{abcd}. — ^{a}) Ś1 K1. 2 D4. 9 एष; D6 इव; T1 एवं (for एव). — ^{b}) K7 जपते (for जपनं). — ^{c}) K6 Da3. a4 Dn1. n4 Ds D2. 3. 8 Cn वेदवादाश्च; D5 °वेदांग-; D7 T G1. 3. 6 M5–7 वेदादेवाभि- (for वेदवादाभि-). Ś1 K1 -निर्वृत्तः; K2 -निर्वृत्तिः; K4. 6. 7 V1 B6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 M1 Cn -निर्वृत्ताः; D4 -निवृत्ती (for -निर्वृत्ता). — ^{d}) K4. 6 V1 B6–9 Da3 Dn1. n4 Ds D2. 3. 5. 6. 8 Cn शांता ब्र(Ds1 ब्रा)ह्मण्यवस्थिताः; K7 शांते ब्राह्मण्यवस्थितः; B8 (marg.) D7. 9 T G2 M7 शांतिर्ब्रह्मण्यवास्थिता; G1. 3. 6 M5. 6 शांतिर्ब्र(M6 °तिं ब्र)ह्मण्यवास्थिताः; M1. 7 (*inf. lin.*) श्रुतिर्ब्रह्मण्यवस्थिताः. — After 7^{cd}, K6. 7 B6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 (all [except K7 Ds] second time) ins. (with var.) 511*. — ^{e}) D7 T1 G1. 3. 6 हि तावुभाव् (for तावप्यु°). Ś1 K1. 2. 4 एव; B8 (marg.) उक्तौ (for एतौ). — ^{f}) D8 संसृतौ (for the first संश्रितौ). B7 D6 संश्रिताः; Dn1 Ds1 D2. 3. 8 संश्रुतौ (for the second संश्रितौ). K7 D4 संश्रिता (D4 °तो) न च संश्रितः; V1 B0. 6. 8. 9 Da4 D9 Cv संश्रिता न च संश्रिताः; Da3 संभृता न च संभृताः; D5 संसृतौ न च संभृतौ. ❀ Cn: संश्रितौ जपमिति शेषः ॥ Cv: वैदिकसाङ्ख्ययोगौ संश्रिताः । अवैदिकौ न च संश्रिता इति विभागः । ❀

मनःसमाधिरत्रापि तथेन्द्रियजयः स्मृतः ॥ ८
सत्यमग्निपरीचारो विविक्तानां च सेवनम् ।
ध्यानं तपो दमः क्षान्तिरनसूया मिताशनम् ॥ ९
विषयप्रतिसंहारो मितजल्पस्तथा शमः ।
एष प्रवृत्तको धर्मो निवृत्तकमथो शृणु ॥ १०
यथा निवर्तते कर्म जपतो ब्रह्मचारिणः ।
एतत्सर्वमशेषेण यथोक्तं परिवर्जयेत् ।
त्रिविधं मार्गमासाद्य व्यक्ताव्यक्तमनाश्रयम् ॥ ११
कुशोच्चयनिषण्णः सन्कुशहस्तः कुशैः शिखी ।
चीरैः परिवृतस्तस्मिन्मध्ये छन्नः कुशैस्तथा ॥ १२
विषयेभ्यो नमस्कुर्याद्विषयान्न च भावयेत् ।
साम्यमुत्पाद्य मनसो मनस्येव मनो दधत् ॥ १३

C 12 7195
B. 12. 196. 15
K. 12. 194. 16

---

8 Dn4 om. 8. — a) K7 D4.9 T2 M1 संश्रयते (T2 M1 °तो); B6 तु श्रूयते; B7 Da3 च संश्रि(Da3 °श्रु)तो; Da4 च संश्रुतौ; G1 तत्र श्रुतौ (for संश्रूयते). D7 T1 G3 यथा तत्र श्रितो (T1 °तौ) राजन्; M5 तौ यथा संश्रितौ रा°. — b) K6 यत्र (for चात्र). Ś1 K1 त्रिद्यते; K2 वर्तते (for वक्ष्यते). — After 8^{ab}, Kumbh. ed. ins.:

513* क्रमेण चैष विहितो जपयज्ञविधिर्नृप ।
सालम्बनमिति ज्ञेयं जपयज्ञात्मकं शुभम् ।

— c) K7 D9 T G1.3.6 M1.5–7 एवात्र (for अत्रापि). — d) Da3 T1 स्मृताः; G2 स्मृतं. Ds1 तथेंद्रियो जपः स्मृतः.

9 a) Ś1 K6.7 D4 सत्यमग्निपरीवारो; K4 °ग्निमधीचारो. Cp cites परिचारः. — b) K2.4 विवक्तानां; Ds1 विभ°. ❀ Cn: विविक्तानां शुद्धानामाहारादीनामेकान्तदेशानां वा ॥ Cs: विविक्तानां कालदेशानां वा । ❀ — c) Ś1 K1 B8 (marg.) Cp (also cites as in text) दानं (for ध्यानं). G1 M1.5–7 शांतिर् (for क्षान्तिर्).

10 a) Da3.a4 विषयः; Dn4 T2 M6 विषयं. ❀ Cn: प्रतिसंहारो जयः । ❀ — b) T1 G2 मितजल्पं. Ś1 K1.2.4 Ca मिताशनः; Bo.6–9 तथासनं (Bo °नः); G1.3 तथाशनः; G2 तथागमः; G6 तथा यमः (for तथा शमः). — c) D4.9 एवं (for एष). K2.4.6 V1 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 Ds D2–4.6–8 T G3.6 M1.5.7 (*sup. lin.*) प्रवर्तको. K4.6 V1 Bo.7–9 Da3.a4 Dn1.n4 Ds D2.3.5–8 G2.6 M1.6 यज्ञो (for धर्मो). — d) K6 Bo.7.8 (marg.).9 Da3.a4 Dn1.n4 Ds D2.3.5.7.8 T G1.3.6 M1.5.7 निवर्तकम्; Cp निवृत्त° (as in text).

11 a) D7 यदा (for यथा). D5 निर्वर्तते. T1 G1.3.6 यदा (G6 °था) निवर्तको धर्मो. — b) K6 जायते (for जपतो). — After 11^{ab}, Kumbh. ed. ins.:

514* न जपो न च वै ध्यानं नेच्छा न द्वेषहर्षणौ ।
युज्यते नृपशार्दूल सुसंवेद्यं हि तत्किल ।
जपमावर्तयन्नित्यं जपन्वै ब्रह्मचारिकम् ।
तदर्थबुद्ध्या संयाति मनसा जापकः परम् ।
यथा संश्रूयते जापो येन वै जापको भवेत् । [5]
संहिताप्रणवेनैव सावित्री च परा मता ।
यदन्यदुचितं शुद्धं वेदस्मृत्युपपादितम् ।

— Dn4 reads 11^{cd} twice. — c) Dn4 (second time) कोपयज्ञो निवर्तकम्. — d) Dn4 (second time) अथोक्तं. K6 Da3.a4 Dn1.n4 (both times) Ds D2.3.5.7.8 परिवर्तयेत्. — e) K4 त्रिविधे; K6 Bo.6.7.8 (marg. as in text) Da3.a4 G6 Cnp विरतं; K7 Dn1.n4 D2–6.9 T1 Cn निवृत्तं; B9 Ds1 D7.8 T2 G1.3 M5 Cpp द्विविधं; M1 विविधं; M6.7 निवृत्ति- (for त्रिविधं). Ś1 K1.2 आस्थाय (for आसाद्य). — f) K6 अनाश्रमं; Ds T G1–3.6 M1.5–7 अनाम(G2 °त्म)यं (for °श्रयम्). ❀ Cp: यद्वा व्यक्तं सूर्यादिध्यानम् । अव्यक्तं विषयानालम्बनम् । ❀

12 a) Ś1 K1.2.4 कुशेषु यो; T1 G1.3.6 कुशद्वय- (for कुशोच्चय-). T G1.3.6 स्यात् (for सन्). K6 कुशेष्वपनिषण्णः सन् (sic). — b) K1 कुशः (for कुश-). D5.6 कुशेशयः; D7 T G1–3.6 M1.5–7 कुश(D7 °शैः)स्थली (for कुशैः शिखी). K7 D4 कुशहस्तकुशै स्तृतः. — c) B9 चरैः; Da3 Dn1.n4 D2.3.5.6 कुशैः; Da4 भीरैः; D4 वीरैः; D7 चिरैः. K1 परिवृतास्; D6 °वृते. M6 स्वस्मिन् (for तस्मिन्). — d) T2 G1 छिन्नः; G3 छिन्नं. ❀ Ca: मध्ये छन्नः, मध्यभागे कटिप्रदेशे कृतकौपीनादिः । ❀

13 a) Ś1 K1.2 B8 (marg. as in text) मनः कुर्याद् (sic); G2 समं कु° (for नमस्कु°). D5.6 विषयाणां नमस्कृत्वा. ❀ Ca: नमस्कुर्यादिति पाठे तु त्यजेद्दूरत इति लोकोक्तिः । ❀ — b) Ś1 (by corr.) K2.4 नैव; Ca न तु (for न च). — c) D7 स्वास्थ्यम्; G3 धार्ष्ट्यम् (for साम्यम्). K4 om. (hapl.) from च मनसो up to ध्यानमुत्पा (in 15^{a}). K6 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.5–8 T2 G3.6 मनसा. ❀ Cn: साम्यं जीवब्रह्मणोरैक्यम् । ❀ — d) D6 दधे; T2 G1.3.6 M1.5–7 दधेत्.

C. 12. 7166
B. 12. 196. 16
K. 12. 194. 19

तद्धिया ध्यायति ब्रह्म जपन्वै संहितां हिताम् ।
संन्यस्यत्यथ वा तां वै समाधौ पर्यवस्थितः ॥ १४
ध्यानमुत्पादयत्यत्र संहिताबलसंश्रयात् ।
शुद्धात्मा तपसा दान्तो निवृत्तद्वेषकामवान् ॥ १५
अरागमोहो निर्द्वंद्वो न शोचति न सज्जते ।
न कर्ताकरणीयानां न कार्याणामिति स्थितिः ॥ १६
न चाहंकारयोगेन मनः प्रस्थापयेत्क्वचित् ।
न चात्मग्रहणे युक्तो नावमानी न चाक्रियः ॥ १७
ध्यानक्रियापरो युक्तो ध्यानवान्ध्याननिश्चयः ।
ध्याने समाधिमुत्पाद्य तदपि त्यजति क्रमात् ॥ १८
स वै तस्यामवस्थायां सर्वत्यागकृतः सुखी ।
निरीहस्त्यजति प्राणान्ब्राह्मीं संश्रयते तनुम् ॥ १९
अथ वा नेच्छते तत्र ब्रह्मकायनिषेवणम् ।
उत्क्रामति च मार्गस्थो नैव क्वचन जायते ॥ २०

---

14 K_4 om. 14 (cf. v. l. 13). — ^{a}) $Ś_1$ $K_{1.2}$ तद्धियो; K_7 $D_{4.9}$ तद्वै यो; $B_{6.7.8}$ (marg. as in text).$_9$ Da_4 द्वितीये (Da_4 °यं) (for तद्धिया). $D_{5.6}$ $M_{1.5-7}$ तद्ब्रह्म (D_5 °त्तेजो) ध्यायते यो हि; D_7 T $G_{1-3.6}$ ब्रह्म सं(T_1 च)ध्यायते यो हि. — ^{b}) V_1 D_7 T $G_{1.3.6}$ $M_{1.5}$ जपन्वै वेदसंहितां; G_2 °न्वै संहिता हिताः. ❀ Cn: संहितां यथायोग्यं प्रणवगायत्र्यादिरूपाम् । ❀ — ^{c}) D_7 यो हि; T_1 तर्हि (for तां वै). K_7 D_4 संन्यस्यान्यत्र वा तान्वै; D_5 G_2 अथ वा सत्य(G_2 संन्य)संहितां; D_6 अथापि संन्यस्य हि तां; T_2 $G_{1.3.6}$ $M_{1.5.7}$ संन्यस्येदथ वा यो हि ($G_{3.6}$ योगी); M_6 अथ वा संनिपतिता.

15 K_4 om. up to ध्यानमुत्पा (cf. v. l. 13). — ^{a}) G_2 धान्यम् (for ध्यानम्). D_7 T $G_{1.3.6}$ $M_{1.5-7}$ ध्यानमुत्पादयंस्तत्र (G_3 °स्तं तु; G_6 °स्तं नु). — After 15, Kumbh. ed. ins.:

515* अथाभिमतमन्त्रेण प्रणवाद्यं जपेत्कृती ।
यस्मिन्नेवाभिपतितं मनस्तत्र निवेशयेत् ।
समाधौ स हि मन्त्रे तु संहितां वा यथाविधि ।

— ^{c}) D_7 तपसो. G_1 शुद्धांतो मनसा दांतो. — ^{d}) $Ś_1$ $K_{1.2.4}$ -कामकः (for -कामवान्). K_7 $D_{4.5}$ निवृत्तो द्वेषकामतः; D_s $D_{6.7}$ T $G_{1-3.6}$ °त्ताशेषकामवान्.

16 ^{a}) D_7 T_1 $G_{1.3.6}$ अमानमोहो; M_5 अरोष° (for अराग°). — ^{b}) B_7 Ds_1 D_8 युज्यते; T_1 $M_{1.7}$ सज्जति (for सज्जते). $B_{6.8}$ (marg. as in text).$_9$ $Da_{3.a4}$ Ds_2 $D_{5.6}$ न सज्जति न रज्य(B_6 शोच)ति. — ^{c}) K_7 D_9 स (for न). K_6 V_1 $B_{0.6.7.8}$ (marg. as in text) $Dn_{1.n4}$ D_s $D_{2.3.8}$ न कर्ता कारणानां च. — ^{d}) $Ś_1$ G_1 M_5 नाकार्याणाम्; G_6 स का°. ❀ Ca: नकर्ता अकर्ता अकरणीयानां निषिद्धानां कार्याणां, न च कार्याणां काम्यादीनाम् ॥ Cn: कारणानां कर्मणाम्, कार्याणां फलभोगानाम् ॥ Cp: अकरणीयानामिति पाठे निषिद्धानाम् । ❀

17 ^{a}) $M_{1.6.7}$ -दोषेण (for -योगेन). — ^{b}) D_7 मंत्रं (for मनः). K_7 $D_{4-6.9}$ मनः समधिगच्छति. — ^{c}) K_4 $B_{6.7}$ Da_3 $Dn_{1.n4}$ D_s $D_{2.3.7.8}$ चार्थ-; D_4 वात्म-; T $G_{1-3.6}$ $M_{1.5-7}$ चानु- (for चात्म-). K_1 युक्तौ; Da_4 मुक्तो; $D_{5.6}$ शक्तो (for युक्तो). — ^{d}) B_7 damaged. D_4 वाक्रियाः.

18 ^{a}) B_7 क्रियाध्यानपरो युक्तो. — ^{b}) V_1 D_5 ध्यानविद् (for °वान्). ❀ Cp: ध्यानवान् । नित्ययोगे मतुप् (Mahābhāṣya II. p. 393, line 15) । ध्याननिश्चयो ध्यानैकतानः । ❀ — ^{c}) G_2 ध्यानं. — ^{d}) Ds_1 त्यजते.

19 ^{a}) T $G_{1.6}$ M_5 चेत् (for वै). G_2 चैतस्याम् (for वै त°). — ^{b}) M_1 सर्वत्यागी (for °त्याग-). K_6 B_0 $Dn_{1.n4}$ $D_{2.8}$ Cn सुखं. ❀ Cn: सर्वत्यागकृतः निर्बीजसमाधिस्तस्य सुखं प्रत्यगानन्दम् । ❀ — ^{c}) $Ś_1$ निराशस्; $K_{1.2.4.6}$ V_1 $B_{0.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_s $D_{2.3.5.8}$ G_2 Cn निरिच्छ(B_6 Ds_2 °च्छं)स्; $D_{4.9}$ निरिहस्. G_1 नि*स्य त्यजत प्राणान् (sic). — ^{d}) K_1 Dn_4 D_4 T_1 ब्राह्मी; G_1 ब्राह्मं. $K_{6.7}$ V_1 $B_{0.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ $D_{2-6.8.9}$ Cn संविशते (for संश्रयते). ❀ Cp: ब्राह्मीं तनुं चातुर्मुखीम् । कार्यब्रह्मलोकं प्राप्नोतीत्यर्थः । यद्वा हैरण्यगर्भीं तनुं भवान्तरे प्राप्नोति । न तु सद्योमुक्तो भवतीत्यर्थः । ❀ — After 19, Kumbh. ed. ins.:

516* निरालम्बो भवेत्स्मृत्वा मरणाय समाधिमान् ।
सर्वाँल्लोकान्समाक्रम्य क्रमात्प्राप्नोति वै परम् ।

20 ^{a}) K_7 D_9 नैषते; D_4 नेषते; D_7 तिष्ठते (for नेच्छते). — ^{b}) K_7 (before corr.) Ds_1 D_4 ब्रह्मकार्य-; D_7 T_1 G_1 ब्रह्माकार-; G_6 ब्रह्मकायं (for °काय-). Ds_1 -निसेवनं; D_3 -निवेषणं; D_6 -निषेणयं. ❀ Cn: ब्रह्मकायो ब्रह्मस्वरूपसुखम् । ❀ — ^{c}) G_2 उत्क्रामती; $M_{1.6}$ समुत्क्रामति (hypermetric). D_6 मार्गं स (for मार्गस्थो). — ^{d}) B_7 damaged. $D_{5.6}$ न क्षीयति न जायते.

21 ^{a}) B_7 partly damaged. $K_{6.7}$ $B_{0.6.8}$ (marg. as in text).$_9$ Da_3 $Dn_{1.n4}$ D_s $D_{2.3.8}$ Cn आत्मबुद्ध्या

आत्मबुद्धिं समास्थाय शान्तीभूतो निरामयः । अमृतं विरजःशुद्धमात्मानं प्रतिपद्यते ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

१९०

युधिष्ठिर उवाच ।
गतीनामुत्तमा प्राप्तिः कथिता जापकेष्विह ।
एकैवैषा गतिस्तेषामुत यान्त्यपरामपि ॥ १
भीष्म उवाच ।
शृणुष्वावहितो राजञ्जापकानां गतिं विभो ।
यथा गच्छन्ति निरयमनेकं पुरुषर्षभ ॥ २
यथोक्तमेतत्पूर्वं यो नानुतिष्ठति जापकः ।
एकदेशक्रियश्चात्र निरयं स निगच्छति ॥ ३
अवज्ञानेन कुरुते न तुष्यति न शोचति ।
ईदृशो जापको याति निरयं नात्र संशयः ॥ ४

C. 12. 7177
B. 12. 197. 4
K. 12. 195. 4

(for °बुद्धिं). D5.6 आत्मनि ध्यानमास्थाय. ❀ Cn: आत्मबुद्ध्या तत्त्वसाक्षात्कारेण । ❀ — b) Ś1 K1.2.4 V1 ब्रह्मभूतो; K6 Dn1 शांति°; K7 शांतो भूतो; Bo.6.8.9 D4.9 T G1-3.6 M1.5-7 शीती(T1 °तो; G1 °त)-भूतो. D4 निराश्रयः; D6 °मयं. ❀ Cp: निरामयोऽशनायाद्यतीतः । ❀ — c) K7 D4.7.9 T G1.3.6 M1 विरजाः; Cn विरजः- (as in text). Ds1 -शुद्धिम्; G2.3 -शुद्धाम्. ❀ Cn: विरजः, रजोगुणयुक्तं कार्यब्रह्मभावरूपमापेक्षिकममृतम् ...... तदन्यत्, आत्यन्तिकममृतत्वम् ॥ Cp: विरजः त्रिविधपरिच्छेदशून्यम् । यद्वा विरज इति क्लीबलिङ्गनिर्देशोऽलिङ्गत्वद्योतनायात्मनः । ❀ — d) G2 (*sup. lin.* as in text) प्रतिबुध्यते.

80 V1 reads the ref. on marg. — a) K6.7 Bo.6-9 Da3.a4 Dn1.n4 Ds D2.3.5.6.8 M1 विसृष्टं; M5 [अ]तिसृष्टं (for निसृष्टं). K7 D4.5.9 मे (for ते). — b) K7 D4.5.9 जपस्येह (D5 °स्य च) फलं त्वया. — d) K1 सहितां; G1.2 संहितं (for स°). K1.2.4 तदस्त्विति; D7 तदास्त्विह (for तद°).

81 a) Bo D7 द्विजः. — c) Da4 G1 धर्मश्रु(G1 °श्रि)तो; D4.9 धर्मः स्मृतो (for धर्मः श्रुतो). D7 T2 G1-3.6 वापि; T1 चापि (for विप्र). — d) K1 D4 M7 सहेव; G1 तथैव; M1.6 सहैवं (for °व).

82 V1 reads 82 on marg. — a) V1 च (for वा). Bo तुल्यं; Da4 -भौज्ये (for -भोज्यं). K7 D4.9 मया सहै(D4 °दे)व भवतु; D5 मा वा सहायं भवतु. — c) K1.4.6 D8 प्रतीक्ष (for °च्छ). D7 T G1-3.6 कर्म (for धर्मं). — d) D7 T G1-3.6 चेन् (for ते). K7 D4.9 M6 अपह्नवः (M6 °वं); Dn1 अनुग्रहं.

83 a) Ś1 K1.2.4 निकृत- (for विकृत-). K6 Bo.6-9 D6.8 -वेशौ; V1 Da3.a4 Dn1.n4 Ds D2.3 T G1-3.6 M1.5-7 -वेषौ (for -चेष्टौ). — c) K7 D4.9 आवेश्यं (for °ष्ट्य). — d) K1.2.4.6 Da3 Dn1.n4 Ds1 D2.5 कुचैलाव्; Da4 D4 कुवे° (for कुचे°).

84 a) ❀ Cn: प्रार्थना हि राज्ञोऽननुरूपेति तस्य कामो विकृतसंज्ञः । शान्तिस्वभावस्यापि जापकस्य याचितस्यापि दीयमानं न गृह्णातीति राजानं प्रति यः क्रोधः स विरूपसंज्ञः । ❀ — b) D4 वा (for च). — c) K7 V1 B6-9 Da4 D2.4.5.7.9 T G1-3.6 M1.5-7 इहास्तु (for °स्ति). — d) K1 यो (for अयं). T2 राजानुशासनः (for °शासकः).

85 a) D4 सख्यं (for सत्यं). B8 Da4 T G2.3.6 M1.5-7 ब्रवीम्यहमृणं (B8 Da4 °मिति); G1 °मि अनृणं (for °म्यहमिदं). — c) G2 त्वाम् (for त्वम्).

86 a) K6 V1 Bo.6.7.8 (marg. as in text).9 Da3 Dn1.n4 D2.3.5.6.8 सुभृशं तप्तौ (for भृशसंतप्तौ). — c) K4.6 B6.7 Da3 Dn4 Ds1 D2.3.5 परीक्ष्य त्वं; K7 D4.9 °क्ष्यस्व; V1 Bo.8.9 Da4 Dn1 Ds2 D6.8 °क्ष त्वं; D7 T1 G2.3.6 M1.5-7 °क्ष्यौ तु; T2 °क्ष्य तु (for °क्ष्यतां). K4 V1 Bo.6-9 Da3.a4 Dn1.n4 Ds D2-4.6.8.9 G3.6 स्यावो; D5 स्याता; D9 स्यातम्; T1 स्यावां (for स्याव). G1 परीक्ष्यौ यया स्याव (sub-metric). — d) V1 नावाविह; D7 नानामिह; T2 न वा° (for नावा°).

C. 12.7288
B. 12.199.87
K. 12.197.93

परीक्ष्यतां यथा स्वाव नावामिह विगर्हितौ ॥ ८६

विरूप उवाच ।

धारयामि नरव्याघ्र विकृतस्येह गोः फलम् ।
ददतश्च न गृह्णाति विकृतो मे महीपते ॥ ८७

विकृत उवाच ।

न मे धारयते किंचिद्विरूपोऽयं नराधिप ।
मिथ्या ब्रवीत्ययं हि त्वा मिथ्याभासं नराधिप ॥ ८८

राजोवाच ।

विरूप किं धारयते भवानस्य वदस्व मे ।
श्रुत्वा तथा करिष्यामीत्येवं मे धीयते मतिः ॥ ८९

विरूप उवाच ।

शृणुष्वावहितो राजन्यथैतद्धारयाम्यहम् ।
विकृतस्यास्य राजर्षे निखिलेन नरर्षभ ॥ ९०
अनेन धर्मप्राप्त्यर्थं शुभा दत्ता पुरानघ ।
धेनुर्विप्राय राजर्षे तपःस्वाध्यायशीलिने ॥ ९१
तस्याश्चायं मया राजन्फलमभ्येत्य याचितः ।
विकृतेन च मे दत्तं विशुद्धेनान्तरात्मना ॥ ९२
ततो मे सुकृतं कर्म कृतमात्मविशुद्धये ।
गावौ हि कपिले क्रीत्वा वत्सले बहुदोहने ॥ ९३
ते चोञ्छवृत्तये राजन्मया समपवर्जिते ।
यथाविधि यथाश्रद्धं तदस्याहं पुनः प्रभो ॥ ९४
इहाद्य वै गृहीत्वा तत्प्रयच्छे द्विगुणं फलम् ।
एकस्याः पुरुषव्याघ्र कः शुद्धः कोऽत्र दोषवान् ॥ ९५
एवं विवदमानौ स्वस्त्वामिहाभ्यागतौ नृप ।

---

87 B9 om. (hapl.) 87–89. — ^{b}) K4.6.7 V1 B0.8 Da4 Dn4 D2.3.8 T1 G1–3.6 M1 गोफलं; Da3 D9 गौफलं; D4 गाफलं; D6 नोफलं (for गोः फलम्).

88 B9 om. 88 (cf. v. l. 87). Ś1 (*sup. lin.* as in text) विरूप (for विकृत). — ^{b}) M6 विकृतो (for विरूपो). Ś1 K1.2.4 महीपते (for नराधिप). — ^{c}) M6 ब्रवीतु (for °ति). K6.7 V1 B0.6–8 Dn1.n4 Ds1 D2–4.6.8 M6 त्वां (for त्वा). — ^{d}) K1 D4 सत्याभास; G3 सत्त्वात्त्वासं (for मिथ्याभासं). K7 B6–8 Da3.a4 D4.9 नराधमः; D7 T G1–3.6 M1.5–7 जनाधिप (for नरा°).

89 B9 om. 89 (cf. v. l. 87). — ^{a}) K7 विरूपं; M6 °पः. T2 धारयसे; G2 °यत (for °यते). — ^{b}) D7 T G1–3.6 अद्य (for अस्य). K6 V1 B0.7.8 (marg.) Dn1.n4 Ds D2.3.6.8 ब्रवीतु; B6.9 Da3.a4 ब्रवीहि (for वदस्व). — ^{c}) D5 तस्य (for तथा). K6.7 V1 B0.6–8 Da3.a4 Dn1.n4 Ds D2–6.8.9 करिष्येहम् (for °ष्यामि). — ^{d}) M1.5–7 मनः (for मतिः). K6.7 V1 B0.6–8 Da3.a4 Dn1.n4 Ds D2–6.8.9 इति मे धीयते मनः.

90 Da4 विश्वरूप; T1 (also as in text) विकृत (for विरूप). — ^{b}) D5 यदेतद् (for यथै°). — ^{c}) D3 [इ]ह (for [अ]स्य). Ds1 D7 राजर्षेर् (for °र्षे). — K7 om. (hapl.) 90^d–91^c. — ^{d}) K1 नरर्षभः; K6 V1 B0.6–9 Da3.a4 Dn1.n4 Ds D2.3.6.8.9 M5 नराधिप.

91 K7 om. 91^{abc} (cf. v. l. 90). — ^{b}) D7 T1 G1.2 पुरा दत्ता शुभानघ. — ^{d}) B7–9 D7 T1 G1.2.6 -शालिने (for -शीलिने).

92 ^{a}) T2 महाराजन् (for मया राजन्). — ^{b}) Ś1 K1.2 अभ्येति; D6 अध्येति (for अभ्येत्य). V1 याचितं.

93 ^{a}) B8 Da3.a4 D5 M6 तेन (for ततो). — ^{c}) G2 damaged from गावौ up to व (in 93^d). T2 G1 M7 गावो (for गावौ). K6.7 V1 B0.6–9 Da3.a4 Dn1.n4 Ds D2–6.8.9 Cv च (for हि). Ś1 K1.7 कपिलौ (K7 °लो) (for कपिले). K2.6 Ds2 D8 कृत्वा (for क्रीत्वा). — ^{d}) M1 सहदोहने (for बहुदो°). ❀ Cs: वत्सले वत्सवत्यौ । ❀

94 ^{a}) Da4 ते नोंछ-; Ds1 तत्रोंछ-; G1 ते बोंछ- (for ते चोञ्छ-). Dn1 -वृत्तया; D7 -वृत्तयो (for °ये). — ^{b}) Ś1 K1.2.6.7 Dn1 समयवर्जिते (K7 °तौ); K4 B0 सपरि°; D8 M7 समुप°; M1.6 समवि° (M6 °व°) (for समप°). — ^{c}) Ds2 G6 यथाश्राद्धं; D7.9 T1 G1.2 °शुद्धं (for °श्रद्धं). — ^{d}) K1 तदद्याहं; K2.4 तद्यथाहं; T1 तदास्याहं; G1 तदस्यासं; M1.6 °स्याहः (for °स्याहं).

95 ^{a}) K4.6 V1 B0.6–9 Da3.a4 Dn1.n4 Ds D2.3.6–8 T G1–3.6 [ए]व (for वै). D7 T G1–3.6 M1.5–7 प्रयच्छामि (for गृहीत्वा तत्). K4.6.7 V1 B0.6–9 Da3.a4 Dn1.n4 Ds D2–6.8.9 नु (for तत्). — ^{b})

कुरु धर्ममधर्मं वा विनये नौ समाधय ॥ ९६
यदि नेच्छति मे दानं यथा दत्तमनेन वै ।
भवानत्र स्थिरो भूत्वा मार्गे स्थापयतु प्रभुः ॥ ९७

राजोवाच ।

दीयमानं न गृह्णासि ऋणं कस्मात्त्वमद्य वै ।
यथैव तेऽभ्यनुज्ञातं तथा गृह्णीष्व माचिरम् ॥ ९८

विकृत उवाच ।

दीयतामित्यनेनोक्तं ददानीति तथा मया ।
नायं मे धारयत्यत्र गम्यतां यत्र वाञ्छति ॥ ९९

राजोवाच ।

ददतोऽस्य न गृह्णासि विषमं प्रतिभाति मे ।
दण्ड्यो हि त्वं मम मतो नास्त्यत्र खलु संशयः ॥ १००

विकृत उवाच ।

मयास्य दत्तं राजर्षे गृह्णीयां तत्कथं पुनः ।
काममत्रापराधो मे दण्डमाज्ञापय प्रभो ॥ १०१

विरूप उवाच ।

दीयमानं यदि मया नेषिष्यसि कथंचन ।
नियंस्यति त्वा नृपतिरयं धर्मानुशासकः ॥ १०२ C. 12. 7304 B. 12 199. 103 K 12. 197. 105

D6 प्रयच्छ; D7 T G1–3. 6 M1. 5–7 गृहीत्वा (for प्रयच्छे). — c) K4. 6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T G1–3. 6 M5. 7 एवं स्यात्; M1. 6 एतस्य (for एकस्याः). — d) K2 कः श्रद्धः; Ds2 विशुद्धः (for कः शुद्धः).

96 a) K1 D4 T2 विवदमानो (T2 °ना); Ds2 विदमानौ (for विवद°). K6 च; Da4 lacuna; D7 T1 G1–3. 6 तु (for स्वस्). — b) K2 त्वम्; M7 ताम् (for त्वाम्). — c) K1 धर्मंसधर्मं (for °मधर्मं). K4 D8 च (for वा). — d) K7 D9 समये; D8 [अ]विनये (for विनये). K6 B6–9 Dn1. n4 Ds D2–6. 8. 9 समादघ; K7 °दधौ; V1 D7 T G1–3. 6 M1. 5–7 °दधाः (V1 °धः); B0 Da3. a4 °दधे (for °धय).

97 a) Ś1 K1. 2 नेच्छसे; K4 B6. 9 Ds1 D3 (before corr.). 5. 6. 8 नेच्छसि (for °ति). D7 T G1–3. 6 M1. 5–7 वादातुं (for मे दानं). — b) Ds1 वृत्तम् (for दत्तम्). — c) D5 तत्र (for अत्र). Ds2 D5 T1 G1. 2 स्थितो (for स्थिरो). — d) D7 स्थापयितुं; G1 °यति; M5 °यिता (for °यतु). M7 प्रभुं (for प्रभुः). K6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 मार्गौ (Dn1 °र्गौ-) स्थापयिताद्य नौ (D5 नौः).

98 a) Dn4 दीपदानं (for दीयमानं). K1. 4 गृह्णामि; K6 °ति (for °सि). — b) K1 धणं; K4 रणं (for ऋणं). — c) G1 तथैव (for य°). T2 G3. 6 ह्यनु- (for ऽभ्यनु-). Da4 -ज्ञानं (for -ज्ञातं).

99 M7 विकृतं (for °त). — a) K6 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 M1. 6. 7 धारयामीति (for दीयतामिति). — b) K7 Ds2 D4. 9 ददामि (for ददानि). B6 (orig.). 7–9 Da3. a4 तथैव च; B6 (marg.) तदा मया (for तथा मया). — c) G2 नामं (for नायं). Ś1 K1. 2 M1. 7 वै (for मे). Ś1 K1. 2 धारयामि (for °यति). K4. 6 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 अद्य (for अत्र). — d) K4. 6. 7 B0. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 गच्छतां (for गम्यतां). Ś1 K1. 2 वांच्छसि (for °ति).

100 a) G2 (also as in text) M1. 6 गृह्णाति (for °सि). — b) D5 विषयं (for °मं). D6 T2 प्रतिभासि (T2 °मि) (for °भाति). T2 ते; M1. 5–7 मा (for मे). — c) Dn4 दंभो; D7 T G2. 3. 6 दस्यो; G1 दंडो (for दण्ड्यो). G2 स्वा (for त्वं).

101 T1 om. (hapl.) 101–102. — b) D7 G1 M1. 5. 6 गृह्णीयात् (for °यां). B6 (marg. as in text) ते (for तत्). — c) K2. 7 Ds1 D4. 7. 9 T2 G1–3. 6 M6 को (K2 का) ममात्र. K7 D4. 9 वै (for मे).

102 T1 om. 102 (cf. v. l. 101). — a) Dn4 दीपमानं; T2 दीय्य° (for दीय°). — b) K7 D4. 9 T2 G3. 6 M1. 5–7 न गृह्णासि; B6 Da4 D8 नैषिष्यसि; Dn1 Ds2 नेशिष्यासि; Ds1 नेच्छिष्यसि; D5 त्वं नेच्छसि; D7 G1. 2 गृह्णासि त्वं (for नेषिष्यसि). — c) K1. 7 नियस्यं(K1 °स्य)ति; Ds1 नियम्यति; D7 T2 G1–3. 6 नियच्छति (for नियंस्यति). K4. 6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2–9 G1–3. 6 M6 त्वां (for त्वा).

103 a) T2 G1 त्वं; G2 स्वयं (hypermetric) (for त्वं). K7 D4. 9 T1 G3. 6 स्वयं मया याचितेन; D5 यन्मया याचितेनैतद्; D7 स्वधर्मेया याचितेन. ❀ Cv: अयाचितेनेति पदच्छेदः । ❀ — b) G1. 2 इव (for इह). K4 तं (for तत्). — c) G1 M7 गृह्णीयाद् (for °यां). — d) K4. 6. 7 V1 B7. 8 Da4 Ds D2–7. 9 T G1–3. 6

C. 12. 7305
B. 12. 139. 104
K. 12. 197. 110

विकृत उवाच ।

स्वं मया याचितेनेह दत्तं कथमिहाद्य तत् ।
गृह्णीयां गच्छतु भवानभ्यनुज्ञां ददानि ते ॥ १०३

ब्राह्मण उवाच ।

श्रुतमेतत्त्वया राजन्ननयोः कथितं द्वयोः ।
प्रतिज्ञातं मया यत्ते तद्गृहाणाविचारितम् ॥ १०४

राजोवाच ।

प्रस्तुतं सुमहत्कार्यमावयोर्गह्वरं यथा ।
जापकस्य दृढीकारः कथमेतद्भविष्यति ॥ १०५
यदि तावन्न गृह्णामि ब्राह्मणेनापवर्जितम् ।
कथं न लिप्येयमहं दोषेण महताद्य वै ॥ १०६

भीष्म उवाच ।

तौ चोवाच स राजर्षिः कृतकार्यौ गमिष्यथः ।
नेदानीं मामिहासाद्य राजधर्मो भवेन्मृषा ॥ १०७
स्वधर्मः परिपाल्यश्च राज्ञामेष विनिश्चयः ।
विप्रधर्मश्च सुगुरुर्मामनात्मानमाविशत् ॥ १०८

ब्राह्मण उवाच ।

गृहाण धारयेऽहं ते याचितं ते श्रुतं मया ।
न चेद्ग्रहीष्यसे राजञ्शपिष्ये त्वां न संशयः ॥ १०९

राजोवाच ।

धिग्राजधर्मं यस्यायं कार्यस्येह विनिश्चयः ।
इत्यर्थं मे ग्रहीतव्यं कथं तुल्यं भवेदिति ॥ ११०

M5 ददामि (for °नि).

104 ^{a}) K7 श्रुत्वा (for श्रुतम्). T1 श्रुत्वैव तत् (for श्रुतमेतत्). V1 मया (for त्वया). —^{b}) B8 एतयोः (for अनयोः). G3. 6 त्वया (for द्वयोः). —^{c}) K7 प्रतिज्ञा तु; D9 °ज्ञानं (for °ज्ञातं). K2 यत्तं; K7 तत्ते; D7 T G1–3. 6 दत्तं (for यत्ते). —^{d}) M6 तं (for तद्). K7 अविचारितां.

105 ^{a}) K7 D4. 9 न प्रस्तुतं; D5 G6 प्रस्तुतस्तु (G6 °तः सु-); G2 प्रस्थितं सु- (for प्रस्तुतं सु-). —^{b}) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T G1–3. 6 M1. 5–7 अनयोर् (for आव°). Da4 दुष्करं; T2 गहरं (for गह्वरं). D5 तथा (for यथा). —^{c}) Ds1 D4. 9 द्रढीकारः; G3. 6 M7 दृढीकारं (for °कारः).

106 ^{a}) B9 नु (for न). K2 D5 गृह्णासि (for °मि). —^{b}) D7 T G1–3. 6 M1. 5–7 जापकेन (for ब्राह्मणेन). B9 [अ]पि (for [अ]प-). Ś1 K1. 2. 4 ब्राह्मणस्य तपोर्जितं; K7 ब्राह्मणे जपवर्जितं. —^{c}) G3. 6 कथं न लिप्यते योऽहं; M6 कथं कथं न लिप्येत. —^{d}) Da3. a4 Dn1. n4 D2. 5 पापेन (for दोषेण).

107 ^{a}) G1 तव (for तौ च). B9 च (for स). K1. 2 राजर्षि- (for °र्षिः). —^{b}) K1 -कृतकार्यैं; K2. 4 मतकार्यौ; Da4 Ds1 कृतकार्यो (for °कार्यौ). Ś1 K1. 2. 4 भविष्यथः; Da4 Ds2 M1. 6. 7 गमिष्यथ (for °ष्यथः). — Before 107^{cd}, M5 ins. राजा. —^{d}) Da4 lacuna for राजधर्मो.

108 ^{a}) K4 परिपाल्याश्च (for °पाल्यश्च). K6 V1 Bo. 6. 7. 9 Dn1. n4 Ds D2. 3. 6. 8 तु (for च). —^{b}) K6 रक्षामि (for राज्ञाम्). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T G1–3. 6 M1. 5–7 इति (for एष). —^{c}) D7 T1 G1. 2 विप्रबंधुश्च (for °धर्मश्च). K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 गहनो; D5 स पुरुर्; D7 G1. 2 M6 स गुरुर् (for सुगुरुर्). —^{d}) Ś1 K1. 2. 4 न ममात्मानम् (for मामना°). Ś1 K1. 2. 7 D4. 5. 9 T2 M1. 5. 6 आविशेत् (for °शत्).

109 ^{a}) D7 T1 G1–3. 6 M5 यत्; T2 यं (for ऽहं). K6 Bo. 6 (marg. as in text). 7–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 च (for ते). —^{b}) T2 याचितः (for °तं). K1 तं श्रुतं; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T2 G3. 6 M1. 5–7 संश्रुतं; K7 T1 स श्रुतं; G1. 2 संश्रितं (for ते श्रुतं). —^{c}) Ś1 K1. 2. 4 V1 Bo. 6–9 D3. 9 T2 M7 गृहीष्यसे; Da3 Ds D5 ग्र(Ds2 D5 गृ)हिष्यसे; G1 ग्रहीष्यते (for °ष्यसे). —^{d}) K7 D4. 5. 9 शप्स्यामि; Da3. a4 शपेयं; D6 शपेष्यं; D8 शापिष्ये (for श°). K6 त्वं; T2 G3. 6 त्वा (for त्वां). V1 Ds1 असंशयः (Ds1 °यं) (for न संशयः).

110 K1 om. the ref. —^{a}) Ds2 यस्याहं; D6 पश्यायं (for यस्यायं). —^{b}) D7 T G1–3. 6 M5 [अ]स्य; M1. 6 [ए]ष (for [इ]ह). G3 विनिश्चयं. —^{c}) K7 V1 Bo. 6. 7. 9 Da4 Dn1 Ds D3–5. 7 T G2. 3. 6 M7 गृहीतव्यं (for ग्रही°). —^{d}) D7 T G2. 3. 6 तथ्यं; G1 तस्यं; M5 तत्सं- (for तुल्यं).

111 ^{a}) Ś1 K2 न पूर्वं; K1 अपूर्वंतो; K4. 6 V1 Bo. 7–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 अपूर्वं मे; D7 T G1.

एष पाणिरपूर्वं भो निक्षेपार्थं प्रसारितः ।
यन्मे धारयसे विप्र तदिदानीं प्रदीयताम् ॥ १११

ब्राह्मण उवाच ।

संहितां जपता यावान्मया कश्चिद्गुणः कृतः ।
तत्सर्वं प्रतिगृह्णीष्व यदि किंचिदिहास्ति मे ॥ ११२

राजोवाच ।

जलमेतन्निपतितं मम पाणौ द्विजोत्तम ।
सममस्तु सहैवास्तु प्रतिगृह्णातु वै भवान् ॥ ११३

विरूप उवाच ।

कामक्रोधौ विद्धि नौ त्वमावाभ्यां कारितो भवान् ।
समेति च यदुक्तं ते समा लोकास्तवास्य च ॥ ११४
नायं धारयते किंचिज्जिज्ञासा त्वत्कृते कृता ।
कालो धर्मस्तथा मृत्युः कामक्रोधौ तथा युवाम् ॥ ११५
सर्वमन्योन्यनिकषे निघृष्टं पश्यतस्तव ।
गच्छ लोकाञ्जितान्स्वेन कर्मणा यत्र वाञ्छसि ॥ ११६

भीष्म उवाच ।

जापकानां फलावाप्तिर्मया ते संप्रकीर्तिता ।
गतिः स्थानं च लोकाश्च जापकेन यथा जिताः ॥ ११७
प्रयाति संहिताध्यायी ब्रह्माणं परमेष्ठिनम् ।
अथ वाग्निं समायाति सूर्यमाविशतेऽपि वा ॥ ११८ C. 12. 7320 B. 12. 199. 119 K. 12. 197. 120

---

8. 6 अपूर्वां भो ; G2 °वां गो- ; Cp °वं भो (as in text). ❀ Cp : अपूर्वमिति नञर्थेऽकारः । ❀ — b) G2 प्रसारितं. ❀ Cn : निक्षेपार्थं प्रतिगृह्य प्रदानार्थम् ॥ Cs : निक्षेपार्थं फलभोगं विना स्थापनार्थम् । ❀ — c) K1 यं (for यन्). — d) M1 तम् (for तद्).

112 a) K1 सहितां (for संहितां). K1. 2. 4. 6. 7 D8 G3. 6 जपतां ; T2 जपतो ; G1 जापता (for ज°) K7 D4. 7. 9 M7 यावत् (for यावान्). — b) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2 3. 6. 8 T G1–3. 6 M5. 7 गुणः कश्चित्कृतो मया ; K7 D4. 9 पुण्यं किंचिन्मया कृतं ; D5. 7 M1. 6 गुणः कश्चिन्मया कृतः. — c) D7 G1 -गृह्णीयाद् ; T1 G2. 3. 6 °या (for °ष्व). — d) G1 इति (for यदि). G1 M6 कश्चिद् (for किंचिद्).

113 K7 om. (hapl.) from 113a up to the ref. in 114. — a) K2. 4 जपम् ; K6 वलम् (for जलम्). K1 निपतति (for °तितं). — b) K1 सम- (for मम). — c) K1. 2 समयस्तु (for सममस्तु). B6 9 सहैवावां (for °वास्तु). — d) D4. 5. 7. 9 T G1–3. 6 M1. 5–7 मे (for वै).

114 K7 om. the ref. (cf. v. l. 113). — b) K7 om. आवाभ्यां. K7 [आ]कारितो ; Da4 कारितौ. — After 114ab, Cv Kumbh. ed. ins. :

526* जिज्ञासमानौ युवयोर्मनोत्थं तु द्विजोत्तम ।
[Cv मनोच्छं (for °त्थं).]

— c) K4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T G1–3. 6 M1. 5–7 सहेति (for समेति). — d) Ś1 K3 D4 समालोकस् ; D7 T G1–3 M1. 5–7 समो लोकस् ; G6 सतो लोकस् (for समा लोकास्). Ś1 K1. 2. 4 तवापि (for तवास्य).

115 b) K2 मया ; K6 कृतां ; Ds1 कृतं (for कृता). — d) Da4 कालक्रोधा ; D7 T1 G1. 2 कामक्रोधस् (for °क्रोधौ).

116 a) K4. 6 Bo. 6–9 Da3. a4 Dn1 Ds D2. 3. 5–8 T2 G3. 6 Cp -निष्कर्षे ; K7 -निःकषे ; V1 T1 -निकर्षे ; Dn4 -विप्रर्षे ; T2 (sup. lin.) -निष्कर्ये ; Cpp -निकषे (as in text). — b) Da4 निघृतं ; D5 निर्घृष्टं ; T2 निष्कृष्टं ; G1. 2 M1. 5–7 Kumbh. ed. निकृष्टं ; Cn. p निघृष्टं (as in text). ❀ Cn : निघृष्टं परीक्षितम् । ❀ — After 116ab, Kumbh. ed. ins. :

527* सर्वेषामुपरि स्थानं ब्रह्मणोऽव्यक्तजन्मनः ।
युवयोः स्थानमतुलं निर्द्वंद्वममलात्मकम् ।
सर्वे गच्छाम यत्र स्वान्स्वाल्लँलोकांश्च तथा वयम् ।

— d) G1 वांछति. — After 116, Kumbh. ed. ins. :

528* ततो धर्मयमाद्यास्ते वाक्यमूचुर्नृपद्विजौ ।
अस्माकं यः स्मृतो मूर्धा ब्रह्मलोकमिति स्मृतम् ।
तत्रस्थौ हि भवन्तौ हि युवाभ्यां निर्जिता वयम् ।
युवयोः काम आपन्नस्तत्काम्यमविशङ्कया ।

117 b) Da4 मीयते (for मया ते). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6–8 T G1–3. 6 M5. 7 संप्रदर्शिता (for °कीर्तिता). — c) K1 G1 गति- (for गतिः). Dn4 Ds D8 लोकेस्मिन् (for लोकाश्च). — d) K1. 2. 4 T2 M6 यथार्जिताः ; D8 यथा जिता.

118 a) K1 संहिताध्यायी ; G1 °तां ध्यायन् (for °ताध्यायी). — b) D6 ब्रह्मणं ; D6 T1 (before corr.)

C. 12. 7321
B. 12. 199. 120
K. 12. 197. 130

स तैजसेन भावेन यदि तत्राश्नुते रतिम्।
गुणांस्तेषां समादत्ते रागेण प्रतिमोहितः॥ ११९
एवं सोमे तथा वायौ भूम्याकाशशरीरगः।
सरागस्तत्र वसति गुणांस्तेषां समाचरन्॥ १२०
अथ तत्र विरागी स गच्छति त्वथ संशयम्।
परमव्ययमिच्छन्स तमेवाविशते पुनः॥ १२१
अमृताच्चामृतं प्राप्तः शीतीभूतो निरात्मवान्।
ब्रह्मभूतः स निर्द्वंद्वः सुखी शान्तो निरामयः॥ १२२
ब्रह्मस्थानमनावर्तमेकमक्षरसंज्ञकम्।
अदुःखमजरं शान्तं स्थानं तत्प्रतिपद्यते॥ १२३
चतुर्भिर्लक्षणैर्हीनं तथा षड्भिः सषोडशैः।
पुरुषं समतिक्रम्य आकाशं प्रतिपद्यते॥ १२४
अथ वेच्छति रागात्मा सर्वं तदधितिष्ठति।
यच्च प्रार्थयते तच्च मनसा प्रतिपद्यते॥ १२५

ब्राह्मणं (for ब्रह्माणं). —^{c}) M$_{7}$ चाग्निः (for वाग्नि). D$_{7}$ G$_{1.2}$ समाधाय (for समायाति). —^{d}) M$_{7}$ पूर्वम् (for सूर्यम्). Ś$_{1}$ K$_{2.4}$ [ऽ]पि च; K$_{1}$ lacuna; T$_{2}$ [ऽ]थ वा; M$_{1.6}$ [ऽ]ति वा (for ऽपि वा). K$_{7}$ D$_{4.5.9}$ सूर्यमभ्येति वा नृप.

119 ^{a}) B$_{9}$ D$_{4}$ तेजसेन (for तै°). —^{b}) Ś$_{1}$ K$_{1.2.4}$ रविः; G$_{3.6}$ रतिः (for रतिम्). K$_{6}$ V$_{1}$ B$_{0.6.7.8}$ (marg. as in text) 9 D$_{a3.a4}$ D$_{n1.n4}$ D$_{s}$ D$_{2.3.5.6.8}$ यदि तत्र रम(V$_{1}$ भव)त्युत. —^{c}) K$_{1}$ D$_{n1}$ D$_{4}$ गुणास् (for गुणांस्). K$_{6}$ B$_{0.6}$ (marg.; orig. as in text).7.9 D$_{a3.a4}$ D$_{n1.n4}$ D$_{s}$ D$_{2.3.5.6.8.9}$ G$_{1}$ समाधत्ते (for °दत्ते). —^{d}) K$_{2.7}$ प्रतिमोहिताः.

120 ^{b}) K$_{1}$ भूताकाश- (for भूम्या°). K$_{2.4}$ -शरीरगाः. —^{c}) G$_{1}$ सगरस् (for सरागस्). —^{d}) K$_{1}$ B$_{6-9}$ D$_{5}$ समाचरेत्; K$_{7}$ D$_{4.7.9}$ T G$_{1-3.6}$ M$_{1.5-7}$ समादद(T °ध)त् (for °चरन्).

121 ^{a}) D$_{5}$ विरागः (for °गी). D$_{s2}$ सन्; D$_{7}$ T G$_{1-3.6}$ च; D$_{8}$ lacuna (for स). —^{b}) M$_{1.5.6}$ संशमं (for संशयम्). K$_{6}$ गच्छति त्वव्ययसंशयं; D$_{5.8}$ परं गच्छत्य(D$_{8}$ °ति)संशयं; M$_{7}$ गच्छेत्तत्त्वमसं°. —^{c}) K$_{6}$ D$_{a4}$ यदमव्ययम्; B$_{0.8}$ D$_{s1}$ D$_{3.6.8}$ पदम° (for परम°). Ś$_{1}$ K$_{1.2.4}$ इच्छेत्स; B$_{8.9}$ इच्छंत्यस् (for इच्छन्स).

122 ^{a}) K$_{1}$ T$_{2}$ अमृताश्च; K$_{2.7}$ °तश्च (for °ताच्). D$_{6}$ त्वमृतं; M$_{1}$ च मृतः (for चामृतं). —^{b}) K$_{4.6}$ B$_{8}$ D$_{n1.n4}$ D$_{s}$ D$_{2.3.5.6}$ शांतीभूतो; K$_{7}$ D$_{8}$ शांति°; D$_{a4}$ G$_{2}$ शीति°; D$_{7}$ शांत°; G$_{1}$ शीत° (for शीती°). ❀ Cs: निरात्मवान् शरीरहीनः। ❀ —^{c}) K$_{6}$ प्रत्यग्भूतः; D$_{a4}$ ब्रह्मभूताः. —^{d}) ❀ Cn: निरामयः द्वैतदर्शन हीनः। ❀

123 ^{a}) K$_{6.7}$ V$_{1}$ B$_{0.6-9}$ D$_{a3}$ D$_{s}$ D$_{3.4.7-9}$ T G$_{2.3.6}$ M$_{6-7}$ ब्राह्मं; D$_{5}$ ब्रह्मं (for ब्रह्म-). K$_{7}$ D$_{4.9}$ मनावर्त्यम्; G$_{3}$ °वृत्तम् (for °वर्तम्). —^{b}) T$_{2}$ G$_{1}$ -संज्ञिकं; M$_{5}$ -संज्ञितं (for -संज्ञकम्). B$_{6}$ (marg. as in text) एकाक्षरमसंज्ञितं. —^{c}) T$_{1}$ G$_{2}$ अरजः (for अजरं). —^{d}) K$_{1}$ स्थाने तत्; K$_{7}$ D$_{4.9}$ ध्यानेन; T$_{1}$ G$_{1-3.6}$ M$_{1.5}$ शीतं तत्; T$_{2}$ गीतं तत्; M$_{6.7}$ शिवं तत् (for स्थानं तत्). B$_{7}$ प्रतिपाद्यते (for °पद्यते).

124 K$_{1}$ D$_{6}$ om. (hapl.) 124; D$_{8}$ om. (hapl.) 124–125. V$_{1}$ reads 124 on marg. —^{a}) Ś$_{1}$ K$_{2}$ हीनस्; M$_{1.6}$ भिन्नं (for हीनं). ❀ Cn: चतुर्भिः प्रत्यक्षागमानुमानचेतोभिर्हीनं रूपगुणसंबन्धजडत्वादिभिर्विरहितम्। Cs: चतुर्भिर्लक्षणैरिति। उत्पत्तिक्षयवृद्धिविनाशैः। जरायुजाण्डजस्वेदजोद्भिज्जैरित्यपरे। यद्वा संकल्पालोचनप्रयत्नचेष्टारूपैर्वा॥ Cv: चतुर्भिरण्डजस्वेदजोद्भिज्जजरायुजाख्यैः। ❀ —^{b}) D$_{7}$ G$_{1.2}$ साद्भिः (for षड्भिः). V$_{1}$ D$_{5}$ च (for स-). K$_{2}$ -शोडकैः (for -षोडशैः). ❀ Cn: षड्भिरूर्मिभिः। अशनापिपासाभ्यां प्राणधर्माभ्यां शोकमोहाभ्यां चित्तधर्माभ्यां जरामृत्युभ्यां देहधर्माभ्यां च हीनम्। अत एव प्राणाद्यात्मकषोडशकगणेनैव तेऽशनादयः सहिताः॥ Cs: सषोडशैः। एकादशेन्द्रियाणि पञ्च विषया इति षोडश विकारास्तत्सहितः। स्थूलसूक्ष्मव्यवहितविप्रकृष्टातीतानागतवर्तमानाभावालोचनसंकल्पाभिमानाध्यवसायसृष्ट्यनुग्रहप्रलयविषयस्य सहितैरित्यन्ये॥ Cv: षोडशैः, एकादशेन्द्रियपञ्चभूतात्मकषोडशकलासहितैः। षड्भिः कामक्रोधादिभिः। ❀ —^{c}) K$_{4}$ D$_{a3}$ D$_{n1.n4}$ D$_{s1}$ D$_{2.3.5}$ तमति(D$_{5}$ °धि)क्रम्य (for सम°). —^{d}) Ś$_{1}$ K$_{2}$ चाकाशं; T$_{2}$ M$_{5}$ ह्याकाशं (for आ°). ❀ Cs: आकाशं परिच्छिन्नानामवकाशदानात् आकाशं परमात्मानम्॥ Cv: आ समन्तात् काशनादाकाशपदवाच्यं परमात्मानम्। ❀

125 D$_{8}$ om. 125 (cf. v. l. 124). —^{a}) K$_{1.2.4.6}$ V$_{1}$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_{s}$ D$_{2.3.5.6}$ M$_{1}$ नेच्छति; K$_{7}$ G$_{3.6}$ चेच्छसि; D$_{4.9}$ M$_{5}$ चेच्छति; D$_{7}$ T$_{1}$ G$_{1.2}$ वेच्छामि; M$_{7}$ नेच्छामि (for वेच्छति). —^{c}) K$_{1}$ यश्च; D$_{5}$ यत्तत् (for यच्च).

126 ^{ab}) K$_{4.6}$ B$_{0.6}$ D$_{a3}$ D$_{n4}$ D$_{2.3.5.6.8}$ चेक्षते;

अथ वा वीक्षते लोकान्सर्वान्निरयसंस्थितान् ।
निःस्पृहः सर्वतो मुक्तस्तत्रैव रमते सुखी ॥ १२६

एवमेषा महाराज जापकस्य गतिर्यथा ।
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥ १२७

इति श्रीमहाभारते शान्तिपर्वणि द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥

१९३

युधिष्ठिर उवाच ।

किमुत्तरं तदा तौ स्म चक्रतुस्तेन भाषिते ।
ब्राह्मणो वाथ वा राजा तन्मे ब्रूहि पितामह ॥ १
अथ वा तौ गतौ तत्र यदेतत्कीर्तितं त्वया ।
संवादो वा तयोः कोऽभूत्किं वा तौ तत्र चक्रतुः ॥ २

भीष्म उवाच ।

तथेत्येवं प्रतिश्रुत्य धर्मं संपूज्य चाभिभो ।
यमं कालं च मृत्युं च स्वर्गं संपूज्य चार्हतः ॥ ३
पूर्वं ये चापरे तत्र समेता ब्राह्मणर्षभाः ।
सर्वान्संपूज्य शिरसा राजानं सोऽब्रवीद्वचः ॥ ४ C. 12 7333 B. 12. 200. 4 K. 12. 198. 4

K7 D4.9 [अ]पेक्षते; V1 B7-9 Da4 D8 [अ]वेक्षते; Dn1 चक्षते; D7 T G1-3.6 M1.5-7 [उ]पेक्ष(D7 T1 °क्ष्य)ते (for वीक्षते). Ś1 K1.2 transp. लोकान् and सर्वान्. Ś1 K1.2 नियम- (for निरय-). K4.6 V1 Bo.6-9 Da3.a4 Dn1.n4 D8 D2.3.6-8 T G1-3.6 M1.6 -संज्ञितान्; D5 M5.7 -संज्ञकान् (for -संस्थितान्). — c) Bo Da4 युक्तस् (for मुक्तस्). — d) K4.6 V1 Bo.6-9 Da3.a4 Dn1.n4 D8 D2.3.6.8 वै (for [ए]व). K6 Bo Dn1.n4 D8 D2.3.5-8 T2 सुखं (for सुखी).

127 Before 126, M5 ins. भीष्मः. — a) V1 B6 (marg.).8.9 Ds1 एष; B6 (orig.) एतन्; Da3.a4 एव; G2 एषां (for एषा). D7 T1 G1.2 महाभाग (for °राज). — b) T2 जापकानां (for °कस्य). B6.7.8 (marg. as in text).9 Da3 (marg.).a4 जापको वर्तते य(Da3.a4 त)था; D5 यथा भवति जापकः. — c) K7 V1 Bo.6-9 Da4 D8 D4.9 T2 G1 M1.5-7 तत्ते सर्वं समाख्यातं; D5 तत्सर्वं ते समा°; D7 T1 G2.3.6 तत्तत्सर्वं समा°. — d) K6 Da3.a4 Dn4 D82 D2.3.6.8 अर्हसि (K6 °ति) (for इच्छसि).

Colophon. — *Sub-parvan:* Ś1 K1.2.4.6.7 V1 Bo.6-9 Da3.a4 Dn1.n4 D8 D2-9 T G1-3.6 M1.5-7 मोक्षधर्म. — *Adhy. name:* Ś1 K2.4.6.7 Bo.6-9 Da3.a4 Dn1 D8 D2-6.8.9 जापकोपाख्यानं; V1 जापकमाहात्म्यं; M1.6 जापकोपाख्याने इक्ष्वाकुब्राह्मणसंवादः; M5 जापकोपाख्याने कालमृत्युयमादिसंवादः; M7 इक्ष्वाकुब्राह्मणसंवादः. — *Adhy. no.* (figures, words or both): B7 Dn4 D8 D7 T1 G1.3.6 M1.5-7 25; Dn1 26; D2.8 26; T2 G2 39. — *Śloka no.:* Da4 130; Dn1 29; Dn4 129; D8 127.

193

1 a) D4 सदा; M5 ततस् (for तदा). G3.6 तस्मिंश् (for तौ स्म). — b) K6 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 D8 D2.3.5.6.8 तस्य (for तेन). Ś1 K1.2.6.7 D4.9 भाषितं; D7 T G1.3.6 M1.5-7 भाषितौ. — c) K6 Bo.6-9 Da3.a4 D8 D3-9 T1 G2.3.6 M5.7 transp. the second वा and राजा.

2 a) M5 वैतौ (for वा तौ). G3.6 यत्र (for तत्र). — b) G3 तद् (for यद्).

3 a) Da4 अथ (for तथा). Ś1 K1.2.7 M5 [इ]त्येव; D7 T1 G1-3.6 [इ]ति च; T2 [इ]त्येतत् (for [इ]त्येवं). — b) K1 संपूज्यतामिमौ. K4 च विभो; K6 वै प्रभो; K7 D4.9 जापकः; V1 Bo.6-9 Da3.a4 Dn1.n4 D8 D2.3.5.6.8 च प्रभो; D7 T G1-3.6 M1.5-7 तावुभौ (for चाभिभो). — d) K1 [अ]र्हताः; K7 D4.9 [अ]प्रतः; D7 T G1-3.6 M5 [आ]हतुः (for [अ]र्हतः). ❀ Cn. v: अर्हतः पूज्यान् । ❀

4 Before 4, G3.6 ins. ब्राह्मणः. — a) Ś1 K1.2 सर्वे; K4 सर्वं (for पूर्वं). K6 वापरे; K7 च परे; M1 चामरे (for चापरे). — b) K4 D4.7 ब्राह्मणर्षभः (K7 °भ). — c) G1 पूर्वान् (for सर्वान्). B8 मनसा (for शिरसा). — d) K6 V1 Bo.6-9 Da3.a4 Dn1.n4 D8 D2.3.5.6.8 M1.6 द्विजः (for वचः).

C.12.7334
B.12.200.5
K.12.198.5

फलेनानेन संयुक्तो राजर्षे गच्छ पुण्यताम् ।
भवता चाभ्यनुज्ञातो जपेयं भूय एव हि ॥ ५
वरश्च मम पूर्वं हि देव्या दत्तो महाबल ।
श्रद्धा ते जपतो नित्यं भवितेति विशां पते ॥ ६
राजोवाच ।
यद्येवमफला सिद्धिः श्रद्धा च जपितुं तव ।
गच्छ विप्र मया सार्धं जापकं फलमाप्नुहि ॥ ७
ब्राह्मण उवाच ।
कृतः प्रयत्नः सुमहान्सर्वेषां संनिधाविह ।
सह तुल्यफलौ चावां गच्छावो यत्र नौ गतिः ॥ ८

भीष्म उवाच ।
व्यवसायं तयोस्तत्र विदित्वा त्रिदशेश्वरः ।
सह देवैरुपययौ लोकपालैस्तथैव च ॥ ९
साध्या विश्वेऽथ मरुतो ज्योतींषि सुमहान्ति च ।
नद्यः शैलाः समुद्राश्च तीर्थानि विविधानि च ॥ १०
तपांसि संयोगविधिर्वेदाः स्तोभाः सरस्वती ।
नारदः पर्वतश्चैव विश्वावसुर्हहा हुहूः ॥ ११
गन्धर्वश्चित्रसेनश्च परिवारगणैर्युतः ।
नागाः सिद्धाश्च मुनयो देवदेवः प्रजापतिः ।
विष्णुः सहस्रशीर्षश्च देवोऽचिन्त्यः समागमत् ॥ १२

---

5 Before 5, T ins. ब्राह्मणः. — ^{b}) M$_5$ राजन्मे (for राजर्षे). K$_6$ V$_1$ Bo.6–9 Da$_{3.a4}$ Dn$_{1.n4}$ D$_8$ D$_{2.3.5-8}$ T G$_{1-3.6}$ M$_{1.5-7}$ मुख्यतां; K$_7$ पुण्यवान् (for °ताम्). — ^{c}) D$_2$ lacuna; D$_5$ वा; D$_6$ तु (for च). Ś$_1$ K$_{1.2.4}$ [अ]भ्यवज्ञातो. — ^{d}) K$_6$ B$_{7.8}$ Dn$_{1.n4}$ D$_8$ D$_{2.3.6.8}$ ह; D$_7$ T G$_{1-3.6}$ M$_{1.6.7}$ च (for (for हि).

6 ^{a}) K$_1$ समपूर्वं (for मम पूर्वं). — ^{b}) K$_6$ Bo.6–9 Da$_{3.a4}$ Dn$_{1.n4}$ D$_8$ D$_{2.3.5-8}$ T G$_{1-3.6}$ M$_{1.5-7}$ transp. देव्या and दत्तो. K$_6$ M$_1$ महाबलः; K$_7$ D$_{4.7.9}$ T$_1$ G$_{1-3.6}$ M$_{5.7}$ °फलः; T$_2$ °फलं (for °बल). — ^{c}) K$_7$ जायते (for जपतो). — ^{d}) K$_{2.4}$ भवता; K$_6$ V$_1$ Bo.6–9 Da$_{3.a4}$ Dn$_{1.n4}$ D$_8$ D$_{2.3.5.6.8}$ भवतु; K$_7$ D$_{4.7.9}$ T G$_{1-3.6}$ M$_{1.6.7}$ भवित्री; M$_5$ भवति (for भविता as in Ś$_1$ K$_1$ only).

7 ^{a}) K$_{1.4}$ Da$_3$ यद्येव; D$_4$ यदेवम्. K$_{1.4}$ Da$_3$ D$_7$ T$_1$ G$_{1.3-6}$ M$_{1.5-7}$ सफला (for अफला). ❀ Ca: अफला अनाकाङ्क्षितफला। ❀ — ^{b}) M$_{1.6.7}$ वा (for च). B$_7$ जपितं; T$_2$ जपितुम्. K$_7$ स च (for तव). — ^{d}) D$_7$ T G$_{1-3.6}$ M$_{6.7}$ मामकं (for जापकं).

8 Ś$_1$ K$_{1.2}$ om. the ref. — ^{a}) K$_6$ D$_7$ T$_1$ G$_2$ कृत-; T$_2$ कृतं. Ś$_1$ K$_{1.2}$ सुमते; D$_7$ T$_1$ स महान् (for सुम°). — ^{b}) G$_2$ lacuna for सर्वेषां. D$_7$ T G$_{3.5.6}$ अपि (for इह). — ^{c}) K$_7$ सत्य-; V$_1$ सम- (for सह). K$_{6.7}$ V$_1$ Da$_3$ Dn$_{1.n4}$ D$_8$ D$_{2.3}$ M$_6$ आवां (for चावां). — ^{d}) K$_7$ गच्छ भो (for गच्छावो).

9 Ś$_1$ K$_{1.2.4.6}$ V$_1$ Bo.6–9 Da$_{3.a4}$ Dn$_{1.n4}$ D$_8$ D$_{2.3.6}$ om. the ref. — ^{a}) G$_3$ न योस् (for तयोस्). — ^{b}) Ś$_1$ K$_1$ त्रिदिशेश्वरः; K$_4$ D$_8$ त्रिदशेश्वरं. — ^{d}) Da$_4$ Ds$_1$ लोकपालौ; G$_{1.2}$ सह देवैस्.

10 ^{a}) T$_1$ साध्ये. K$_6$ V$_1$ Bo.6–9 Da$_{3.a4}$ Dn$_{1.n4}$ D$_8$ D$_{2.3.6.8}$ च विश्वे (for विश्वेऽथ). D$_5$ स-; D$_7$ G$_{3.6}$ M$_{1.5-7}$ च (for ऽथ). Ś$_1$ K$_{1.2.4}$ साध्यविश्वेश- मरुतो. — ^{b}) K$_6$ V$_1$ Bo.6–9 Da$_{3.a4}$ Dn$_{1.n4}$ D$_{2.3.6.8}$ वाद्यानि; K$_7$ B$_8$ (marg) D$_{4.5.9}$ वाक्यानि (for ज्योतींषि). D$_7$ T G$_{1-3.6}$ M$_{1.5-7}$ वाक्यानि त्रिविधानि च. — ^{c}) Da$_4$ नद्याः. K$_7$ D$_{4.5.9}$ नद्यः समुद्राः शैलाश्च.

11 ^{a}) ❀ Cs: संयोगविधिर्योगशास्त्रम् । ❀ — ^{b}) Da$_4$ देवाः (for वेदाः). Ś$_1$ K$_{1.2.4}$ स्तोताः; D$_6$ स्तोमाः. — ^{d}) Ś$_1$ K$_{1.2}$ हहा हूहूः; K$_7$ हाहा हुहुः; Bo हीहा हुहूः; Da$_3$ D$_{3.8.9}$ M$_7$ हहाहुहू; Da$_4$ हहाहूहू; D$_5$ हाहाहुहू. D$_7$ T$_1$ G$_{1-3.6}$ विश्वावसुपरावसू; T$_2$ M$_{1.5.6}$ °वसुहहा हु; T$_2$ °हू हू. — After 11, D$_7$ T$_1$ G$_{1-3.6}$ ins.:

529* तुम्बुरुप्रमुखाश्चैव हाहा हूहूस्तथैव च ।

12 ^{b}) K$_7$ D$_{4.9}$ परिचार- (for °वार-). Ś$_1$ K$_{1.2}$ D$_8$ M$_{1.7}$ -गुणैर् (for -गणैर्). K$_1$ M$_7$ युताः; K$_7$ D$_{4.7.9}$ T$_1$ G$_{1-3.6}$ सह (for युतः). — ^{c}) T$_1$ नाना- (for नागाः). — ^{d}) Da$_4$ देवदेव-. — After 12^{cd}, Kumbh. ed. ins.:

530* आजगाम च देवेशो ब्रह्मा वेदमयोऽव्ययः ।

— ^{e}) K$_7$ D$_{4.9}$ T G$_{1-3.6}$ M$_{1.5}$ सहस्रशीर्षा च. — ^{f}) K$_7$ दिवो; G$_2$ देवा. Da$_4$ T$_2$ समागमन्.

13 ^{a}) Dn$_1$ अवाद्यत; M$_1$ अवर्धत. Bo.3.9 M$_1$ [अं]तरीक्षे च; D$_5$ °रिक्षेषु. V$_1$ तु (for च). — ^{b}) Ś$_1$ K$_{1.2}$ भेरीस् (for भेर्यस्). G$_1$ सूर्याणि (for

अवाद्यन्तान्तरिक्षे च भेर्यस्तूर्याणि चाभिभो ।
पुष्पवर्षाणि दिव्यानि तत्र तेषां महात्मनाम् ।
ननृतुश्चाप्सरःसंघास्तत्र तत्र समन्ततः ॥ १३
अथ स्वर्गस्तथा रूपी ब्राह्मणं वाक्यमब्रवीत् ।
संसिद्धस्त्वं महाभाग त्वं च सिद्धस्तथा नृप ॥ १४
अथ तौ सहितौ राजन्नन्योन्येन विधानतः ।
विषयप्रतिसंहारमुभावेव प्रचक्रतुः ॥ १५
प्राणापानौ तथोदानं समानं व्यानमेव च ।
एवं तान्मनसि स्थाप्य दधतुः प्राणयोर्मनः ॥ १६
उपस्थितकृतौ तत्र नासिकाग्रमधो भ्रुवौ ।
कुङ्कुण्यां चैव मनसा शनैर्धारयतः स्म तौ ॥ १७
निश्चेष्टाभ्यां शरीराभ्यां स्थिरदृष्टी समाहितौ ।
जितासनौ तथाधाय मूर्धन्यात्मानमेव च ॥ १८
तालुदेशमथोद्दाल्य ब्राह्मणस्य महात्मनः ।
ज्योतिर्ज्वाला सुमहती जगाम त्रिदिवं तदा ॥ १९
हाहाकारस्ततो दिक्षु सर्वासु सुमहानभूत् ।

C. 12. 7350
B. 12. 200 21
K. 12. 98 21

णि). K4 D6 चाविभो; K6.7 V1 B0.6–9 Da3.a4 Dn1.n4 D8 D2–5.8 वा विभो; D7 T G1–3.6 M1.5–7 च प्रभो (for चाभिभो). — ^{d}) Ś1 K1.2.4 पेतुस् (for तत्र). D6 पेतुर् (for तेषां). K7 D4.9 तत्र पेतुर्महात्मनोः. — ^{f}) Ś1 K1.2.4.7 D4.9 विशां पते (for समन्ततः).

14 ^{a}) Da3.a4 सुख- (for अथ). — ^{b}) Da4 ब्रह्मणं. — ^{c}) T1 (before corr.) संसिद्धिस्. K4.6 V1 B6.7 Da3.a4 Dn1.n4 D8 D2.3.6.8 G1.2 M6.7 महाभागस्.

15 Before 15, D7 T1 G3.6 M5 Kumbh. ed. ins. भीष्म उवाच. — ^{a}) B9 lacuna; M1 संहितौ. — ^{b}) D7 T1 G1–3.6 Kumbh. ed. अन्योन्यस्य (for °न्येन). K4.6 V1 B0.6–9 Da3.a4 Dn1.n4 D2.3.5.6.8 अन्योन्य(B8 °न्ये; Da3.a4 D5 °न्यं)विधिना त(D6 ग)तः. — ^{c}) K7 विषयः; M6 विषयं. ❀ Cn: विषयप्रतिसंहारम्, विषयादीनां प्रतीपं संहारं, विषयकारणीभूतेन्द्रियसंहारेणैव संहारम् ॥ Cs: विषयप्रतिसंहारम्, इन्द्रियाणां परिवर्तनम् । ❀ — ^{d}) Dn4 इव (for एव).

16 V1 reads 16^{a}–22^{b} on marg. — ^{a}) Da4 प्राणायानौ. Dn1 अथ (for तथा). K7 प्राणोपानौ तथोव्यानं. — ^{b}) K7 समानो; D4 समानां. K4.6 M1 व्यान; K7 दानम् (for व्यानम्). — ^{c}) K4.6 V1 Da3.a4 Dn1.n4 D8 D2.3.6.8 M5 एवं तौ; B0.6–9 M1.6.7 एकस्थान्; D7 T G1–3.6 एतांस्तौ (for एवं तान्). Ś1 K1.2 न्यस्य (for स्थाप्य). K7 D4.9 एतान्मनस्यवस्थाप्य. — ^{d}) K1 दधतः. K7 D4.9 प्राणयोर्दधतुर्मनः.

17 V1 reads 17 on marg. — ^{a}) K7 D4.9 उपस्थानकृतौ; V1 °स्थितं कृतं; B0 °स्थितौ कृतौ; D7 T G1.2 °स्थितकृती. B6 Da4 Dn1 D3 तौ च; B8 च तौ (for तत्र). K6 Dn4 D3.6.8 Cnp उपस्थाप्योदरे तौ (glossed, प्राणापानौ) च; B7.8 (marg.).9 Da3 (marg.) °स्थावुदरौ तौ च. ❀ Ca.s: उपस्थितकृतौ । उपस्थितमयत्नसिद्धं कृतं कर्तुमिष्टं ययोस्तौ ॥ Cn: उपस्थितं उपस्थं कुरुतस्तौ उपस्थितकृतौ, बद्धपद्मासनावित्यर्थः ॥ Cv: उपस्थितकृतौ उपस्थानकारिणौ । ❀ — ^{b}) K7 D4.9 अथ; B6.8 Da3.a4 Ds2 T2 G2 M1.6.7 Cp अथो (for अधो). Dn1.n4 D2.3.6 भ्रुवोः. V1 D6 नासिकाग्रे तथा भ्रुवोः. ❀ Cn: भ्रुवोर्मध्ये आज्ञाचक्रे धारयतः । ❀ — D6 om. 17^{c}–18^{b}. G1 om. 17^{c}–18^{d}. — ^{c}) K1 कुंकुण्यं; K4 V1 B0.6–9 Da3.a4 Dn4 D8 D2.3.8 भ्रुकुट्या; K6 भृकुट्या; K7 D4.9 कुकुण्योश्च; B8 (marg.) Dn1 D5.7 भ्रुकुट्यां; T1 G3 कारुण्यं; T2 भृकुट्याश्च; G2 कारुण्यौ; G6 नेतेग्रे (sic); M1.5.6 कुकुण्यौ; M7 भ्रूमध्ये (for कुङ्कुण्यां). K7 D4.5.7.9 हि मनस् (for मनसा). ❀ Ca: कुङ्कुणी ब्रह्मनाडी यामाहुः सुषुम्नेति । ❀ — ^{d}) K1 स्मृतौ; K6 B0.7–9 Da3.a4 Dn1.n4 D8 D2.3.8 T G2.3 M1.5–7 तदा; V1 च तौ; B6 G6 तथा (for स्म तौ). K7 D4.5.7.9 तदा धार(D5 °यं)यतां शनैः.

18 D6 om. 18^{ab}; G1 om. 18 (cf. v. l. 17). V1 reads 18 on marg. — ^{b}) K7 स्थिरदृष्टिः; T1 स्थिरां दृष्टिं; G3.6 M7 स्थिर(M7 °रं)दृष्टि°. — ^{c}) K1.6 B0.7.8 (marg. as in text) Da3.a4 Dn1.n4 D8 T2 जितात्मानौ; G2 °सिनौ (for °सनौ). B6.9 D7 तथा वीरौ; B8 (marg.) Da4 D5 M7 तथा धीरौ; D4.9 T G2.3.6 M5 समाधाय. — ^{d}) K2.4.7 D4.9 एव तु; B6.7.8 (marg.) Da3.a4 आदधुः (for एव च). D5.7 मूर्धन्या(D7 °न्य)दधतुर्मनः.

19 V1 reads 19 on marg. — ^{a}) D7 [उ]द्घाट्य; G1.2 [उ]द्धाट्यं. G3.6 तौ स्थिताथ चोत्थाय. ❀ Cn: तालुदेशं ब्रह्मरन्ध्रम् । ❀ — ^{d}) M1.6.7 त्रिदिवेश्वरं (for °वं तदा). B6 D5 तथा; B7 दिवा (for तदा).

C. 12. 7350
B. 12. 200. 21
K. 12. 198. 21

तज्ज्योतिः स्तूयमानं स्म ब्रह्माणं प्राविशत्तदा ॥ २०
ततः स्वागतमित्याह तत्तेजः स पितामहः ।
प्रादेशमात्रं पुरुषं प्रत्युद्गम्य विशां पते ॥ २१
भूयश्चैवापरं प्राह वचनं मधुरं स्म सः ।
जापकैस्तुल्यफलता योगानां नात्र संशयः ॥ २२
योगस्य तावदेतेभ्यः फलं प्रत्यक्षदर्शनम् ।
जापकानां विशिष्टं तु प्रत्युत्थानं समाधिकम् ॥ २३
उष्यतां मयि चेत्युक्त्वाचेतयत्स ततः पुनः ।
अथास्य प्रविवेशास्यं ब्राह्मणो विगतज्वरः ॥ २४
राजाप्येतेन विधिना भगवन्तं पितामहम् ।
यथैव द्विजशार्दूलस्तथैव प्राविशत्तदा ॥ २५
स्वयंभुवमथो देवा अभिवाद्य ततोऽब्रुवन् ।
जापकार्थमयं यत्नस्तदर्थं वयमागताः ॥ २६
कृतपूजाविमौ तुल्यं त्वया तुल्यफलाविमौ ।
योगजापकयोर्दृष्टं फलं सुमहदद्य वै ।
सर्वाँल्लोकानतीत्यैतौ गच्छेतां यत्र वाञ्छितम् ॥ २७

---

20 V1 reads 20 on marg. — ^{a}) K6 V1 Bo. 7. 8 Da3. a4 Dn1. n4 Ds2 D2. 3. 5–8 G2 तथा; B6. 9 Ds1 T1 G2 (*sup. lin.*) तदा (for ततो). — ^{b}) K6 B7 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 सर्वेषां (for सर्वासु). — ^{cd}) Ś1 K1. 2 स्म (K2 स्मा) यमानं स; K7 स्तूयमानस्य. D7 T G1–3. 6 M5 तु (for स्म). Ś1 K1 T1 M6 ब्राह्मणं. K7 D4 प्राविशत्; Da4 संवि°. V1 स्तूयमानं स्म ब्रह्माणं तज्ज्योतिः प्राविशत्तदा.

21 V1 reads 21 on marg. — ^{b}) K6 Da3 Dn1. n4 Ds2 D2. 3. 6. 8 प्रपितामहः; K7 M7 स पितामह. — ^{c}) ❀ Cs: प्रादेशमात्रं साङ्गुष्ठा प्रसारिता तर्जनी प्रादेशः। प्रादेशतालुगोकर्णवितस्त्यः स्युर्यथाक्रमम् । तर्जन्यादिकनिष्ठान्ताः साङ्गुष्ठाः स्युः प्रसारिताः ॥ इति वैजयन्ती । ❀ — ^{d}) T2 प्रत्युद्यम्य.

22 V1 reads 22^{ab} on marg. — ^{b}) T2 G2 M5 transp वचनं and मधुरं. K4. 6. 7 Bo. 7–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 तदा; V1 समः; B6 तथा; D7 T2 G1. 3 6 द्विजः (for स्म सः). — ^{c}) Ś1 K1 lacuna; K2 मद्विधैस् (for जापकैस्). — ^{d}) K1 योजनां; K7 D4 योगिनां.

23 ^{b}) G3 °दर्शिनं (for °दर्शनम्). K6 V1 Bo. 6 9 Da3 a4 Dn1. n4 Ds D2. 3. 6. 8 प्रत्यक्षं फलदर्शनं. — K6 V1 Bo 6. 8 9 Da3. a4 Dn1. n4 Ds2 D2. 3. 6 8 repeat 23^{cd} after 26^{ab}. D5 reads 23^{c}–26^{b} twice. — ^{c}) D7 T G1–3. 6 वरिष्ठं (for विशिष्टं). — ^{d}) T1 प्रत्यस्थानम्. K6 (both times) V1 (second time) Bo 6–9 Da3. a4 Dn1. n4 Ds2 D2. 3. 5. 6. 8 (all [except B7] both times) समाहितं; K7 V1 (first time) D4. 9 समाधिकं; D7 T G1–3. 6 M1. 5–7 इहाधिकं (M7 °कः) (for समाधिकम्).

24 For the repetition in D5, cf. v. l. 23. — ^{a}) K7 B9 उच्यतां; G3 इष्यतां. Da3. a4 Dn4 अपि (for मयि). D5 (both times) उष्यतामिति चैवोक्तं. — ^{b}) Ś1 K1. 2 B6. 8. 9 चेतयन्; K7 चिंतयन्; D4. 9 [अ]चिंतयत् (for [अ]चे°). K6 V1 Bo Da3 Dn1. n4 Ds D2. 3. 6. 8 सततं; K7 D4. 5 (both times). 9 स पुनः (for स ततः). K4 पुमान् (for पुनः). D7 T G1–3. 6 M1. 5–7 व्याददे (G6 °धे) स ततो मुखं. — ^{c}) K4 V1 [आ]स्यं (for [अ]स्य). K1. 6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5 (both times). 6. 8 अथास्यं प्रविवेशास्य. — ^{d}) Ds1 ब्राह्मणे; D3 ब्रह्मणो.

25 For the repetition in D5, cf. v. l. 23. — ^{a}) Ś1 K1 तेन; T2 G1. 2 अनेन (for एतेन). — ^{c}) K2 अथैव. — ^{d}) K6 प्राविशस्.

26 For the repetition in D5, cf. v. l. 23. — ^{a}) D5 (both times) स्वायंभुवम्. — ^{b}) B6 तम्; D7 M1. 5–7 [इ]दम्; T1 G1–3. 6 वचो (for ततो). — After 26^{ab}, K6 V1 Bo. 6. 8. 9 Da3. a4 Dn1. n4 Ds2 D2. 3. 6. 8 repeat 23^{cd}. — ^{c}) V1 जापकानाम् (for °र्थम्). G1. 2 अहं (for अयं). — ^{d}) K6 V1 Bo. 6. 7. 9 Da3 a4 Dn1 n4 Ds D2 3. 5. 6 8 यदर्थं (Ds1 °र्थे); B8 तदर्थे; G1. 2 ततस्तं (for तदर्थं). K6 D3. 6. 8 स्त्वयम् (for वयम्).

27 ^{a}) D5 7 कृतप्रज्ञाविमौ; T2 °पूजाविधौ; G3 °पूर्वाविमौ. K2. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 G3. 6 तुल्यौ. — ^{b}) V1 D5 M1. 5–7 तथा (for त्वया). D7 T1 G1–3. 6 तुल्यफलान्वितौ. Ś1 K1. 2. 4 °बलाव् (for °फलाव्). K7 D4. 5. 9 इति; Dn1 विभो (for इमौ). — ^{c}) K6. 7 D9 योगि°. K1 सृष्टं; K7 D4. 7 9 T G1–3 6 तुल्यं (for दृष्टं). — ^{d}) K1 अस्य (for अद्य). — ^{e}) K6 सर्वत्र° (hypermetric); K7 D4. 9 सर्व° (for सर्वाँल्). K4. 6. 7 Bo. 7–9 Da3. a4 Dn1.

ब्रह्मोवाच ।

महास्मृतिं पठेद्यस्तु तथैवानुस्मृतिं शुभाम् ।
तावप्येतेन विधिना गच्छेतां मत्सलोकताम् ॥ २८
यश्च योगे भवेद्भक्तः सोऽपि नास्त्यत्र संशयः ।
विधिनानेन देहान्ते मम लोकानवाप्नुयात् ।
गम्यतां साधयिष्यामि यथास्थानानि सिद्धये ॥ २९

भीष्म उवाच ।

इत्युक्त्वा स तदा देवस्तत्रैवान्तरधीयत ।
आमन्त्र्य तं ततो देवा ययुः स्वं स्वं निवेशनम् ॥ ३०
ते च सर्वे महात्मानो धर्मं सत्कृत्य तत्र वै ।
पृष्ठतोऽनुययू राजन्सर्वे सुप्रीतमानसाः ॥ ३१
एतत्फलं जापकानां गतिश्चैव प्रकीर्तिता ।
यथाश्रुतं महाराज किं भूयः श्रोतुमिच्छसि ॥ ३२

C. 12. 7364
B. 12. 200. 34
K. 12. 193. 34

इति श्रीमहाभारते शान्तिपर्वणि त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

---

n4 Ds D2–6. 8. 9 अतिक्रम्य; V1 B6 T2 M1. 5 अतित्येतौ (for अतीत्यैतौ). — f) D5 M6 वांछितः.

28 D31. 32 (before corr.) ब्राह्मणः (for ब्रह्मा). — a) B3 (marg.). 9 Cap महाश्रुतिं (for °स्मृतिं). K7 D4. 9 जपेद् (for पठेद्). — b) Ś1 (before corr.) K2 D9 [अं]तः; K7 T2 G3. 6 M1. 6. 7 [अं]त-; D7 T1 G1. 2 [ए]तां (for [अ]नु-). ❀ Ca: महास्मृतिर्गीतादिः, अनुस्मृतिर्विष्णुस्तोत्रादिः । यद्वा...महास्मृतिरन्यश्रवणयोग्यो जपः, अनुस्मृतिरुपांशुर्मानसो वा जपः । महाश्रुतिमनुश्रुतिमिति पाठे महाश्रुतिशब्देन गायत्र्युच्यते, अनुश्रुतिशब्देन चात्र ॐकारपूर्विकास्तिस्रो व्याहृतयः । Cs: महास्मृतिमेकमेकं वेदम् । अनुस्मृतिरुपनिषदावर्तनम् । इदं तु अर्थमवधास्यमानस्य फलम् ॥ Cv: महास्मृतिर्जापकब्राह्मणचरित्रस्मृतिर्महास्मृतिः । अनुस्मृतिः अनुकूलतया स्थितराजचरितस्य स्तुतिः । ❀ — c) D4 [अ]द्य (for [अ]पि). D7 T G1–3. 6 मार्गेण (for विधिना). — d) Ś1 K1. 2. 4 तत्- (for मत्-). D2 गच्छेतां यत्र वाच्छत (sic).

29 a) K6 यद्ययोगे (for यश्च योगे). Da4 G6 लोके; M1. 5–7 योगाद् (for योगे). D7 T1 G1–3. 6 युक्तः (for भक्तः). — d) D7 T G1–3. 6 लोकम् (for लोकान्). — e) Ś1 K1 साधयिष्याम. K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8 9 साधये (D5 शिवाय) गम्यतां चैव. — f) K2 स्वर्ग- (for यथा-). Ś1 K1 lacuna for यथास्था.

30 G3. 6 om. the ref. — a) Da4 इत्युक्त्वा. Ś1 K1. 2. 4 M7 ततो (for तदा). T1 reads from तदा up to ततो (in 30c) twice. K4 D4. 9 G3. 6 देवांस्. — b) D4 -धीयतं; D9 -धीयते. — c) K4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6–8 T1 (both times). 2 G1–3. 6 M1 च (for तं). D5 तदा; G3. 6 तथा (for ततो). G1 देव. — d) K7 निकेतनं (for निवेशनम्).

31 a) D8 तं (for ते). D9 महात्मानौ. — b) T1 सर्वं (for धर्मं). K6 संस्कृत्य; D7 T1 G3. 6 संस्तुत्य; G1 संस्मृत्य. — c) D5 पृष्ठतोनु तदा; G1. 2 °तोनुययौ; G3. 6 °तोन्वययू. — d) Ś1 K1. 2. 4 संप्रीतमानसाः; K6 Bo. 7–9 Da3. a4 Dn1. n4 D2. 3. 6. 8 सुप्रीत(K6 °ति)चेतसः (for °मानसाः).

32 b) K6. 7 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–4. 6. 8. 9 [ए]षा; D5 [ए]षां (for [ए]व). K6 Da4 प्रकीर्तितं (Da4 °तां); K7 D4. 5. 9 प्रदर्शिता (K7 D5 °ताः).

Colophon. — *Sub-parvan:* Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T G1–3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name:* Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1 D2–9 T1 G1. 3. 6 M1. 5–7 जापकोपाख्यानं; M1. 5–7 (also) देवाभिगमनं. — *Adhy. no.* (figures, words or both): B7 Dn4 D7 T1 G1. 3. 6 M1. 5–7 26; Dn1 27; D3. 8 25; T2 G2 40. — *Śloka no.:* Da4 Dn1. n4 D8 35.

१९४

C. 12. 7363
B. 12. 201. 1
K. 12. 199. 1

युधिष्ठिर उवाच ।
किं फलं ज्ञानयोगस्य वेदानां नियमस्य च ।
भूतात्मा वा कथं ज्ञेयस्तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मनोः प्रजापतेर्वादं महर्षेश्च बृहस्पतेः ॥ २

प्रजापतिं श्रेष्ठतमं पृथिव्यां
देवर्षिसंघप्रवरो महर्षिः ।
बृहस्पतिः प्रश्नमिमं पुराणं
पप्रच्छ शिष्योऽथ गुरुं प्रणम्य ॥ ३

यत्कारणं मन्त्रविधिः प्रवृत्तो
ज्ञाने फलं यत्प्रवदन्ति विप्राः ।
यन्मन्त्रशब्दैरकृतप्रकाशं
तदुच्यतां मे भगवन्यथावत् ॥ ४

यदर्थशास्त्रागममन्त्रविद्भि-
र्यज्ञैरनेकैर्वरगोप्रदानैः ।
फलं महद्भिर्यदुपास्यते च
तत्किं कथं वा भविता क्व वा तत् ॥ ५

मही महीजाः पवनोऽन्तरिक्षं
जलौकसश्चैव जलं दिवं च ।

194

1 K1 om. 1. —a) Ca ज्ञानयोग्यस्य (glossed by नष्टाभ्यासस्य). ❀ Cn: ज्ञानं विचारस्तत्सहितो योगो ज्ञानयोगः । ❀ —b) M1 देवानां (for वेदानां). K6 वा (for च). —c) M1 श्रुतात्मा; M7 श्रुत्वात्मा (for भूतात्मा). K6 V1 Bo. 6-9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 च; M7 स (for वा).

2 a) D7 T G3. 6 अत्रैव (for अत्रापि). —b) D6 मनोः प्रजापतिर्वेदं.

3 a) Ś1 K1. 2. 4 प्रजापतेः; D7 T G1-3. 6 M1. 5-7 °पतिः (T2 G1 M1. 6. 7 °ति-) (for °पतिं). T G3. 6 M1. 5-7 श्रेष्ठतमः (for °तमं). K6. 7 V1 Bo. 7. 8 (marg.). 9 Dn1. n4 D8 D2. 3. 5-8 T G1-3. 6 M1. 5-7 प्रजानां (for पृथिव्यां). —b) T2 G1. 3 M1. 5-7 -प्रवरं; G2 -प्रवर्षं (for -प्रवरो). D5. 7 T G1-3. 6 M1. 5-7 महर्षिं (for °र्षिः). —c) B6 D7 T1 G1. 3. 6 M1. 5-7 बृहस्पतिं (for °स्पतिः). B7. 8 (marg. as in text) Da3. a4 Dn1 प्रश्नमिदं; G1 आशिमिमं; M7 प्राज्ञतमं (for प्रश्नमिमं). —d) Da4 यत्तप्रच्छ (for पप्रच्छ). B6 (marg. as in text) मनुं; D5 मुनिं (for गुरुं).

4 a) M7 यं (for यत्-). K4. 6 V1 Bo. 6-9 Da3. a4 Dn1 n4 D8 D2. 3. 6. 8 यत्र विधिः (D32 °धि-); K7 D5. 7 T G1-3. 6 M1. 5-7 मंत्रविधि- (for °विधिः). D31 D7 T G1-3. 6 M1. 5-7 -प्रयुक्तं (for प्रवृत्तो). —b) D31 D5 ज्ञानं; G2 जाने (for ज्ञाने). D7 T1 G1. 2 यत्र (for यत्प्र-). D7 विदंति (for -वदन्ति). —c) Bo तन् (for यन्). D7 -प्रकारं; T1 G1. 2 -प्रशांतं (for -प्रकाशं). —d) V1 Bo Dn4 भगवान् (for भगवन्).

5 K7 om. (hapl.) 5. —a) K4. 6 Bo. 7-9 Dn1. n4 D8 D2. 3. 6. 8 यच्चार्थ-; D5 यस्त्वर्थ-; D7 T G1-3. 6 M1. 5-7 यत्स्तोत्र- (for यदर्थ-). V1 -शास्त्रागत-; D7 (before corr.) -शस्त्रगम-; T G1. 3. 6 M5. 7 -शस्त्रग्रह-; G2 -शब्दग्रह-; M1. 6 -शास्त्रग्रह- (for -शास्त्रागम-). M7 -मंत्रवद्भिर्; G3. 6 °वाग्भिर् (for °विद्भिर्). ❀ Ca. n. 8: अर्थशास्त्र त्रिवर्गशास्त्रम् । ❀ —b) K6 B6-9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 अथ; V1 Bo D4. 5. 7. 9 T G1-3. 6 M1. 5-7 धन- (for वर-). —c) Ś1 K1. 2. 4 महर्षिर् (for महद्भिर्). D7 T G1-3. 6 यदवाप्यते (for यदुपास्यते). D4. 9 तत् (for च). —d) K6 V1 Bo. 6-9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 किं तत् (by transp.); Ś1 D4. 9 किं वा; G2 तं किं. B9 फलं (for कथं). Ś1 K1. 2. 4. 6 भवति (for भविता). D2 यथावत्; D3 क्व तावत् (for क्व वा तत्).

6 a) D2 om. मही. D9 (marg.) महीध्राः (for °जाः). K7 V1 Bo. 6-9 D7 M1. 7 पवनोंतरीक्षं. —b) K7 जलौकशश्च; D8 नभौकसश्च (for जलौ°). K2 transp. जलं and दिवं. D7 T G1-3. 6 M1. 5-7 जलौकसोग्निश्च जलं तथा द्यौः. —c) K4. 6. 7 V1 Bo. 6-9 Da3. a4 Dn1. n4 D8 D2-6. 8. 9 M1. 5-7 चापि (for चैव). B8 (marg.) प्रसूतास्; Dn1 प्रभूतास् (for प्रसू°). —d)

दिवौकसश्चैव यतः प्रसूता-
स्तदुच्यतां मे भगवन्पुराणम् ॥ ६
ज्ञानं यतः प्रार्थयते नरो वै
ततस्तदर्था भवति प्रवृत्तिः ।
न चाप्यहं वेद परं पुराणं
मिथ्याप्रवृत्तिं च कथं नु कुर्याम् ॥ ७
ऋक्सामसंघांश्च यजूंषि चाहं
छन्दांसि नक्षत्रगतिं निरुक्तम् ।
अधीत्य च व्याकरणं सकल्पं
शिक्षां च भूतप्रकृतिं न वेद्मि ॥ ८

स मे भवाञ्शंसतु सर्वमेत-
ज्ज्ञाने फलं कर्मणि वा यदस्ति ।
यथा च देहाच्च्यवते शरीरी
पुनः शरीरं च यथाभ्युपैति ॥ ९
मनुरुवाच ।
यद्यत्प्रियं यस्य सुखं तदाहु-
स्तदेव दुःखं प्रवदन्त्यनिष्टम् ।
इष्टं च मे स्यादितरच्च न स्या-
देतत्कृते कर्मविधिः प्रवृत्तः ।
इष्टं त्वनिष्टं च न मां भजेते-

C. 12. 7376
B. 12. 201. 11
K. 12. 199. 11

K$_2$ om. मे. K$_7$ V$_1$ M$_5$ भगवान्.

7 ^{a}) T$_2$ ज्ञातुं (for ज्ञानं). K$_6$ च यत्; V$_1$ B$_6$ (marg. as in text).$_8$ (marg.) ततः; B$_8$ (also marg.) D$_{a3.\,a4}$ D$_6$ Ca तु यत्; D$_7$ T G$_{1-3.\,6}$ M$_{1.\,5-7}$ महत् (for यतः). D$_5$ नराणां (for नरो वै). K$_4$ ज्ञानायते प्रार्थयते नरैव (sic). — ^{b}) D$_7$ तदा समर्था भवति. K$_{1.\,2}$ यतस् (for ततस्). G$_{1.\,2}$ तदा सा; G$_{3.\,6}$ M$_1$ तदार्था (for तदर्था). K$_2$ भवतिः; K$_4$ °ती. — ^{c}) D$_7$ T G$_{1-3.\,6}$ M$_{1.\,5-7}$ चेदहं (for चाप्यहं). D$_7$ T G$_{1-3.\,6}$ वेद्मि (for वेद). — ^{d}) V$_1$ reads from मिथ्या up to व्याकरणं (in 8^c) on marg. G$_1$ -प्रवृत्तिश्. D$_5$ न; D$_7$ तु (for च). Ś$_1$ K$_{1.\,2.\,4}$ वि(K$_4$ हि)कुर्यात्; K$_7$ B$_{7.\,8}$ (marg.) D$_{a3.\,a4}$ D$_{4.\,7.\,9}$ T G$_{1-3.\,6}$ M$_7$ न कुर्यां; B$_6$ प्रकुर्यां; D$_{n4}$ D$_5$ न (D$_5$ च) कुर्यात्; M$_{1.\,5}$ नु कुर्यात् (for नु कुर्याम्).

8 V$_1$ reads up to व्याकरणं on marg. — ^{a}) K$_6$ अकाम- (for ऋक्साम-). Ś$_1$ K$_{1.\,2}$ -संगांश्च; K$_7$ D$_5$ T$_2$ G$_{1.\,2}$ -संघाश्च (for -संघांश्च). K$_4$ B$_{0.\,6-9}$ D$_{a3.\,a4}$ D$_{n1.\,n4}$ D$_8$ D$_{2.\,3.\,5.\,6.\,8}$ चापि; D$_4$ वाहं (for चाहं). — ^{b}) V$_1$ न क्षेत्रं (for नक्षत्र-). K$_6$ D$_{3.\,6.\,8}$ T$_2$ G$_6$ -गतिर्; T$_1$ -गतीर् (for -गतिं). ❀ Ca: छन्दांसि छन्दोविचितिम् । ❀ — ^{c}) K$_2$ lacuna; D$_{s2}$ (before corr.) स; M$_{1.\,5.\,6}$ चेद् (for च). — ^{d}) K$_7$ D$_{4.\,9}$ शिष्यांश्च; D$_7$ G$_2$ M$_7$ शीक्षां च (for शिक्षां च). Ś$_1$ (*sup. lin.*) K$_1$ B$_8$ (marg.) वेद- (for भूत-). K$_4$ वेत्ति (for वेद्मि).

9 ^{a}) K$_1$ भावं; K$_2$ भावान्. K$_4$ D$_{a3.\,a4}$ तावद् (for सर्वम्). — K$_6$ B$_{0.\,6-9}$ D$_{a3}$ D$_{n1.\,n4}$ D$_8$ D$_{2.\,3.\,5.\,6.\,8}$ Cn ins. after 9^a: K$_7$ D$_{4.\,9}$ after 9:

531* सामान्यशब्दैश्च विशेषणैश्च ।
स मे भवाञ्शंसतु तावदेतत्.

[(L. 1) D$_{a3}$ विशेषणश्च. — D$_{a3}$ om. line 2. — (L. 2) B$_9$ D$_{n1}$ सर्वम्; D$_{n4}$ यावद् (for ता°). K$_7$ D$_{4.\,9}$ सर्वं च मे क(K$_7$ त्वमेतत्क)थय त्वं यथावत्.]

— ^{b}) D$_4$ ज्ञान-; M$_7$ स्वज्ञाने (for ज्ञाने). D$_7$ T$_1$ G$_{1-3.\,6}$ फले (for फलं). B$_9$ यावदस्ति; D$_7$ G$_{1.\,2}$ वा यदेति; T$_1$ G$_{3.\,6}$ वा वदंति; T$_2$ वारयंति (for वा यदस्ति). — ^{c}) D$_{n1}$ तथा च; G$_{3.\,6}$ यथा हि (for यथा च). D$_5$ om. च. Ś$_1$ देहांस्; K$_1$ देहास् (for देहाच्). Ś$_1$ K$_{1.\,2.\,4}$ त्यज(K$_1$ °ज्य)ते (for च्यवते). — ^{d}) Ś$_1$ K$_{1.\,2}$ मुनेः (for पुनः). D$_{a4}$ तु (for च). D$_{a4}$ G$_{3.\,6}$ तथा (for यथा). B$_6$ G$_{3.\,6}$ [अ]प्युपैति; D$_5$ ह्यपैति (for [अ]भ्यु°). — After 9, B$_6$ D$_5$ read 11^{cd} for the first time, repeating it in its proper place.

10 M$_7$ om. the ref. D$_7$ T G$_{1-3.\,6}$ बृहस्पतिः (for मनुः). — ^{a}) M$_7$ प्रियो (for प्रियं). K$_7$ तस्य; B$_9$ यच्च (for यस्य). D$_{a3}$ D$_{s1}$ यदाहुस्; D$_{n4}$ lacuna (for त°). — ^{b}) B$_8$ (marg.) द्वेष्यं तदेव (for तदेव दुःखं). — ^{c}) Ś$_1$ (orig.) K$_{2.\,4}$ D$_{a4}$ D$_{4.\,9}$ इदं (for इष्टं). G$_1$ om. च. K$_{1.\,2}$ T इतरश्च; V$_1$ B$_{0.\,6.\,8}$ (marg. as in text).$_9$ D$_{a4}$ D$_{5.\,7}$ G$_{3.\,6}$ °रं च (for °रच्च). — ^{d}) K$_7$ -कृतं; G$_3$ च मे (for -कृते). K$_7$ G$_3$ -विधि- (for -विधिः). G$_6$ -प्रवृत्तिः. — After 10^{cd}, B$_{6-9}$ D$_7$ T G$_{1-3.\,6}$ M$_{1.\,6.\,7}$ ins. 532*, while D$_{a3.\,a4}$ ins. lines 1–4 of 532*. The sequence of M$_5$ after

C. 12. 7375
B. 12. 201. 11
K. 12. 199. 11

त्येतत्कृते ज्ञानविधिः प्रवृत्तः ॥ १०

कामात्मकाश्छन्दसि कर्मयोगा
एभिर्विमुक्तः परमश्नुवीत ।
नानाविधे कर्मपथे सुखार्थी
नरः प्रवृत्तो न परं प्रयाति ।
परं हि तत्कर्मपथादपेतं

10^{ed} is : 11^{cd}, lines 5–6 of 532*, 11^{ef}, lines 1–4 of 532*, 11^{ab}, 11^{cd} (r), 11^{ef} (r), 532* (r). B6. 7. 9 M1. 5–7 om. 10^{ef}; D7 T G1–3. 6 om. 10^{e}–11^{d}. B8 reads 10^{e}–11^{d} after line 4 of 532*. — ^{e}) K4 तु निष्टं. Ś1 K1 मा; K2 सा (for मां). — ^{f}) K6 त्वेतत्-; D5 एतत्-.

11 For the sequence in M5, cf. v. l. 10. D7 T G1–3. 6 om. 11^{abcd} (cf. v. l. 10). B6. 9 read 11^{ab} and B7. 8 M7 read 11^{abcd} after line 4 of 532*. Da3 Dn1. n4 D2 repeat 11^{ab} after line 4 of 532*. M1. 5. 6 read 11^{abcd} (repeating 11^{cd}) after line 4 of 532*. — ^{a}) B6. 9 D5 M1. 5. 6 कामात्मकं; B7 °र्थकं; Da3 (both times) °त्मकश्; M7 °त्मतश् (for °त्मकाश्). B6. 7. 9 Da4 Dn1. n4 D2 (last three second time) M7 Cap छंदति (for °सि). Ś1 K1. 2. 7 V1 कामयोगाद्; B6. 7. 9 Dn1. n4 D2 (last three second time) कर्मयोग; Da3 (both times) lacuna; D3 मृत्युयोगा; D4. 9 काम°; M1. 5–7 कर्मयोगाद् (for °योगा). — ^{b}) Ś1 K1. 2 D4 वियुक्ताः; M1. 5–7 वियुक्तः (for विमुक्तः). Ś1 K1. 2. 4 अश्नुवंति; K7 °वतः; B6. 7. 9 Da3 (both times). a4 Dn1. n4 D2 (last three second time). 5 आददीत; D4. 9 अस्त्र(D9 °स्त्य)वेदः; M7 आविशेत (for अश्नुवीत). — After 11^{ab}, Da3. a4 D5 ins. lines 5–6 of 532*. B9 om. 11^{cd}. B6 D5 read 11^{cd} for the first time after 9. B7. 8 read 11^{cd} for the first time after line 4 of 532*. — ^{c}) B7 (first time) damaged. K7 B6 (first time). 7. 8 (last two second time) Da3. a4 D4. 5 (first time). 9 नानाविधैः; M1. 5–7 (all both times) नानापथे (for °विधे). Ś1 K1. 2 B8 (first time) कर्मफले; K4 °फली; K7 B6 (first time). 7. 8 (last two second time) D5 (first time) °फलैः (for °पथे). M7 (both times) सुखं हि (for सुखार्थी). — ^{d}) K6 Bo. 7. 8 (last two first time) निरयं (for न परं). B7. 8 (both second time) प्रपश्येत् (for प्रयाति). — K6. 7 V1 Bo Dn1. n4 Ds D2–4. 6–9 Cn. 8 ins. after 11^{cd}: B6–9 T G1–3. 6 ins. after 10^{cd}: Da3. a4 ins. lines 1–4 after 10^{cd}; Da3. a4 D5 ins. lines 5–6 after 11^{ab}: M1. 6. 7 ins. lines 1–4 after 10^{cd} and repeat the same with lines 5–6 after 11: M5 ins. lines 5–6 after 11^{cd} and lines 1–4 after 11^{ef} and repeats after the repetition of 11^{ef}:

532* बृहस्पतिरुवाच ।
इष्टं त्वनिष्टं च सुखासुखे च
साशीस्त्ववच्छन्दति कर्मभिश्च ।
मनुरुवाच ।
एभिर्वियुक्तः परमाविवेश
एतत्कृते कर्मविधिः प्रवृत्तः ।
आत्मादिभिः कर्मभिरिध्यमानो [5]
धर्मे प्रवृत्तो द्युतिमान्सुखार्थी ।

[K6. 7 Bo. 7 Da3. a4 D4. 5. 7. 9 T G1–3. 6 M7 (both times) om. the ref. V1 D5 om. lines 1–4. — (L. 1) K7 D4. 9 प्रजा; Da4 इदं (for इष्टं). D4 त्वनिष्टे; D7 G1. 3 चानिष्टं; T1 G2 च निष्टं; M1. 5–7 (all second time) च दिष्टं (for त्वनिष्टं). D7 T G1–3. 6 M1. 5–7 (last four both times) शुभाशुभं (for सुखासुखे). — After line 1, K7 D4. 9 read for the first time 11^{ef}, repeating it in its proper place. — (L. 2) K7 D4. 9 त्ववकर्मभिश्; Bo. 6. 8 D6 त्वत(B6 °व)श्छंदति; B9 Da3. a4 ततश्छंदति; D8 तपश्छंदति; D7 T G1. 3. 6 तपश्छंदसि; D8 त्वरच्छंदति; G2 M5. 7 (last two both times) तवैश्छंदसि; M1. 6 (both both times) तवैच्छंदति (for त्वव°). K7 सश्वद*; D4. 9 छंदसश्च; D7 T1 G3. 6 कर्मवच्च; T2 कर्मयश्च (for °भिश्च). — Some MSS. om. the ref. — (L. 3) Bo D7 T1 G1–3. 6 एतैर् (for एभिर्). B6–8 Da3. a4 Dn1. n4 Ds D2. 3. 6–8 T1 G2 विमुक्तः; M7 (first time) विषक्तः (for वियुक्तः). K7 D4. 9 आविशेत्तद्; Da4 आददीत; Ds2 T G1–3. 6 M1. 5. 6 (last three both times). 7 (first time) आविशेत; M7 (second time) आविशेते (for आविवेश). — (L. 4) Da3. a4 यत्तत्-; D7 T G1–3. 6 M7 (first time) नैतत्-; M1. 5. 6 (all both times) इत्येतत्-; M7 (second time) चैतत्- (for एतत्-). Bo ज्ञान- (for कर्म-). T2 G3. 6 -विधिप्रयुक्तं; M7 (first time) -विधि प्रवृत्तं (for -विधिः प्रवृत्तः). — B6–9 M1. 5–7 read 11^{ab} (B7 M7 11^{abcd}; B8 10^{e}–11^{d}) after line 4; while Da3 Dn1. n4 D2 repeat 11^{ab} after line 4. — (L. 5) B6 (marg.). 7–9 Da3. a4 नानाविधैः (for आत्मादिभिः). V1 वध्यमानो; B9 अध्य°; D7 T1 G3. 6 Csp ईड्य°; T2 इज्य°; G1. 2 ईड्यमाना; M1. 5 (both times). 6 तृप्यमानो; M7 उह्य°; Cs अर्यं° (for इध्य°). — (L. 6) B9 धर्मं प्रवृत्तो; D7 T1 G1 M5 (both times). 7 धर्मेषु वृत्तो; T1 K1 G3. 6 धर्मेषु युक्तो; G2 धर्मेषु रिक्तो (for धर्मे प्रवृत्तो).

निराशिषं ब्रह्मपरं ह्यवश्यम् ॥ ११
प्रजाः सृष्टा मनसा कर्मणा च
द्वावप्येतौ सत्पथौ लोकजुष्टौ ।
दृष्ट्वा कर्म शाश्वतं चान्तवच्च
मनस्त्यागः कारणं नान्यदस्ति ॥ १२
स्वेनात्मना चक्षुरिव प्रणेता
निशात्यये तमसा संवृतात्मा ।
ज्ञानं तु विज्ञानगुणेन युक्तं
कर्माशुभं पश्यति वर्जनीयम् ॥ १३
सर्पान्कुशाग्राणि तथोदपानं
ज्ञात्वा मनुष्याः परिवर्जयन्ति ।
अज्ञानतस्तत्र पतन्ति मूढा
ज्ञाने फलं पश्य यथा विशिष्टम् ॥ १४
कृत्स्नस्तु मन्त्रो विधिवत्प्रयुक्तो
यज्ञा यथोक्तास्त्वथ दक्षिणाश्च ।
अन्नप्रदानं मनसः समाधिः
पञ्चात्मकं कर्मफलं वदन्ति ॥ १५
गुणात्मकं कर्म वदन्ति वेदा-
स्तस्मान्मन्त्रा मन्त्रमूलं हि कर्म ।
विधिर्विधेयं मनसोपपत्तिः
फलस्य भोक्ता तु यथा शरीरी ॥ १६
शब्दाश्च रूपाणि रसाश्च पुण्याः
स्पर्शाश्च गन्धाश्च शुभास्तथैव ।
नरो नसंस्थानगतः प्रभुः स्या-

C. 12. 7386
B. 12. 201. 20
K. 12. 199. 21

D2. 3. 8 सुखार्थैः; D6 सुखार्थे.]

— K7 D4. 9 read for the first time 11ef after line 1 of 532*. — c) G1 परा; G3. 6 पदं (for परं). Da4 D5 यत (for तत्). K7 D4. 9 (all first time) M7 (second time) कर्मफलाद्; Bo °पदाद्; B7 °सुखाद्; D5 °पथान् (for °पथाद्). K7 D4. 5. 9 (all [except D5] second time) G1 अपेतो (G1 °ता); Da3. a4 अपेतान्; T2 अपेति (for °तं). — f) M7 ब्रह्मपरा. K4 ह्यपश्यं; K6 सुवेद्यं; K7 (second time) B6–9 Dn1. n4 D4 (second time). 5. 9 (second time) M7 (first time) ह्युपैति; K7 (first time) V1 Bo. 6 (marg.) Da3. a4 Ds D2. 3. 4 (first time). 6. 8. 9 (first time) ह्यवेद्यं (for ह्यवश्यम्). D7 T G1–3. 6 M1. 5. 6. 7 (second time) निराशिषो (T2 °शिरो; G2 °शिषं) यत्पदमाप्नुवंति.

74 ^{a}) Ś$_{1}$ K$_{1. 2}$ त्वमेवेंद्रेह; K$_{6}$ D$_{s1}$ G$_{2}$ त्वमेव इंद्र (G$_{2}$ °ह इंद्र) (for °व हीन्द्र). D$_{7}$ T G$_{1-3. 6}$ M$_{5. 7}$ (also as in text) मां वेत्थ (for वेत्थास्मान्). —^{b}) Ś$_{1}$ K$_{1}$ (by corr. as in text). $_{2}$ त्वं (for त्वां). Ś$_{1}$ K$_{1. 2. 4}$ वासवं; B$_{7}$ भारत; D$_{a4}$ वासवः (for वासव). —^{c}) K$_{6}$ V$_{1}$ B$_{0. 7}$ D$_{n1. n4}$ D$_{s}$ D$_{2. 3. 8}$ किं कत्थसे (for विक°). K$_{6}$ V$_{1}$ B$_{0. 6. 8}$ D$_{n1. n4}$ D$_{s}$ D$_{2-4. 8}$ मां किं च त्वं; G$_{1}$ मां किं बंधं; M$_{7}$ किमाबद्धः (for मां किं बद्धं). —^{d}) D$_{a4}$ T G$_{2. 3. 6}$ निरपत्रपः.

75 ^{a}) G$_{1}$ एवं च (for एव हि). Ś$_{1}$ K$_{1. 2}$ तदा; G$_{1. 2}$ यथा; M$_{7}$ परं (for पुरा). —^{b}) G$_{1}$ तथा; G$_{2}$ तावत् (for तदा). —^{c}) G$_{3. 6}$ निष्क्रांतं (for विक्रान्तं). —^{d}) G$_{1}$ पर्यंतं (for पर्याप्तं).

76 ^{b}) Ś$_{1}$ K$_{1. 2}$ ऋषिभिः (for वसुभिः). D$_{5}$ वसुभिः सह गुह्यकाः. —^{c}) G$_{2}$ [अ]पि (for वि·). K$_{7}$ B$_{0. 8}$ D$_{n1. n4}$ D$_{2-9}$ T G$_{1-3. 6}$ M$_{1. 5-7}$ पूर्वे (for सर्वे). —^{d}) D$_{a4}$ सयुतस्य (for मरुतश्च). V$_{1}$ विशां पते (for शचीपते).

77 ^{a}) D$_{4}$ जानामि. —^{cd}) D$_{5}$ ध्वस्तास् (for भग्नास्). D$_{7}$ T G$_{1-3. 6}$ समेता हींद्र विबुधा भग्नास्ते हि रणे मया.

78 K$_{7}$ om. (hapl.) 78. —^{a}) D$_{a4}$ G$_{1}$ सकृत् (for [अ]सकृत्). —^{c}) Ś$_{1}$ K$_{2}$ सपट्ट·; K$_{1}$ सपटु·; D$_{a4}$ कंटक·; D$_{n4}$ सकंट·; D$_{7}$ T G$_{1. 3. 6}$ सशृंग·; G$_{2}$ सटीक· (for सटङ्क·). K$_{6}$ B$_{0. 8}$ D$_{n1. n4}$ D$_{s}$ D$_{2. 3. 8}$ भग्नाः (for घोराः). ❀ C$_{a}$: सटङ्कशिखराः टङ्कच्छिन्नवदगम्यशिखरवन्तः । ❀

79 ^{b}) K$_{1. 6}$ V$_{1}$ B$_{0. 6-9}$ D$_{a3. a4}$ D$_{n1. n4}$ D$_{s}$ D$_{2.}$

न तु विक्रमकालोऽयं क्षमाकालोऽयमागतः ।
तेन त्वा मर्षये शक्र दुर्मर्षणतरस्त्वया ॥ ८०
त्वं मा परिणते काले परीतं कालवह्निना ।
नियतं कालपाशेन बद्धं शक्र विकत्थसे ॥ ८१
अयं स पुरुषः श्यामो लोकस्य दुरतिक्रमः ।
बद्ध्वा तिष्ठति मां रौद्रः पशुं रशनया यथा ॥ ८२
लाभालाभौ सुखं दुःखं कामक्रोधौ भवाभवौ ।
वधो बन्धः प्रमोक्षश्च सर्वं कालेन लभ्यते ॥ ८३
नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुः ।
सोऽयं पचति कालो मां वृक्षे फलमिवागतम् ॥ ८४

यान्येव पुरुषः कुर्वन्सुखैः कालेन युज्यते ।
पुनस्तान्येव कुर्वाणो दुःखैः कालेन युज्यते ॥ ८५
न च कालेन कालज्ञः स्पृष्टः शोचितुमर्हति ।
तेन शक्र न शोचामि नास्ति शोके सहायता ॥ ८६
यदा हि शोचतां शोको व्यसनं नापकर्षति ।
सामर्थ्यं शोचतो नास्ति नाद्य शोचाम्यहं ततः ॥ ८७
एवमुक्तः सहस्राक्षो भगवान्पाकशासनः ।
प्रतिसंहृत्य संरम्भमित्युवाच शतक्रतुः ॥ ८८
सवज्रमुद्यतं बाहुं दृष्ट्वा पाशांश्च वारुणान् ।
कस्येह न व्यथेद्बुद्धिर्मृत्योरपि जिघांसतः ॥ ८९

C. 12. 8302
B. 12. 227. 90
K. 12. 234. 89

---

8. 8 कालो हि (for यत्कालो). — c) K2 D4. 9 T2 M1. 6. 7 त्वा (for त्वं).

80 b) Dn4 क्षमाकोपसमागतः. — c) K4. 6 V1 B0. 6–9 Da3. a4 Dn1. n4 D2. 3. 6–8 त्वं; G2 ते (for त्वा). Da4 शर्मये (for मर्षये). — d) Ś1 K1. 2 दुर्धर्षण-; T2 सुदुर्धर्ष- (for दुर्मर्षण-). D7 T1 G1. 3. 6 सुदुर्धर्षतरो मया.

81 a) K4 B9 Dn1. n4 Ds2 D2. 3. 8 तं मां; K6 Ds1 तन्मां; K7 D4. 9 T2 G2 M1. 5–7 तं मा; V1 B0. 6–8 Da3. a4 D5 त्वं मां; D6 *मां; D7 T1 G1. 3. 6 एवं (for त्वं मा). D4. 9 परिगते; D5 °कृते (for °णते). — b) Da3 G1 परितं; M6 चरितं (for परीतं). D5. 7 -वज्रिणा (for -वह्निना). — d) D5 बद्धः; T2 बंधं (for बद्धं).

82 a) K1 अये (for अयं). Ś1 K1 (before corr.). 2. 4 मे; K1 (by corr.) मां; V1 हि (for स). ❀ Ca: कालस्य श्यामत्वं बन्धनसामर्थ्यादुग्रत्वद्योतकम्, न तु वर्णः श्यामस्तस्य । ❀ — b) M1. 6. 7 लोके संहरति प्रजाः (M7 क्रमः). — c) G1 तिष्ठसि. T2 G1–3. 6 मा (for मां). K6 Da4 रौद्र. — d) Some MSS. रसनया.

83 a) Ś1 K1. 2 लाभालाभं; B6. 7 Da3. a4 भावाभावौ (for लाभालाभौ). — c) K2. 6 B0 Dn1. n4 Ds D2. 3. 8 वधबंध-; Da4 बद्धो बंध-; D6 M7 वधो बंध-; D7 वधो बद्धः (for वधो बन्धः). K2 -प्रमोक्षैश्च; K6 Dn1 Ds1. s2 (by corr.) °क्षाश्च; K7 D4. 5. 6. 9 G2 प्रमोहश्च; Da3 Dn4 Ds1 (before corr.) M7 प्रमोक्षं च (for प्रमोक्षश्च). — d) K2 सर्वैं; K7 सर्व- (for सर्वं). D2 लभते.

84 b) Ś1 K1. 2 यस्तु कर्ता (by transp.). V1 विभुः (for प्रभुः). — c) Ś1 K1. 2 मां कालो (by transp.). — d) Ds1 वक्ष्ये (for वृक्षे). K7 D4. 6. 7. 9 T G1–3. 6 M1. 5–7 आहितं; B6 (marg. as in text). 9 आनतं (for आगतम्).

85 a) Ds1 यात्येव (for यान्येव). — b) V1 मुह्यते (for युज्यते). — K4 om. (hapl.) 85cd. — d) T2 दुःखः (for दुःखैः). V1 मुह्यते; B7 युज्यति (for °ते).

86 a) Ds1 D9 (by corr. as in text) कालज्ञा (for °ज्ञः). — d) K2 लोके (for शोके).

87 a) D7 यदासि (for यदा हि). K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 शोचतः; D7 T1 G1. 3. 6 शोचता (for शोचतां). K6 Ds कालो (for शोको). K7 यदा हि शोचतोशोच्य (sic). — b) B7 M7 व्यसनान् (for व्यसनं). Da3. a4 नापकर्षते. D7 T1 G1–3. 6 व्यसने नापकृष्यते. — c) Ś1 K2 शोचिते; K1 शोचते; K7 D4. 9 M5 शोचतां; D6 शोचता (for शोचतो). — d) T2 M1. 5–7 नैव; G1 [इ]त्यप- (for नाद्य). K1 हतः (for ततः). K6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2–4. 6. 8. 9 G2 [इ]त्यतोहं (B6 D4. 9 G2 ततोहं; B8 तेनाहं) नाद्य (V1 नास्ति; B0 माद्य) शोचिमि (K7 D4. 9 °ता; G2 °तुं); D5 ततोहं नास्मि शोचिता; D7 T1 G3. 6 देव शोचाम्यहं न च.

88 Before 88, B9 D5 T2 M5 ins. भीष्मः. — c) D7 T1 G1. 3. 6 प्रतिसंगृह्य (for °संहृत्य). — d) T2 प्रत्युवाच (for इत्यु°).

89 a) B9 सवज्रक्षततं स्वाहुं (sic); D7 T1 G1. 3. 6 वज्रमुद्यस्य चायांतं. — b) K7 D4. 6. 9 प्रचेतसः; D7 T

C. 12. 8302
B. 12. 227. 90
K. 12. 234. 90

सा ते न व्यथते बुद्धिरचला तत्त्वदर्शिनी ।
ब्रुवन्न व्यथसे स त्वं वाक्यं सत्यपराक्रम ॥ ९०
को हि विश्वासमर्थेषु शरीरे वा शरीरभृत् ।
कर्तुमुत्सहते लोके दृष्ट्वा संप्रस्थितं जगत् ॥ ९१
अहमप्येवमेवैनं लोकं जानाम्यशाश्वतम् ।
कालाग्नावाहितं घोरे गुह्ये सततगेऽक्षरे ॥ ९२
न चात्र परिहारोऽस्ति कालस्पृष्टस्य कस्यचित् ।
सूक्ष्माणां महतां चैव भूतानां परिपच्यताम् ॥ ९३
अनीशस्याप्रमत्तस्य भूतानि पचतः सदा ।
अनिवृत्तस्य कालस्य क्षयं प्राप्तो न मुच्यते ॥ ९४
अप्रमत्तः प्रमत्तेषु कालो जागर्ति देहिषु ।
प्रयत्नेनाप्यतिक्रान्तो दृष्टपूर्वो न केनचित् ॥ ९५
पुराणः शाश्वतो धर्मः सर्वप्राणभृतां समः ।
कालो न परिहार्यश्च न चास्यास्ति व्यतिक्रमः ॥ ९६
अहोरात्रांश्च मासांश्च क्षणान्काष्ठाः कला लवान् ।
संपिण्डयति नः कालो वृद्धिं वार्धुषिको यथा ॥ ९७
इदमद्य करिष्यामि श्वः कर्तास्मीति वादिनम् ।
कालो हरति संप्राप्तो नदीवेग इवोडुपम् ॥ ९८
इदानीं तावदेवासौ मया दृष्टः कथं मृतः ।
इति कालेन ह्रियतां प्रलापः श्रूयते नृणाम् ॥ ९९

G_1 सुदारुणान्; G_2 $M_{1.5.6}$ च दा°; $G_{3.6}$ दुरासदान् (for च वारुणान्). —^{c}) G_2 कस्याद्य (for कस्येह). B_7 बुद्धिं·. —^{d}) K_1 मन्योर् (for मृत्योर्). G_1 जिघांसता.

90 ^{a}) D_5 तु (for न). —^{c}) $K_{6.7}$ V_1 $B_{0.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_8 D_{2-9} T_1 $G_{3.6}$ ध्रुवं (for ब्रुवन्). G_1 व्यथते. K_6 Da_3 $Dn_{1.n4}$ D_8 $D_{2.3.8}$ [ऽ]द्य त्वं; B_8 त्वं वै; D_7 T_1 $G_{1-3.6}$ M_5 सत्त्वाद्; T_2 M_6 सत्यं (for स त्वं). —^{d}) K_6 V_1 $B_{0.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_8 $D_{2.3.5.8}$ धैर्यात्; K_7 $D_{4.6.9}$ सत्यं (for वाक्यं). $K_{4.6.7}$ $D_{4.6.9}$ -पराक्रमः (for °क्रम).

91 ^{c}) D_7 दृष्ट्वा (for लोके). —^{d}) D_7 (marg.) तथा (for दृष्ट्वा). ❀ Ca: संप्रस्थितं विनश्वरम्। ❀

92 ^{a}) G_1 एनम् (for एवम्). K_7 $D_{4.6.9}$ [इ]मं; V_1 [इ]द; D_5 [ए]तं; D_7 T_1 $G_{1-3.6}$ [ए]तल् (for [ए]नं). —^{b}) K_2 G_1 शाश्वतं (for अशाश्वतम्). —^{c}) D_5 कालाऽयवहिते घोरे; $G_{1.2}$ °ग्निवाहितं घोरे. —^{d}) Dn_4 मुह्ये सततगे क्षुरे (sic); D_6 गुह्ये तनुगगह्वरे.

93 ^{b}) B_7 कालः; D_4 काले (for काल-). K_6 $Ds_{1.s2}$ (by corr. as in text) D_5 M_5 -सृष्टस्य; $M_{1.6}$ -दृष्टस्य (for -स्पृष्टस्य). K_1 (marg.) $D_{4-6.9}$ कर्हिचित् (for कस्य°). —Da_4 om. 93^{cd}. —^{c}) K_7 $D_{4.9}$ शूक्ष्माणां. —^{d}) $K_{1.2.4}$ परिप(K_1 °व)श्यतां; K_7 $D_{4-6.9}$ °पालनं (D_5 °ने); Ds_1 °व्यव्यतां (sic) (for °पच्यताम्).

94 ^{a}) K_7 $D_{4.9}$ ईश्वरस्य; B_7 damaged (for अनीशस्य). G_2 $M_{1.6.7}$ अनिशं ह्य(G_2 स्या)प्रमत्तस्य. —^{b}) K_1 पदतः; B_7 damaged; D_8 (*sup. lin.* as in text) सचतः; T_2 परतः (for पचतः). —^{c}) K_1 अतिवृत्तस्य; T_2 अनिर्वृत्तस्य (for °वृत्तस्य). D_4 कामस्य (for कालस्य).

—^{d}) $Ś_1$ $K_{1.2.4}$ वशं; K_7 $D_{4.6.9}$ मु(K_7 सु)खं (for क्षयं). Da_4 D_5 मुह्यते (Da_4 °ति) (for मुच्यते).

95 ^{b}) G_1 लोके (for कालो). —^{c}) K_6 V_1 B_0 $Dn_{1.n4}$ D_8 $D_{2.3.8}$ अपक्रांतो (for अति°). $B_{6.7}$ $Da_{3.a4}$ यत्नेनाप्यनुपक्रांतो. —^{d}) G_1 दृष्टपूर्वेण (for °पूर्वो न).

96 ^{b}) K_7 सर्वे (for सर्व-). D_5 -धर्म- (for -प्राण-). $B_{7.8}$ (marg. as in text).$_9$ $Da_{3.a4}$ वरः (for समः). —^{d}) K_7 D_4 वा (for च). K_2 Da_4 [अ]पि (for [अ]स्य).

97 ^{a}) K_7 $D_{4.6.7.9}$ T $G_{3.6}$ अहोरात्राणि (for °रात्रांश्च). G_2 अहोरात्रान्क्षणान्काष्ठाः. —^{b}) $K_{4.6}$ $Dn_{1.n4}$ क्षणाः; T_2 क्षणं (for क्षणान्). $G_{1.3}$ काष्ठान् (for काष्ठाः). K_6 $Dn_{1.n4}$ लवाः कलाः; K_7 $B_{0.6-9}$ Da_3 $D_{2-6.8.9}$ लवान्कलाः (by transp.). V_1 कलाः काष्ठास्तथा लवान्; D_7 T_1 G_3 क्षणान्काष्ठान्कलान्लवान्; G_2 कलाः संवत्सरानपि. —^{c}) K_6 Da_3 $Dn_{1.n4}$ Ds_2 $D_{3.8}$ D_7 T_1 T_2 G_2 संपीडयति; K_7 Da_4 D_2 स पिंड°; $G_{1.3.6}$ स वर्ध° (for संपिण्ड°). K_6 B_8 (marg.) $Dn_{1.n4}$ D_8 $D_{2.3.8}$ यः (for नः). —^{d}) Da_4 बुद्धिर् (for वृद्धिं). G_1 वार्धिषिको; M_1 वार्ध्युं° (for वार्धु°).

98 ^{a}) M_1 इदमन्यत्करिष्यामः. —^{b}) G_1 यः (for श्वः). $K_{6.7}$ $D_{4-6.9}$ वादिनः; Dn_4 वादिनां (for वादिनम्). —^{c}) B_8 हसति (for हरति). —^{d}) K_7 $D_{4.9}$ [उ]लुपान्; $B_{0.6.7.8}$ (marg. as in text).$_9$ $Da_{3.a4}$ $Dn_{1.n4}$ $D_{2.3.8}$ द्रुमं; $D_{5.6}$ द्रुमान् (for [उ]डुपम्).

99 ^{a}) D_7 इदं तु (for इदानीं). $Ś_1$ K_1 इदानीमेव संजातो; $K_{2.4}$ °नीमपि यातोसौ. —^{c}) $K_{1.2.4}$ ह्रियते (K_1 °तौ); V_1 D_8 हीयतां; $B_{6.7}$ Da_4 क्रियतां; D_7

नश्यन्त्यर्थास्तथा भोगाः स्थानमैश्वर्यमेव च ।
अनित्यमध्रुवं सर्वं व्यवसायो हि दुष्करः ।
उच्छ्राया विनिपातान्ता भावोऽभावस्थ एव च ॥ १००
सा ते न व्यथते बुद्धिरचला तत्त्वदर्शिनी ।
अहमासं पुरा चेति मनसापि न बुध्यसे ॥ १०१
कालेनाक्रम्य लोकेऽस्मिन्पच्यमाने बलीयसा ।
अज्येष्ठमकनिष्ठं च क्षिप्यमाणो न बुध्यसे ॥ १०२
ईर्ष्याभिमानलोभेषु कामक्रोधभयेषु च ।
स्पृहामोहाभिमानेषु लोकः सक्तो विमुह्यति ॥ १०३
भवांस्तु भावतत्त्वज्ञो विद्वाञ्ज्ञानतपोन्वितः ।
कालं पश्यति सुव्यक्तं पाणावामलकं यथा ॥ १०४
कालचारित्रतत्त्वज्ञः सर्वशास्त्रविशारदः ।
वैरोचने कृतात्मासि स्पृहणीयो विजानताम् ॥ १०५
सर्वलोको ह्ययं मन्ये बुद्ध्या परिगतस्त्वया ।
विहरन्सर्वतोमुक्तो न क्वचित्परिषज्जसे ॥ १०६
रजश्च हि तमश्च त्वा स्पृशतो न जितेन्द्रियम् ।

C. 12. 8320
B. 12. 227. 108
K. 12. 234. 109

T G1–3. 6 M1. 5 म्रियतां (G2 °ता); M7 ह्रियता (for ह्रियतां). K7 D4. 5. 9 कालेन ह्रियमाणानां. — d) G1. 3. 6 प्रतापः; M7 विलापः (for प्रलापः).

100 a) K7 नृत्यंति; B6. 9 न संति (for नश्यन्ति). Dn4 तात; D7 T1 G1. 3. 6 च ते (for तथा). G1 भागाः. — b) K6 Dn1. n4 Ds D3 वा (for च). —K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8 transp. 100^{cd} and 100^{ef}. G2 M7 read 100^{cd} twice. — c) Da4 corrupt. —After 100^{cd}, K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 Kumbh. ed. ins. :

654* जीवितं जीवलोकस्य कालेनागम्य नीयते ।

[Da4 लोकनाथस्य (for जीवलोकस्य).]

while K7 D9 ins. :

655* अहं सुखीति नित्यं च मनसापि न चिन्तयेत् ।

[Cf. 101^{cd}. K7 च (for [अ]पि).]

— e) K6 Dn1 Ds D3. 7 T G2 M1. 7 उच्छ्रया; K7 उत्थाया (for उच्छ्राया). — f) K6 B0. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 G2 [ऽ]भावः स (for ऽभावस्थ). D5 भावाभावः स एव च; T2 भावोभावस्तथैव च.

101 b) G3. 6 सत्त्व- (for तत्त्व-). — c) G1 अयम् (for अहम्). B8 (marg. as in text). 9 D4 वेत्ति (for चेति). — d) B8 (marg.) न तु (for [अ]पि न). K6 बुध्यते; K7 V1 B6. 7. 8 (marg. as in text). 9 Da3. a4 D4. 6. 7. 9 T G1–3. 6 M1. 5–7 मन्यसे; D5 मन्यते (for बुध्यसे).

102 a) D5 [आ]गम्य (for [आ]क्रम्य). K7 D6. 9 लोकोयं (for लोकेऽस्मिन्). — b) K1. 2 पश्यमाने; K7 Ds2 (by corr. as in text) D4. 6. 9 G2 M1. 7 पच्यमानो (for °माने). — c) K7 D9 वा (for च). D4 ज्येष्ठं वापि कनिष्ठं वा; T1 G1. 3. 6 अतो ज्येष्ठं कनिष्ठं च. — d) K7 Dn4 D4. 6. 8. 9 T1 G1. 3. 6 क्षिप्यमानो; T2 °माणे (for °माणो). K7 Dn1 Ds2 D4. 7. 9 T G1. 3. 6 M5. 7 बुध्यते.

103 a) G2 M1. 7 ईर्ष्यातिमान-; G3. 6 ईर्ष्या(G3 °र्ष्यं)मानेषु (for °भिमान-). Da3 -लाभेषु; Dn4 -लोकेषु (for -लोभेषु). — c) K7 V1 B6 (marg. as in text) D4–6. 9 -मोहातिवादेषु; B9 -लोभाभिमानेषु; D7 T G1. 3. 6 M1. 6. 7 -मोहातिमानेषु (for -मोहाभि°). — d) B7–9 शक्तो (for सक्तो). K7 D4. 6. 7. 9 T G1. 3. 6 M1. 5–7 न बुध्यते (M5 °से); B9 G2 विमुह्यते; D3 न मुह्यति; D5 न मुच्यते (for विमुह्यति).

104 a) K2 B9 भावां(B9 °वा)स्तु; B0 भवांश्च; D7 T G1. 3. 6 M5. 7 स भवान् (for भवांस्तु). K7 D4. 6. 9 M1. 5 भव-; T2 M7 भूत- (for भाव-). — b) B8 (marg. as in text) विशुद्धात्मा (for विद्वाञ्ज्ञान-). Dn4 -तपोव्रतः (for -तपोन्वितः). — c) Ś1 K1 कालः (for कालं). Da4 वत्स्यति; G3. 6 पश्यसि (for पश्यति). K1 स व्यक्तं. — d) Ś1 अमलकं (for आम°).

105 a) K6 Ds1 -चरित-; K7 D4. 9 -चेष्टित- (for -चारित्र-). — b) G1 M7 -विशारद. M5 सर्वशास्त्रार्थकोविदः. — c) K6 Ds1 विरोचने; Da3. a4 वैरोचन; Dn1. n4 विवेचने (for वैरो°). Da4 D7 T G1. 3. 6 M1. 5–7 कृतार्थो (for कृतात्मा). — d) Dn4 D6. 7 T1 विजानता.

106 a) Da3 ह्यहं; Da4 ह्यदं (for ह्ययं). — b) K2. 4 परिणतस् (for °गतस्). — c) B8 सर्वदा (for सर्वतो-). — d) K4 परिषज्जते; K6 B6 Ds1 °सज्जते; V1 °मुह्यसे; B0. 7 Da3. a4 Dn1. n4 Ds2 D2. 3. 8 °सज्जसे; D6 °षज्यते; D7 T2 G1. 3. 6 M5. 7 च (D7 त्वं) विषीदसि; M1. 6 परिषज्यसे (for °षज्जसे).

107 a) Ś1 K1. 2. 4 चापि (for च हि). K4. 6 V1

C. 12. 8321
B. 12. 227. 109
K. 12. 224. 108

निष्प्रीतिं नष्टसंतापं त्वमात्मानमुपाससे ॥ १०७
सुहृदं सर्वभूतानां निर्वैरं शान्तमानसम् ।
दृष्ट्वा त्वां मम संजाता त्वय्यनुक्रोशिनी मतिः ॥ १०८
नाहमेतादृशं बुद्धं हन्तुमिच्छामि बन्धने ।
आनृशंस्यं परो धर्मो अनुक्रोशस्तथा त्वयि ॥ १०९
मोक्ष्यन्ते वारुणाः पाशास्तवेमे कालपर्ययात् ।
प्रजानामपचारेण स्वस्ति तेऽस्तु महासुर ॥ ११०
यदा श्वश्रूं स्नुषा वृद्धां परिचारेण योक्ष्यते ।
पुत्रश्च पितरं मोहात्प्रेषयिष्यति कर्मसु ॥ १११
ब्राह्मणैः कारयिष्यन्ति वृषलाः पादधावनम् ।
शूद्राश्च ब्राह्मणीं भार्यामुपयास्यन्ति निर्भयाः ॥ ११२
वियोनिषु च बीजानि मोक्ष्यन्ते पुरुषा यदा ।
संकरं कांस्यभाण्डैश्च बलिं चापि कुपात्रकैः ॥ ११३
चातुर्वर्ण्यं यदा कृत्स्नमुन्मर्यादं भविष्यति ।

Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 7. 8 G3. 6 M5 त्वां; G2 [अ]पि (for त्वा). K7 D4. 6. 9 रजस्तमश्च शूरं त्वां. —^{b}) K7 स्पृशते. K6 M6 जितेंद्रियः; K7 D4. 9 यतेंद्रियं (for जिते°). —^{c}) K6 न प्रीतिं; Da4 निष्पीष्टं (sic); D6 T2 M1. 5–7 निष्प्रीतिर्; D7 T1 G1. 3. 6 सुप्रीतो (for निष्प्रीतिं). K6 D6 न च (for नष्ट-). —^{d}) K6 V1 Bo Dn1. n4 Ds D2. 3. 6 आत्मानं त्व(V1 स)म् (by transp.). Ś1 K1. 2. 4 निषेवसे; Ds1 G1 M1 उपासते (for °ससे).

108 ^{a}) D6 हृदयं (for सुहृदं). —^{b}) B6 D7 T G1–3. 6 M1. 5–7 -चेतसं (for -मानसम्). —^{c}) T2 G1. 3 M1. 6. 7 त्वा (for त्वां). G1 अनु- (for मम). T2 संज्ञाता; G1 -संघाता (sic) (for संजाता). —^{d}) K7 Da4 D4 -क्रोशनो; M7 -क्रोशने (for -क्रोशिनी).

109 D5 om. 109–110. —^{a}) T2 सोहम् (for नाहम्). Ś1 K1. 2 B8 (marg.) वृद्धं; Da4 बुद्धिर्; Dn1 D6. 7 T2 G1. 3. 6 बद्धं; Dn4 बुद्धिं; G2 बंधुं; M1. 7 बंधं (for बुद्धं). —^{b}) G1 अहम् (for हन्तुम्). D7 T2 G1. 3. 6 M7 बंधनैः. ❀ Ca: बुद्धम्, उत्पन्नतत्त्वज्ञानम् । बन्धने, स्थितमिति शेषः । ❀ —^{c}) K6. 7 Da4 आ(Da4 अ)नृशंस्य- (for °शंस्यं). G2 धर्मे (for धर्मो). —^{d}) Ś1 K1. 2. 4 त्वनुक्रोशस्; K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–4. 8. 9 M5 ह्यनु° (for अनु°). K6 Bo. 7. 8 Da3 Dn1. n4 Ds D2. 3. 8 च मे; K7 D7 T G1. 3. 6 M5. 7 [ऽ]स्ति मे; V1 B6. 9 Da4 G2 M1. 6 हि मे; D4. 6. 9 [ऽ]पि मे (for तथा).

110 D5 om. 110 (cf. v. l. 109). —^{a}) K4. 7 V1 Bo. 7 Da4 मोक्षंते (for मोक्ष्यन्ते). K7 वारुणेः; Da4 वरुणाः. —^{b}) K6 Ds1 कार्य- (for काल-). —^{c}) B6 (marg.) अविचारेण; B8 (marg.) अपकारेण; Bom. ed. उपचारेण (for अप°). —^{d}) K7 Da4 G1 महासुरः; Ds2 (by corr. as in text) °स्मसु (for °सुर).

111 ^{a}) K7 D9 श्वश्रूः; Ds1 D7 श्वश्रू (for श्वश्रूं). Ś1 K1 (by corr. as in text). 4. 6 B7 Da3 Dn1 Ds1. s2 (by corr. as in text) D2. 3 (by corr. as in text). 5. 6. 8 T2 G1 M1. 5. 6 स्नुषां (for स्नुषा). K7 D5. 9 T2 वृद्धा. —^{b}) M1. 6 अविचारेण (for परि°). K7 D4. 9 भोक्ष्यते; B6 योक्ष्यति; B9 मोक्षते; D2 योक्षते; M1. 6. 7 (*sup. lin.* as in text) मोक्ष्यसे (for योक्ष्यते). Ś1 K1. 2. 4 परिचारे नि(K1 न)योक्ष्यते. —^{d}) G1 प्रेषयिष्यंति.

112 ^{b}) T2 वृषलान्; G2 वृषळः (for वृषलाः). G1 पद- (for पाद-). —^{c}) K1 शुद्धाश्च; B8 (marg.) शूद्रश्च (for शूद्राश्च). Bo Da4 D3 ब्राह्मणी-; G1 ब्राह्मणं (for ब्राह्मणीं). —^{d}) D7 निर्भयात्. B8 (marg.) उपयास्यति निर्भयः. — After 112, T2 ins.:

656* ब्राह्मणाश्चापि शूद्राश्च भोगार्थे.कल्पयन्त्युत ।

113 ^{a}) K6 B7 Da3 Dn1. n4 Ds D2. 5. 6. 8 विमोक्ष्यंति (D6 °ते); K7 V1 Bo. 6. 8. 9 Da4 D4. 9 G2 M1. 5–7 च मोक्ष्यंति (K7 D4. 9 °क्ष्यंते; B9 °क्षंति) (for च बीजानि). —^{b}) Ś1 K4 मोक्षंते; K6. 7 V1 B6–9 Da3. a4 Dn1. n4 Ds D2–4. 6. 8. 9 G2 M1. 5–7 बीजानि; Bo D5 वीर्याणि (for मोक्ष्यन्ते). Ś1 K1. 2. 4 पुरुषाधमाः (for °षा यदा). —^{c}) Ds1 कांश्य- (for कांस्य-). ❀ Ca: कांस्यैः पानपात्रैः । भाण्डैः मृत्पात्रैः ॥ Cv: कांस्यभाण्डैर्भोजनपात्रादिकांस्यभाण्डैः । संकरं नानावर्णानामन्नदानादिकम् । ❀ —^{d}) K6. 7 V1 Bo. 8 (marg.). 9 Da3 Dn1. n4 Ds D2–6. 8. 9 चैव (for चापि). K6. 7 D4. 7. 9 T1 G1–3. 6 कुपात्र(K6 °त्रि)के; Dn4 Ds D2. 3. 8 °त्रिकैः (for °त्रकैः). ❀ Ca: कुपात्रैः भोजनपात्राद्यपवित्रपात्रैः, बलिं देवपूजाम् । ❀

114 ^{a}) B9 D3 कृच्छ्रम् (for कृत्स्नम्). —^{b}) Dn1. n4 D7 T G1–3. 6 अमर्यादं (for उन्म°). —^{c}) B8 एकैकस्तु; T2 G2 °कश्चस्; M7 °कास्ते (for °कस्ते). D7 महा- (for तदा). T2 पाशं; M7 पाशाः (for पाशः). —^{d}) K6 Bo. 9 Dn1. n4 Ds2 D2. 3. 6–8 T G1–3. 6 M1.

एकैकस्ते तदा पाशः क्रमशः प्रतिमोक्ष्यते ॥ ११४
अस्मत्तस्ते भयं नास्ति समयं प्रतिपालय ।
सुखी भव निराबाधः स्वस्थचेता निरामयः ॥ ११५
तमेवमुक्त्वा भगवाञ्शतक्रतुः
प्रतिप्रयातो गजराजवाहनः ।
विजित्य सर्वानसुरान्सुराधिपो
ननन्द हर्षेण बभूव चैकराट् ॥ ११६
महर्षयस्तुष्टुवुरञ्जसा च तं
वृषाकपिं सर्वचराचरेश्वरम् ।
हिमापहो हव्यमुदावहंस्त्वरं-
स्तथामृतं चार्पितमीश्वराय ह ॥ ११७
द्विजोत्तमैः सर्वगतैरभिष्टुतो
विदीप्ततेजा गतमन्युरीश्वरः ।
प्रशान्तचेता मुदितः स्वमालयं
त्रिविष्टपं प्राप्य मुमोद वासवः ॥ ११८

C. 12. 8332
B. 12. 227. 119
K. 12. 234. 119

इति श्रीमहाभारते शान्तिपर्वणि विंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥

5.6 परिमोक्ष्य(D2.8 G1 °क्ष)ते; B7 Da3 प्रतिमोक्ष्यति; B8 (marg.) प्रविमोक्ष्यते; Da4 परिमोक्ष्यति; Ds1 परिमोक्ष्यसे (for प्रतिमोक्ष्यते).

115 a) D7 T1 G1.3.6 अस्मात्तव; T2 अस्मत्तोत्र (for °त्तस्ते). — b) D5.7 T G1–3.6 M1 परिपालय. — d) K6 B6 Ds1 सुस्थचेता; K7 D4.6.9 स्वस्थो भव (for स्वस्थचेता). Ś1 K2.4 निराश्रयः; K1 °सवः (sic); M6 °मयं (for °मयः).

116 Before 116, Dn4 D5 M5 ins. भीष्मः. — c) G2 अमरान् (for असु°). D7 असुरान्बहूंस्तदा; T1 असुराधिपान्बहून्; T2 °धिपान्बली; G1 सुरात्स्वरान्बहूम् (sic); G3.6 असुराधिपान्बलान् (for असुरान्सुराधिपो). — d) D7 T1 G1.3.6 ननाद; M7 ननर्द (for ननन्द). D7 T1 G1.3.6 देवराट् (for चैक°).

117 a) D2 om. (? hapl.) from ष्टुवुरञ्जसा up to सर्वगतैरभिष्टु (in 118a). — b) D6 वृषाकपिः. — c) V1 B6 (marg.).8 (marg. as in text) हुताशनो (for हिमापहो). K6 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D3.8 उवाह (Bo °च) चाध्वरे (K6 °रं); K7 D4.9 G2 M7 उदावहद्ध्व(K7 °द्ध)रं; D5 उदारहत्परं; D6 उवाह चाघस; D7 T1 G3.6 उपावहस्त्वं; G1 उपावहत्पुरस; M1 उदावहं चरं; M5 °हद्वरंस (sic) (for °हंस्त्वरंस). — d) G1 तथा वरं; G3.6 त्वं चामृतं (for तथामृतं). Ś1 K1.2 B8 D5.7 G2 M7 चापि तम्; T G1.3.6 M5 चामृतम्; M1.6 चापि तद् (for चार्पितम्). K6 V1 Bo.6.7.9 Da3.a4 Dn1.n4 Ds D3.8 ईश्वरोपि हि; B6 (marg.) °राय च; B8 °रो नृप; D5.7 °रं महत्; T1 G1.3.6 °रावहः (for °राय ह). G2 हि; M6 lacuna (for ह). K7 D4.6.9 तथामृतं चा(K7 वा)प्यमि(K7 °मृ)तं तदीश्वरः.

118 D2 om. up to रभिष्टु (cf. v. l. 117). — a) K7 D4–6.9 तत्र गतैर्; V1 T2 G2 M1.5 सत्रगतैर्; Bo.8 M6.7 सत्रशतैर्; D7 T1 G1.3.6 मंत्रिगणैर् (for सर्वगतैर्). — b) Ś1 K1.2 प्रदीप्त- (for वि°). D7 T G1.3.6 शत- (for गत-). — c) G2 -तेजा (for -चेता). B8 सुरालयं (for स्वमा°). — d) K4 निविष्टपं; K7 B7 त्रिपि° (for त्रिवि°).

Colophon. —*Sub-parvan:* Ś1 K1.2.4.6.7 V1 Bo. 6–9 Da3.a4 Dn1.n4 Ds D2–9 T G1.2.6 M1.5–7 मोक्षधर्म. —*Adhy. name:* Ś1 K1.2.4 बलि(Ś1 K1 °डि)नमुचि(K1 °दि)संवादः; K7 V1 Bo.7.8 Da3.a4 Dn1 D3–9 G6 बलिवासवसंवादः; B6.9 M8 पुनर्बलिवासवसंवादः; T2 इंद्रबलिसंवादः; M6.7 द्वितीयबलिसंवादः. —*Adhy. no.* (figures, words or both): B7 Dn4 Da2 53; Dn1 D7 T1 G1.3.6 M5 54; T2 G2 64; M1. 6.7 52. —*Śloka no.:* Dn1 119; Dn4 118; D8 121.

२२१

C. 12. 8333
B. 12. 229[8]. 1
K. 12. 236. 1

युधिष्ठिर उवाच ।
पूर्वरूपाणि मे राजन्पुरुषस्य भविष्यतः ।
पराभविष्यतश्चैव त्वं मे ब्रूहि पितामह ॥ १
भीष्म उवाच ।
मन एव मनुष्यस्य पूर्वरूपाणि शंसति ।
भविष्यतश्च भद्रं ते तथैव नभविष्यतः ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
श्रिया शक्रस्य संवादं तन्निबोध युधिष्ठिर ॥ ३
महतस्तपसो व्युष्ट्या पश्यल्ँलोकौ परावरौ ।
सामान्यमृषिभिर्गत्वा ब्रह्मलोकनिवासिभिः ॥ ४
ब्रह्मैवामितदीप्तौजाः शान्तपाप्मा महातपाः ।
विचचार यथाकामं त्रिषु लोकेषु नारदः ॥ ५
कदाचित्प्रातरुत्थाय पिस्पृक्षुः सलिलं शुचि ।
ध्रुवद्वारभवां गङ्गां जगामावततार च ॥ ६

221

☞ The Bom. (GK) ed. wrongly omits No. 228 in counting its adhyāyas, so that its adhy. 229 is really 228. The mistake continues to the end of the Śāntiparvan. In the marginal C-B-K references, the correct adhy. number (given in the Chitrashala edition) is, from this adhy. onwards, enclosed within square brackets.

1 ^{a}) K$_6$ Ds$_1$ पूर्वं; Dn$_4$ पूर्वे (for पूर्व-). G$_2$ ब्रह्मन् (for राजन्). — ^{b}) K$_7$ D$_4$ भविष्यता (D$_4$ °ताः). — B$_9$ om. (hapl.) 1^c–2^d. V$_1$ reads 1^c–2^d on marg. — ^{c}) ❀ Ca: भविष्यतः कल्याणफलभाजः । पराभविष्यतः दुःखभाजः । ❀ — ^{d}) K$_{4.6.7}$ V$_1$ B$_{0.6–8}$ Da$_{3.a4}$ Dn$_{1.n4}$ Ds D$_{2–6.8.9}$ G$_2$ M$_{1.6.7}$ तन् (for त्वं).

2 B$_9$ om. 2 (cf. v. l. 1). V$_1$ reads 2 on marg. D$_6$ om. the ref. — ^{a}) D$_7$ T$_1$ G$_{1.3.6}$ तप (for मन). — ^{c}) Ś$_1$ (before corr.) K$_2$ भविष्यति च; K$_1$ °ष्यंतश्च. Ś$_1$ K$_2$ भद्रांते (for भद्रं ते). — ^{d}) Ś$_1$ K$_{1.2.4}$ वि(K$_4$ च)करिष्यतः; V$_1$ विभवि° (for नभवि°).

3 ^{c}) Da$_3$ संबाधं; Da$_4$ संवादस्. — ^{d}) K$_1$ Dn$_1$ D$_6$ T$_2$ G$_{1.2}$ M$_1$ तं (for तन्).

4 ^{a}) K$_1$ महतास्. K$_6$ बुद्ध्या; Dn$_4$ व्युष्टा; D$_5$ व्युष्य (for व्युष्ट्या). Da$_4$ महतास्तपनो बुद्ध्या. ❀ Ca: व्युष्ट्या फलेन ॥ Cs: व्युष्ट्या क्रियया, प्रकाशनेन । ❀ — ^{b}) K$_1$ पुरावरौ; B$_8$ Da$_4$ परापरौ (for °वरौ). T G$_{1.3.6}$ पश्यल्ँलोकान्सनातनान्; G$_2$ M$_{1.5–7}$ °कान्प(M$_6$ °न्व)राव(M$_1$ °न्प-; M$_6$ °न्व)रान्. — ^{c}) K$_1$ मासान्यम्; D$_4$ सोमा° (for सामा°). M$_7$ मुनिभिर् (for ऋषिभिर्). Da$_{3.a4}$ श्रुत्वा (for गत्वा). K$_7$ D$_{5.6.9}$ सार्धं ब्रह्मर्षिभिर्ग(D$_5$ °र्ज्ञ)त्वा. ❀ Ca: सामान्यं समत्वम् ॥ Cv: समं सहेत्यर्थः । ❀

5 ^{a}) K$_{6.7}$ V$_1$ B$_{0.6–9}$ Da$_{3.a4}$ Dn$_{1.n4}$ Ds D$_{2–6.8.9}$ T G$_{1–3.6}$ M$_{1.5–7}$ ब्रह्मेव (for ब्रह्मैव). K$_1$ Da$_4$ (before corr.) D$_4$ [अ]सित-; G$_1$ [अ]भूत- (for [अ]मित-). Da$_4$ -दीप्त्यौजाः; D$_4$ -दीप्तोजाः. — ^{b}) K$_{4.6}$ महातपा (K$_6$ °पः). — ^{c}) D$_6$ विचारयन् (for विचचार). D$_7$ T G$_{1.3.6}$ यथाकालं (for °कामं).

6 K$_1$ om. 6. — ^{b}) Ś$_1$ K$_{2.7}$ D$_{4.9}$ पिस्प्रक्षुः; B$_9$ [अ]पस्पृक्षुः; Da$_3$ पिस्प्रष्टुः; Da$_4$ पित्फुष्टु (sic); D$_5$ T$_1$ सिस्पृक्षुः; D$_7$ G$_1$ विस्पृक्षुः; G$_2$ विविषुः; M$_6$ पस्प्रक्षुः; M$_7$ विस्प्रक्षुः (for पिस्पृक्षुः). K$_7$ शलिलं. K$_{4.7}$ Da$_{3.a4}$ D$_{4.6.7.9}$ G$_{1.3.6}$ M$_{1.5.6}$ शुचिः (for शुचि). — ^{c}) Ds$_2$ (before corr.; marg. as in text) शुभ-; M$_{1.5.6}$ ध्रुत्रं (for ध्रुव-). K$_6$ Ds$_1$ Cs -वहां; G$_{3.6}$ -पथां (for -भवां). D$_4$ तुवस्वारिचरो गंगां (sic). ❀ Ca: ध्रुवद्वारभवां [ध्रु]वस्थनारायणपद्यङ्गुष्ठप्रभवाम् ॥ Cp: श्रीविष्णुपदात् ध्रुवद्वारात् प्राप्ताम् ॥ Cs: ध्रुवद्वारवहां ध्रुवनक्षत्रमार्गगामिनीमाकाशगङ्गाम् । ❀ — ^{d}) Da$_{3.a4}$ वितताार; T$_2$ च ततार (for [अ]वत°). G$_2$ जगाम वदतां वरः. — After 6, Kumbh. ed. Cv ins.:

657* मेरुपादोद्भवां गङ्गां नारायणपदच्युताम् ।
स वीक्षमाणो हृष्टात्मा तं देशमभिजग्मिवान् ।
यं* देवजवा[? ना]कीर्णं सूक्ष्मकाञ्चनवालुकम् ।
गङ्गाद्वीपं समासाद्य नानावृक्षैरलंकृतम् ।
सालतालाश्वकर्णानां चन्दनानां च राजिभिः । [5]
मण्डितं विविधैः पुष्पैर्हंसकारण्डवायुतम् ।
नदीपुलिनमासाद्य स्नात्वा संतर्प्य देवताः ।
जजाप जप्यं धर्मात्मा तन्मयत्वेन भास्वता ।

सहस्रनयनश्चापि वज्री शम्बरपाकहा ।
तस्या देवर्षिजुष्टायास्तीरमभ्याजगाम ह ॥ ७
तावाप्लुत्य यतात्मानौ कृतजप्यौ समासतुः ।
नद्याः पुलिनमासाद्य सूक्ष्मकाञ्चनवालुकम् ॥ ८
पुण्यकर्मभिराख्याता देवर्षिकथिताः कथाः ।
चक्रतुस्तौ कथाशीलौ शुचिसंहृष्टमानसौ ।
पूर्ववृत्तव्यपेतानि कथयन्तौ समाहितौ ॥ ९

अथ भास्करमुद्यन्तं रश्मिजालपुरस्कृतम् ।
पूर्णमण्डलमालोक्य तावुत्थायोपतस्थतुः ॥ १०
अभितस्तूदयन्तं तमर्कमर्कमिवापरम् ।
आकाशे ददृशे ज्योतिरुद्यतार्चिःसमप्रभम् ॥ ११
तयोः समीपं संप्राप्तं प्रत्यदृश्यत भारत ।
तत्सुपर्णार्कचरितमास्थितं वैष्णवं पदम् ।
भाभिरप्रतिमं भाति त्रैलोक्यमवभासयत् ॥ १२

C. 12. 8245
B. 12. 229[8]. 13
K. 12. 235. 18

[(L. 8) ❀ Cv : तन्मयत्वेन तत्प्रधानत्वेन भास्वता मनसा। ❀]

7 b) V1 Da3 संबर-; D4 शबर- (for शम्बर-). D7 T G1. 3. 6 M1. 5–7 -वृत्रहा (for -पाकहा). — c) Bo -युष्टायास् (for -जु°). M1. 6 तस्यां देवर्षिजुष्टायां.

8 a) K7 D4. 9 तावाप्लुतौ; Da4 Dn4 तावप्लुत्य (for तावा°). K7 D9 यथान्यायं; D5. 7 T1 G1. 3. 6 महात्मानौ (for यता°). — b) B6 D5 कृतकृत्यौ; Da4 भूतकृतौ; Dn4 कृततप्यौ (for °जप्यौ). Ś1 K1. 2. 4. 6 V1 Bo. 6 Dn1. n4 D2. 3. 8 समासतः; Ds1 °वृतः; Ds2 °वृतौ (for °सतुः). — c) T2 नद्यां. D7 T G2. 3. 6 पुळिनम्. — d) K7 D4. 9 शूक्ष्म-; D7 T1 G1 मुक्ता-; M6 सूक्ष्मं (for सूक्ष्म-). G1 -कंचन- (for -काञ्चन-).

9 a) M1 पुण्यं (for पुण्य-). K7 D4. 9 -कर्मिभिर् (for -कर्मभिर्). ❀ Cs : पुण्यकर्मभिः भरतभगीरथादिभिः कथानायकैर्हेतुभिराख्याताः प्रवर्तिताः । ❀ — b) V1 B6. 7. 8 (marg. as in text). 9 -चरिताः; Da4 -कथिता (for °ताः). Da3 तथा; Da4 कथा. — c) Da4 चक्रतुसौ (sic) (for °तुस्तौ). K6 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 तथा(Da4 D5 °दा)सीनौ; K7 यथाशीलौ; B8 (orig.) तथाशीलौ; D6 कथासीनौ (for °शीलौ). — d) K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T G1–3. 6 M1. 5–7 महर्षि(K7 V1 B3 [orig.] D4. 5. 9 G2 M1. 5 [*inf. lin.*]. 6. 7 ब्रह्मर्षि)कथितास्तथा (D5 °ताः कथाः; D7 T1 G1. 3. 6 M1. 6. 7 °तास्तदा). — e) K1. 2 पूर्ववृत्तव्युपेतानि; Bo. 9 Da3. a4 °त्तान्य(Da4 °ण्य)पेतानि; B6 D7 T1 G1. 3. 6 °त्तान्यतीतानि; T2 M1. 5–7 °त्तव्यतीतानि.

10 b) Ś1 K1. 2 G3. 6 -परिष्कृतं; K7 D4. 6. 9 -समावृतं (for -पुरस्कृतम्). B7 रश्मिजालमुपस्कृतं. — c) Da4 पूर्व- (for पूर्ण-). K7 D4. 9 आवृत्य (for आलोक्य). — After 10, Kumbh. ed. ins.:

658* विविक्ते पुण्यदेशे तु रममाणौ मुदा युतौ ।
ददृशातेऽन्तरिक्षे तौ सूर्यस्योदयनं प्रति ।
ज्योतिर्ज्वालसमाकीर्णं ज्योतिषां गणमण्डितम् ।

11 ab) Da4 Dn4 Ds1 तुदयंतं. K7 D4. 9 तदर्काद् (for तमर्कम्). K4 अर्थम्; G2 अर्क (for अर्कम्). G1 [अ]परः (for °रम्). D7 T G3. 6 अर्कमर्क इवापरः. — c) K1 सदृश-; D5 सदृशं; T1 G1 सदृशो (for ददृशे). Bo. 6–9 आकाशे तौ ददृशतुर्; Da3 °शे तौ ददर्शतुर्; Da4 °शे तौ दढशतुर् (sic). — d) Ś1 K1. 2. 4 उद्यदर्क-; K6 Da4 Ds1 उद्यतार्चि-; K7 D6 M1. 6 उद्यदर्चि-; D4. 9 °दर्चिः-; D7 T1 G1. 3. 6 °तार्क- (for °तार्चिः-). Ś1 K1. 2. 4 -महाप्रभं (for -सम°). — After 11, K7. B6–9 Da4 D4. 6. 7. 9 T G1–3. 6 M1. 5–7 Kumbh. ed. ins.:

659* अर्कस्य तेजसा तुल्यं तद्भास्करसमप्रभम् ।

[K7 D4. 9 G2 M1. 6. 7 ज्वलद्भास्करसंनिभं (M1. 6. 7 °सप्रभं) (for the post. half).]

12 a) D7 T G1. 3. 6 M1. 5–7 संप्राप्य (for °प्तं). — b) D9 -दर्शत (for -दृश्यत). K7 D4 भास्वरं; B9 Da4 भारतः; D6 भासुरं. — c) K6 D5 सुवर्णार्क- (for सुप°). B8 (marg.) -रचितम् (for -चरि°). — d) D6 आस्थितैर् (for °तं). ❀ Ca. p. v : वैष्णवं पदम्, आकाशम् । ❀ — e) K1 अप्रतिमां (for °मं). T2 ताभिस् (for भाति). K7 D4. 6. 9 M7 भाभिरप्रतिरूपाभिस्; B6. 7. 9 Da4 Ds2 (before corr.) भास्क(B6 marg. as in text)रप्रतिमं भाति (Da4 °भिस्); D7 T1 G1. 3. 6 भाभिरप्रातिमां ताभिस्; M1. 5. 6 °मा भाभिस्. — f) D5 इव; T2 अथ (for अव-). K4 -भासयेत्; K7 V1 D8 M7 -भासयन् (for °यत्). K1 त्रैलोक्यमभवामयन् (sic). — After 12, Kumbh. ed. ins.:

660* तं दृष्ट्वा तौ तु विक्रान्तौ प्राञ्जली समुपस्थितौ ।
क्रमात्संप्रेक्ष्यमाणौ तौ विमानं दिव्यमद्भुतम् ।
तस्मिंस्तदा सतीं कान्तां लोककान्तां परां शुभाम् ।
धात्रीं लोकस्य रमणीं लोकमातरमच्युताम् ।

C. 12. 8346
B. 12. 229[8]. 14
K. 12. 235. 21

दिव्याभिरूपशोभाभिरप्सरोभिः पुरस्कृताम् ।
बृहतीमंशुमत्प्रख्यां बृहद्भानोरिवार्चिषम् ॥ १३
नक्षत्रकल्पाभरणां ताराभक्तिसमस्रजम् ।
श्रियं ददृशतुः पद्मां साक्षात्पद्मतलस्थिताम् ॥ १४
सावरुह्य विमानाग्रादङ्गनानामनुत्तमा ।
अभ्यगच्छत्त्रिलोकेशं शक्रं चर्षिं च नारदम् ॥ १५
नारदानुगतः साक्षान्मघवांस्तामुपागमत् ।
कृताञ्जलिपुटो देवीं निवेद्यात्मानमात्मना ॥ १६
चक्रे चानुपमां पूजां तस्याश्चापि स सर्ववित् ।
देवराजः श्रियं राजन्वाक्यं चेदमुवाच ह ॥ १७
का त्वं केन च कार्येण संप्राप्ता चारुहासिनि ।
कुतश्चागम्यते सुभ्रु गन्तव्यं क्व च ते शुभे ॥ १८
श्रीरुवाच ।
पुण्येषु त्रिषु लोकेषु सर्वे स्थावरजङ्गमाः ।
ममात्मभावमिच्छन्तो यतन्ते परमात्मना ॥ १९
साहं वै पङ्कजे जाता सूर्यरश्मिविबोधिते ।

---

13 [a]) K6 D4.9 तत्राति-; K7 V1 B0.6.8 (last two marg. as in text) Da4 Dn1.n4 Ds D2.3.6.8 तत्राभि-; B7.9 Da3 D5 तत्रापि (for दिव्याभि-). D7 T G1-3.6 दिव्याभिरभिरूपाभिर्. — [b]) Ś1 K1.2 तिरस्कृतं; K4 V1 G2 M1.6.7 पुरस्कृतं; K7 D4.6.9 अलंकृतां (K7 °तं) (for पुरस्कृताम्). — [c]) K1 Da4 बृहस्पती(Da4 °ति)म् (hypermetric) (for बृहतीम्). K1 G1 -प्रख्यं; D6 -प्रक्षां (for -प्रख्यां). — [d]) Dn4 [आ]र्षिकं; D6 [अ]र्चिषां.

14 [a]) G2 -कल्पाभरणं (for °भरणां). — [b]) Ś1 K1.2.4 Dn1 ताराकल्प-; K7 V1 D7 T G1.3.6 M1.5-7 तारापंक्ति- (for °भक्ति-). K1 D4 -समप्रजं; T2 -समुत्स्रजं; M1 -सहस्रजं (for -सम°). — [c]) K1 ददृशतः (for °शतुः). G1 प्राप्तां (for पद्मां). D7 T1 G3.6 श्रियं ददर्शतुः प्राप्तां. — [d]) V1 B0.6-9 Da3.a4 Dn4 Ds D2.3.5.6.8 -दल-; D7 G1 M5 -दले; T G2.3.6 -दळे; M1.6 -तले (for -तल-). K1 सत्पद्मतलसंस्थितां; K6 साक्षात्पदमवस्थितां; Dn1 °त्पद्मदलास्थितां.

15 [a]) D6 साविरुह्य (for साव°). B9 Dn1 M5 विमानाग्र्याद्; G2 °नाग्राम् (for °नाग्राद्). — [b]) Da4 सर्वंगानाम् (for अङ्गनानाम्). K6 D4 अनुत्तमं (D4 °म). — [c]) K6.7 V1 B0.6-9 Da3.a4 Dn1.n4 Ds1 D2-5.8 T1 G2 M6 अभ्यागच्छत् (for अभ्य°). Dn4 त्रिलोकेदं (for °केशं). — [d]) K7 D4.9 देवर्षिं-; D7 G1.3.6 च ऋषि- (for चर्षिं च). K6 V1 B0.6-9 Da3.a4 Dn1.n4 Ds D2.3.5.6.8 देवर्षिं चापि नारदं.

16 Da3 reads 16 on marg. — [a]) B9 नारदानुगतं; D7 T G1.3.6 M1.5.6 °गतं (for °गतः). — [b]) K6 Ds1 मघवा ताम्; D7 T G1.3.6 M5.7 मघवंतम् (for °वांस्ताम्). D5 ताम् (for ताम्). Da4 उपागमन्. — [c]) Dn1 कृतांजलि- (for कृताञ्जलि-). Ś1 K2 D7 T2 G1 M7 -पुटा (for -पुटो). Ś1 K2.6 D7 T2 G1 M7 देवी; G2 भूत्वा; G3.6 देवो (for देवीं). — G1 om. 16^{d}–18^{c}.

17 G1 om. 17 (cf. v. l. 16). T1 om. (hapl.) 17–19. — [a]) Ś1 K1.2.4 सानुपमां; K6 V1 Ds1 चामुत्तमां; K7 Da4 चानूपमां; M1 च परमां (for चानुपमां). Dn4 पूजा. — [b]) B8 (marg. as in text) भूत्वापि; Da4 [अ]पि सर्व-; G2 सत्कृत्य (for चापि स). D7 G3.6 सर्वजित् (for °वित्). M1.5-7 देव्याः सत्कृत्य सर्ववित्. — [c]) Da4 श्रिया (for श्रियं). D7 G3.6 देवीं; T2 चेदं (for राजन्). — [d]) Da4 तेदम्; D7 T2 G3.6 राजन् (for चेदम्).

18 G1 om. 18^{abc} (cf. v. l. 16). T1 om. 18 (cf. v. l. 17). Before 18, MSS. ins. शक्र उवाच. — [a]) Ś1 K1.2.4 कासि (for का त्वं). K6 om. च. — [b]) K6.7 Da4 Ds1 D5.7 (before corr.) T2 G2 M1.7 चारुहासिनी. — [c]) Ś1 K1.2 Da4 चागमनं (Da4 °ने) (for °म्यते). D7 कुतश्चात्रागता देवि. — [d]) D7 G1 कार्यं वा किं (for गन्तव्यं क्व). K1 शुचे; D6 शुभं.

19 T1 om. 19 (cf. v. l. 17). — [a]) D7 G1.3.6 पुण्येन (for पुण्येषु). Ś1 K1.4 तत्र (for त्रिषु). — [c]) D5 K4.7 D4.9 मामात्म-; B0 ममार्थ-; B9 मयात्म-; ममानु- (for ममात्म-). Ds1 -नावम्; D7 G1.3.6 -भवम् (for -भावम्). Da3.a4 इच्छंति. — [d]) K6 यजंते (for यतन्ते). D7 G3.6 चिरम्; G1 चितम् (for परम्). ❀ Cv (reading परमात्मना as one word): परमात्मना परमप्रयत्नेन। ❀

20 [b]) Da4 सूर्यं (for सूर्य-). Ś1 K1.2.4 -निबोधिते; B8 (marg.) -विराजिते; D4.9 -विबोधिता; D7 T G1.3.6 M1.5-7 -प्रबोधिते (M1 °ता) (for -विबो°). — [d]) K6 Da4 Ds1 पद्मा श्री-; K7 D4.6.9 पद्माक्षी (K7

भूत्यर्थं सर्वभूतानां पद्मा श्रीः पद्ममालिनी ॥ २०
अहं लक्ष्मीरहं भूतिः श्रीश्चाहं बलसूदन ।
अहं श्रद्धा च मेधा च सन्नतिर्विजितिः स्थितिः ॥ २१
अहं धृतिरहं सिद्धिरहं त्विड्भूतिरेव च ।
अहं स्वाहा स्वधा चैव संस्तुतिर्नियतिः कृतिः ॥ २२
राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च ।
निवासे धर्मशीलानां विषयेषु पुरेषु च ॥ २३
जितकाशिनि शूरे च संग्रामेष्वनिवर्तिनि ।
निवसामि मनुष्येन्द्रे सदैव बलसूदन ॥ २४
धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि ।
प्रश्रिते दानशीले च सदैव निवसाम्यहम् ॥ २५
असुरेष्ववसं पूर्वं सत्यधर्मनिबन्धना ।
विपरीतांस्तु तान्बुद्ध्वा त्वयि वासमरोचयम् ॥ २६

शक्र उवाच ।

कथंवृत्तेषु दैत्येषु त्वमवात्सीर्वरानने ।
दृष्ट्वा च किमिहागास्त्वं हित्वा दैतेयदानवान् ॥ २७

श्रीरुवाच ।

स्वधर्ममनुतिष्ठत्सु धैर्यादचलितेषु च ।

C. 12. 8361
B. 12. 229(8). 29
K. 12. 235. 36

°क्ष्मीं) (for पद्मा श्रीः). K7 पद्ममालिनीं.

21 ^{a}) K7 D4.9 भूमिः; Ds1 भूति-. —^{b}) D5 अहं श्रीर्; M7 श्रीरहं (for श्रीश्चाहं). B9 मधु-; D7 बलि-; T1 G2.3.6 M1.5–7 वल- (for बल-). K6 Da4 -सूदनः. —^{d}) K2.7 D4.6.7.9 T1 G1.2 M1.6 संततिर्; Da4 सप्ततिर्; T2 संस्मृतिर् (for सन्नतिर्). Da4 विजितः. D7 T1 G1.3.6 स्मृतिः; T2 धृतिः (for स्थितिः). K1.4 विजितिस्थिती.

22 ^{a}) K7 D8 वृत्तिर्; D7 T1 G3.6 रतिर्; G1 कृतिर् (for धृतिर्). G1 बुद्धिर् (for सिद्धिर्). —^{b}) K4 त्वड्; K6 V1 B0.6.7.9 Da3 Dn1.n4 Ds D2.3.5 त्वद्-; K7 D4.6.9 वाग्; B8 भूर्; Da4 त्वं; D7 T1 G1.3.6 सं-; M1 तीग् (sic) (for त्विड्). —^{c}) G2 वसा (for स्वाहा). K2 G2 सुधा (for स्वधा). Ś1 K1.2 चाहं (for चैव). —^{d}) K2 (*sup. lin.*) G2 संस्थितिर्; K6 Da3 Dn1.n4 Ds D2.3.5.8 T1 G1 संनतिर्; B7 T2 संस्मृ°; Da4 संभू°; D7 G3.6 M1.5–7 संत° (for संस्तु°). K1.2.4 स्थितिः; K6 V1 B0.6–9 Da3.a1 Dn1.n4 Ds D2.3.5.8 स्मृतिः (for कृतिः).

23 ^{a}) K7 यद्वां; D4.9 येषां (for राज्ञां). —^{b}) Ś1 M1.6 संग्रामेषु (for सेनाग्रेषु). —^{c}) B9 Ca (Cap as in text) निवासी; D4.7 T1 G2.3.6 M1.6.7 निवसे; G1 निवसेद् (for निवासे). ❀ Ca : निवासी निवासिनी । ❀ —^{d}) K2.4 D7 G1.3.6 परेषु (for पुरेषु).

24 V1 reads 24^{ab} on marg. —^{a}) K1 D4.9 जितकासिनि; Da4 °काशीनि; Ds1 M7 °काशिनी. —^{b}) K1 Da4 Dn4 [अ]नि(Dn4 नि)वर्तिनी; B6 [अ]पलायिनि; D3 [अ]निवर्तनि; M1.6 °वर्तिषु (for °वर्तिनि). —^{c}) K1.6 Ds1.s2 (before corr.) D3.6 G2 मनुष्येंद्र; M6.7 °ष्येषु (for °ष्येन्द्रे). —^{d}) D3 सदैवं. K7 T G2.3.6 M1.6.7 वल-; K7 (*sup. lin.*) सुकि-; D7 बलि- (for बल-). K3 Da4 -सूदनः.

25 ^{a}) K6 Ds1 D5 धर्मनिष्ठे (for °नित्ये). T2 -युद्धे (for -बुद्धौ). —^{b}) Da4 ब्रह्मणे. Da4 G1 M7 -वादिनी (for °नि). —^{c}) K7 D4–6.9 प्रसृते; D7 T1 G1 प्रणते (for प्रश्रिते). — After 25, K7 D4–6.9 ins. :

661* अहिंसानिरते नित्यं सत्यवाक्ये यतेन्द्रिये ।

[D5.6 जितेंद्रिये.]

26 ^{a}) B0 च वसं (for अवसं). —^{b}) G1 सत्यबंध- (for °धर्म-). K4 -निबंधनः; Da4 °धनी; D5 G2 M5 °धनं; D7 T G1.3.6 M7 °धनात् (for °धना). —^{c}) B0 च (for तु). V1 B8 ज्ञात्वा; B6.7.9 Da4 D5.7 T G1.3.6 M1.6.7 दृष्ट्वा; M5 (*inf. lin.* as in text) त्यक्त्वा (for बुद्ध्वा). —^{d}) B9 वाचम् (for वासम्). M1 त्वयि K1 अरोचयत्; D3 °जयं (for °चयम्). M1 त्वयि वासव रोचयं.

27 K7 D4.6.9 इंद्र (for शक्र). —^{b}) Ś1 K2 अत्रासीर्; K1.4 अवासी; Da4 अवाश्रीर्; Dn4 M1.6 ए(Dn4 अ)वासीद्; Ds1 अवाप्सीर् (for °त्सीर्). —^{c}) D7 (before corr.) T1 Ś1 K1.2.4 श्रुत्वा (for दृष्ट्वा). —^{d}) K2 दैत्येय-. B7 Da4 -दानव (Da4 इहागस्. °वा).

28 ^{b}) Ś1 [अ]धैर्याद्. K7 D4.6.9 धैर्यवत्स्वाहिता- भिषु; D7 T G1–3.6 M1.5.6 धैर्यादुद्धारि(T2 G1 °द्धरि-; G2 °द्धर्य)ताभि(T2 G3.6 °रि)षु. —^{c}) K7 D4.6.9 सत्य- (for स्वर्ग-). M5 -कामेषु (for -रामेषु). —^{d}) V1 B7–9 Da4 D5 M1.6 Cp सत्येषु; B6 सत्वे हि; D7 T1 M1.7 [अ]- M7 दैत्येषु (for सत्त्वेषु). Ś1 K1.2.4 D7 T1 M1.7 [अ]- भिरता; V1 B6.9 Da4 [अ]नुरता; B0 निरता; M6

C. 12. 8346
B. 12. 229[8]. 14
K. 12. 295. 21

दिव्याभिरूपशोभाभिरप्सरोभिः पुरस्कृताम् ।
बृहतीमंशुमत्प्रख्यां बृहद्भानोरिवार्चिषम् ॥ १३
नक्षत्रकल्पाभरणां ताराभक्तिसमस्रजम् ।
श्रियं ददृशतुः पद्मां साक्षात्पद्मतलस्थिताम् ॥ १४
सावरुह्य विमानाग्रादङ्गनानामनुत्तमा ।
अभ्यगच्छत्त्रिलोकेशं शक्रं चर्षिं च नारदम् ॥ १५
नारदानुगतः साक्षान्मघवांस्तामुपागमत् ।
कृताञ्जलिपुटो देवीं निवेद्यात्मानमात्मना ॥ १६
चक्रे चानुपमां पूजां तस्याश्चापि स सर्ववित् ।
देवराजः श्रियं राजन्वाक्यं चेदमुवाच ह ॥ १७
का त्वं केन च कार्येण संप्राप्ता चारुहासिनि ।
कुतश्चागम्यते सुभ्रु गन्तव्यं क्व च ते शुभे ॥ १८

श्रीरुवाच ।

पुण्येषु त्रिषु लोकेषु सर्वे स्थावरजङ्गमाः ।
ममात्मभावमिच्छन्तो यतन्ते परमात्मना ॥ १९
साहं वै पङ्कजे जाता सूर्यरश्मिविबोधिते ।

---

13 ^{a}) K6 D4. 9 तन्त्राति- ; K7 V1 B0. 6. 8 (last two marg. as in text) Da4 Dn1. n4 Ds D2. 3. 6. 8 तन्त्राभि- ; B7. 9 Da3 D5 तन्त्रापि (for दिव्याभि-). D7 T G1–3. 6 दिव्याभिरभिरूपाभिर्. — ^{b}) Ś1 K1. 2 तिरस्कृतं ; K4 V1 G2 M1. 6. 7 पुरस्कृतं ; K7 D4. 6. 9 अलंकृतां (K7 °तं) (for पुरस्कृताम्). — ^{c}) K1 Da4 बृहस्पती(Da4 °ति)म् (hypermetric) (for बृहतीम्). K1 G1 -प्रख्यं ; D6 -प्रक्षां (for -प्रख्यां). — ^{d}) Dn4 [आ]र्षिकं ; D6 [अ]र्चिषां.

14 ^{a}) G2 -कल्पाभरणं (for °भरणां). — ^{b}) Ś1 K1. 2. 4 Dn1 ताराकल्प- ; K7 V1 D7 T G1. 3. 6 M1. 5–7 तारापंक्ति- (for °भक्ति-). K1 D4 -समप्रजं ; T2 -समुत्स्रजं ; M1 -सहस्रजं (for -सम°). — ^{c}) K1 ददृशतः (for °शतुः). G1 प्राप्तां (for पद्मां). D7 T1 G3. 6 श्रियं ददर्शतुः प्राप्तां. — ^{d}) V1 B0. 6–9 Da3. a4 Dn4 Ds D2. 3. 5. 6. 8 -दल- ; D7 G1 M5 -दले ; T G2. 3. 6 -दळे ; M1. 6 -तले (for -तल-). K1 सत्पद्मतलसंस्थितां ; K6 साक्षात्पदमवस्थितां ; Dn1 °त्पद्मदलास्थितां.

15 ^{a}) D6 साविरुह्य (for साव°). B9 Dn1 M5 विमानाऽग्याद् ; G2 °नाग्राम् (for °नाग्राद्). — ^{b}) Da4 सर्दंगानाम् (for अङ्गनानाम्). K6 D4 अनुत्तमं (D4 °म). — ^{c}) K6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds1 D2–5. 8 T1 G2 M6 अभ्यागच्छत् (for अभ्य°). Dn4 त्रिलोकेदं (for °केशं). — ^{d}) K7 D4. 9 देवर्षि- ; D7 G1. 3. 6 च ऋषि- (for चर्षिं च). K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 देवर्षिं चापि नारदं.

16 Da3 reads 16 on marg. — ^{a}) B9 नारदानुमतं ; D7 T G1. 3. 6 M1. 5. 6 °गतं (for °गतः). — ^{b}) K6 Ds1 मघवा ताम् ; D7 T G1. 3. 6 M5. 7 मघवंतम् (for °वांस्ताम्). D5 तान् (for ताम्). Da4 उपागमन्. — ^{c}) Dn1 कृतांजटि- (for कृताञ्जलि-). Ś1 K2 D7 T2 G1 M7 -पुटा (for -पुटो). Ś1 K2. 6 D7 T2 G1 M7 देवी ; G2 भूत्वा ; G3. 6 देवो (for देवीं). — G1 om. 16^{d}–18^{c}.

17 G1 om. 17 (cf. v. l. 16). T1 om. (hapl.) 17–19. — ^{a}) Ś1 K1. 2. 4 सानुपमां ; K6 V1 Ds1 चामुत्तमां ; K7 Da4 चानूपमां ; M1 च परमां (for चानुपमां). Dn4 पूजा. — ^{b}) B8 (marg. as in text) भूत्वापि ; Da4 [अ]पि सर्व- ; G2 सत्कृत्य (for चापि स). D7 G3. 6 सर्वजित् (for °वित्). M1. 5–7 देव्याः सत्कृत्य सर्ववित्. — ^{c}) Da4 श्रिया (for श्रियं). D7 G3. 6 देवीं ; T2 चेदं (for राजन्). — ^{d}) Da4 तेदम् ; D7 T2 G3. 6 राजन् (for चेदम्).

18 G1 om. 18^{abc} (cf. v. l. 16). T1 om. 18 (cf. v. l. 17). Before 18, MSS. ins. शक्र उवाच. — ^{a}) Ś1 K1. 2. 4 कासि (for का त्वं). K6 om. च. — ^{b}) K6. 7 Da4 Ds1 D5. 7 (before corr.) T2 G2 M1. 7 चारुहासिनी. — ^{c}) Ś1 K1. 2 Da4 चागमनं (Da4 °ने) (for °म्यते). D7 कुतश्चात्रागता देवि. — ^{d}) D7 G1 कार्यं वा किं (for गन्तव्यं क्व). K1 शुचे ; D6 शुभं.

19 T1 om. 19 (cf. v. l. 17). — ^{a}) D7 G1. 3. 6 पुण्येन (for पुण्येषु). Ś1 K1. 4 तत्र (for त्रिषु). — ^{c}) K4. 7 D4. 9 मामात्म- ; B0 ममार्थ- ; B9 मयात्म- ; D5 ममानु- (for ममात्म-). Ds1 -नावम् ; D7 G1. 3. 6 -भवम् (for -भावम्). Da3. a4 इच्छंति. — ^{d}) K6 यजंते (for यतन्ते). D7 G3. 6 चिरम् ; G1 चितम् (for परम्). ❀ Cv (reading परमात्मना as one word) : परमात्मना परमप्रयत्नेन । ❀

20 ^{b}) Da4 सूर्यें (for सूर्य-). Ś1 K1. 2. 4 -निबोधिते ; B8 (marg.) -विराजिते ; D4. 9 -विबोधिता ; D7 T G1. 3. 6 M1. 5–7 -प्रबोधिते (M1 °ता) (for -विबो°). — ^{d}) K6 Da4 Ds1 पद्मा श्री- ; K7 D4. 6. 9 पद्माक्षी (K7

भूत्यर्थं सर्वभूतानां पद्मा श्रीः पद्ममालिनी ॥ २०
अहं लक्ष्मीरहं भूतिः श्रीश्चाहं बलसूदन ।
अहं श्रद्धा च मेधा च सन्नतिर्विजितिः स्थितिः ॥ २१
अहं धृतिरहं सिद्धिरहं त्विड्भूतिरेव च ।
अहं स्वाहा स्वधा चैव संस्तुतिर्नियतिः कृतिः ॥ २२
राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च ।
निवासे धर्मशीलानां विषयेषु पुरेषु च ॥ २३
जितकाशिनि शूरे च संग्रामेष्वनिवर्तिनि ।
निवसामि मनुष्येन्द्रे सदैव बलसूदन ॥ २४
धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि ।
प्रश्रिते दानशीले च सदैव निवसाम्यहम् ॥ २५
असुरेष्ववसं पूर्वं सत्यधर्मनिबन्धना ।
विपरीतांस्तु तान्बुद्ध्वा त्वयि वासमरोचयम् ॥ २६

शक्र उवाच ।

कथंवृत्तेषु दैत्येषु त्वमवात्सीर्वरानने ।
दृष्ट्वा च किमिहागास्त्वं हित्वा दैतेयदानवान् ॥ २७

श्रीरुवाच ।

स्वधर्ममनुतिष्ठत्सु धैर्यादचलितेषु च ।

C. 12. 8361
B. 12. 229(8). 29
K. 12. 235. 36

°क्ष्मीं) (for पद्मा श्रीः). K_7 पद्ममालिनीं.

21 ^{a}) K_7 $D_{4.9}$ भूमिः; D_{s1} भूति-. — ^{b}) D_5 अहं श्रीर्; M_7 श्रीरहं (for श्रीश्चाहं). B_9 मधु-; D_7 बलि-; T_1 $G_{2.3.6}$ $M_{1.5-7}$ वल- (for बल-). K_6 D_{a4} -सूदनः. — ^{d}) $K_{2.7}$ $D_{4.6.7.9}$ T_1 $G_{1.2}$ $M_{1.6}$ संततिर्; D_{a4} सप्ततिर्; T_2 संस्मृतिर् (for सन्नतिर्). D_{a4} विजितः. D_7 T_1 $G_{1.3.6}$ स्मृतिः; T_2 धृतिः (for स्थितिः). $K_{1.4}$ विजितिस्थिती.

22 ^{a}) K_7 D_8 वृत्तिर्; D_7 T_1 $G_{3.6}$ रतिर्; G_1 कृतिर् (for धृतिर्). G_1 बुद्धिर् (for सिद्धिर्). — ^{b}) K_4 त्वड्; K_6 V_1 $B_{0.6.7.9}$ D_{a3} $D_{n1.n4}$ D_s $D_{2.3.5}$ त्वद्-; K_7 $D_{4.6.9}$ वाग्; B_8 भूर्; D_{a4} त्वं; D_7 T_1 $G_{1.3.6}$ सं-; M_1 तीग् (sic) (for त्विड्). — ^{c}) G_2 वसा (for स्वाहा). K_2 G_2 सुधा (for स्वधा). $Ś_1$ $K_{1.2}$ चाहं (for चैव). — ^{d}) K_3 (*sup. lin.*) G_2 संस्थितिर्; K_6 D_{a3} $D_{n1.n4}$ D_s $D_{2.3.5.8}$ T_1 G_1 संनतिर्; B_7 T_2 संस्मृ°; D_{a4} संभू°; D_7 $G_{3.6}$ $M_{1.5-7}$ संत° (for संस्तु°). $K_{1.2.4}$ स्थितिः; K_6 V_1 $B_{0.6-9}$ $D_{a3.a4}$ $D_{n1.n4}$ D_s $D_{2.3.5.8}$ स्मृतिः (for कृतिः).

23 ^{a}) K_7 यद्रां; $D_{4.9}$ येषां (for राज्ञां). — ^{b}) $Ś_1$ $M_{1.6}$ संग्रामेषु (for सेनाग्रेषु). — ^{c}) B_9 Ca (Cap as in text) निवासी; $D_{4.7}$ T_1 $G_{2.3.6}$ $M_{1.6.7}$ निवसे; G_1 निवसेद् (for निवासे). ❀ Ca: निवासी निवासिनी । ❀ — ^{d}) $K_{2.4}$ D_7 $G_{1.3.6}$ परेषु (for पुरेषु).

24 V_1 reads 24^{ab} on marg. — ^{a}) K_1 $D_{4.9}$ जितकासिनि; D_{a4} °काशीनि; D_{s1} M_7 °काशिनी. — ^{b}) K_1 D_{a4} D_{n4} [अ]नि(D_{n4} नि)वर्तिनी; B_6 [अ]पलायिनि; D_3 [अ]निवर्तनि; $M_{1.6}$ °वर्तिषु (for °वर्तिनि). — ^{c}) $K_{1.6}$ $D_{s1.s2}$ (before corr.) $D_{3.6}$ G_2 मनुष्येंद्र; $M_{6.7}$ °ष्येषु (for °ष्येन्द्रे). — ^{d}) D_3 सदैवं. K_7 T $G_{2.3.6}$ $M_{1.6.7}$ वल-; K_7 (*sup. lin.*) सुरि-; D_7 बलि- (for बल-). K_3 D_{a4} -सूदनः.

25 ^{a}) K_6 D_{s1} D_5 धर्मनिष्ठे (for °नित्ये). T_2 -युद्धे (for -बुद्धौ). — ^{b}) D_{a4} ब्रह्मणे. D_{a4} G_1 M_7 -वादिनी (for °नि). — ^{c}) K_7 $D_{4-6.9}$ प्रसृते; D_7 T_1 G_1 प्रणते (for प्रश्रिते). — After 25, K_7 $D_{4-6.9}$ ins.:

661* अहिंसानिरते नित्यं सत्यवाक्ये यतेन्द्रिये ।

[$D_{5.6}$ जितेंद्रिये.]

26 ^{a}) B_0 च वसं (for अवसं). — ^{b}) G_1 सत्यबंध- (for °धर्म-). K_4 -निबंधनः; D_{a4} °धनी; D_5 G_2 M_5 °धनं; D_7 T $G_{1.3.6}$ M_7 °धनात् (for °धना). — ^{c}) B_0 च (for तु). V_1 B_8 ज्ञात्वा; $B_{6.7.9}$ D_{a4} $D_{5.7}$ T $G_{1.3.6}$ $M_{1.6.7}$ दृष्ट्वा; M_5 (*inf. lin.* as in text) त्यक्त्वा (for बुद्ध्वा). — ^{d}) B_9 वाचम् (for वासम्). K_1 अरोचयत्; D_2 °जयं (for °चयम्). M_1 त्वयि वासव रोचयं.

27 K_7 $D_{4.6.9}$ इंद्र (for शक्र). — ^{b}) $Ś_1$ K_2 अत्रासीर्; $K_{1.4}$ अवासी; D_{a4} अवाश्रीर्; D_{n4} $M_{1.6}$ ए(D_{n4} अ)वासीद्; D_{s1} अवाप्सीर् (for °त्सीर्). — ^{c}) $Ś_1$ $K_{1.2.4}$ श्रुत्वा (for दृष्ट्वा). D_7 (before corr.) T_1 इहागस. — ^{d}) K_2 दैत्येय-. B_7 D_{a4} -दानव (D_{a4} °वा).

28 ^{b}) $Ś_1$ [अ]धैर्याद्. K_7 $D_{4.6.9}$ धैर्यवत्स्वाहिताग्निषु; D_7 T $G_{1-3.6}$ $M_{1.5.6}$ धैर्यादुद्धारि(T_2 G_1 °द्धरि-; G_2 °द्धर्य)ताग्नि(T_2 $G_{3.6}$ °रि)षु. — ^{c}) K_7 $D_{4.6.9}$ सत्य- (for स्वर्ग-). M_5 -कामेषु (for -रामेषु). — ^{d}) V_1 B_{7-9} D_{a4} D_5 $M_{1.6}$ Cp सत्येषु; B_6 सत्त्वे हि; D_7 T_1 M_7 दैत्येषु (for सत्त्वेषु). $Ś_1$ $K_{1.2.4}$ D_7 T_1 $M_{1.7}$ [अ]भिरता; V_1 $B_{6.9}$ D_{a4} [अ]नुरता; B_0 नितरा; M_6

C. 12. 8361
B. 12. 229(8). 29
K. 12. 235. 36

स्वर्गमार्गाभिरामेषु सत्त्वेषु निरता ह्यहम् ॥ २८
दानाध्ययनयज्ञेज्या गुरुदैवतपूजनम् ।
विप्राणामतिथीनां च तेषां नित्यमवर्तत ॥ २९
सुसंमृष्टगृहाश्चासञ्जितस्त्रीका हुताग्नयः ।
गुरुशुश्रूषवो दान्ता ब्रह्मण्याः सत्यवादिनः ॥ ३०
श्रद्दधाना जितक्रोधा दानशीलानसूयकाः ।
भृतपुत्रा भृतामात्या भृतदारा ह्यनीर्षवः ॥ ३१
अमर्षणा न चान्योन्यं स्पृहयन्ति कदाचन ।
न च जातूपतप्यन्ते धीराः परसमृद्धिभिः ॥ ३२
दातारः संगृहीतार आर्याः करुणवेदिनः ।
महाप्रसादा ऋजवो दृढभक्ता जितेन्द्रियाः ॥ ३३
संतुष्टभृत्यसचिवाः कृतज्ञाः प्रियवादिनः ।
यथार्थमानार्थकरा ह्रीनिषेधा यतव्रताः ॥ ३४
नित्यं पर्वसु सुस्नाताः स्वनुलिप्ताः स्वलंकृताः ।
उपवासतपःशीलाः प्रतीता ब्रह्मवादिनः ॥ ३५
नैनानभ्युदियात्सूर्यो न चाप्यासन्प्रगेनिशाः ।

हि रता (for निरता). K6 ह्ययं (for ह्यहम्). K7 D4. 6. 9 दैत्ये(D4 देव्ये-; D6 सत्त्वे)ष्वभिरमाम्यहं; T2 G1–3. 6 M5 दैत्येष्वभिरतास्म्यहं.

29 a) Ś1 K2 -यज्ञेच्छा; Bo. 8 -यज्ञेषु; D7 T G1. 3. 6 M5 -यज्ञाढ्या (T2 °ढ्या); M7 -यज्ञेभ्यो (for °ज्या). — b) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 -पितृ-; D6 -पैतृ- (for गुरु-). D7 T G1. 3. 6 M1. 5–7 -पूजकाः (T2 °कां) (for °नम्). — c) K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 G2 M1. 6. 7 गुरूणाम् (for विप्राणाम्). D4 तु (for च). — d) Dn1. n4 D2. 8 सत्यम् (for नित्यम्). Da4 अवर्ततां. K7 D4. 9 तेषां नित्यप्रवर्तनं; B6 (marg.). 8 येषां नित्यानुवर्तनं; D7 T G1. 3. 6 M1. 5–7 तेषां नित्यानुवर्तकाः (M7 °तां).

30 a) Ds1 स- (for सु-). G2 -गताश्च (for -गृहाश्च). — b) K6 जितह्रीका (for °स्त्रीका). ❀ Cs : जितस्त्रीकाः अनुगुणकलत्राः । ❀ — c) K1 -शुश्रूषया; K4. 6 Bo. 7. 8 Da4 Dn1. n4 Ds D2. 3. 8 °षका; G1 °षवे (for °षवो). — d) K1 B9 Da4 D4 ब्राह्मण्याः (for ब्र°).

31 b) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 7. 8 T G1–3. 6 M1. 5–7 -शीलानसूय(M7 °यै)वः (for °यकाः). — c) D6 भृता-; G1 धृत- (for भृत-). Da4 मतामात्या; Dn1 भृतापत्या (for °मात्या). Ś1 K1. 2. 4 भृत्यपुत्रा भृत्यामात्या. — d) Ś1 K1. 2. 4 भृत्यदारा (for भृत°). K1 ह्यनीर्षयः (sic); Da3. a4 D4. 9 T G1 M6. 7 ह्यनी(Da4 °नि)र्ष्यवः; Ds1 ह्यनिर्षवः; G2 ह्यदीप्सवः.

32 a) Ś1 K1. 2. 4 स्वमर्षणा; Dn1 D8 अमर्षेण; D5 °र्षान्मा; D7 G1 नामर्षवो; T1 G3. 6 नामर्षिणो; T2 M5 नामर्षणा (for अम°). Dn1 च न (by transp.); D4 न वा. — b) K6 Bo. 6. 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 स्पृह(Bo °श)यंते; G1 °यंती (for °यन्ति). — c) K2. 4 D4. 8 न वै (for न च). K6 Dn1. n4 Ds1 D8 -तप्यंति (for -तप्यन्ते). Da4 न च जाभूय तप्यंते (sic); D7 T1 G1. 3. 6 न जातु परितप्यंते. — d) K7 D4–6. 9 वीराः (for धीराः).

33 a) B6–8 संग्रहीतार; Da3 सद्गृहितार; Da4 सगृहीतार; Ds1 संगृहीतारा; M7 संगृभीतारं. — b) K6 Ds1 D7 T G1. 3. 6 M1. 6. 7 Cs कार्यकारणवेदिनः. ❀ Ca. p: करुणवेदिनः सकरुणचित्ताः । ❀ — Ś1 K1. 2. 4 om. (hapl.) 33^{c}–34^{b}. — c) Da4 ऋतवो (for ऋजवो). — d) D6 दृष्ट- (for दृढ-). K7 -भक्त्या (for -भक्ता). K7 D9 यतेंद्रियाः; Dn4 जितेंद्रियः.

34 Ś1 K1. 2. 4 om. 34^{ab} (cf. v. l. 33). D5 om. (hapl.) 34^{c}–35^{d}. — a) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–4. 6. 8. 9 Cs यथार्ह- (for यथार्थ-). Ś1 K1. 2. 4 -नामार्थकरा; Da4 G2 -माता° (for -माना°). — d) K6 V1 Bo. 6–8 Da3. a4 Dn1. n4 D2. 3. 6. 8 Ca. p ह्रीनिषेवा; K7 विनिषेधा; Cpp ह्रीनि° (as in text). K7 D4. 6. 9 जितव्रताः; D7 T1 G1. 3. 6 जितेंद्रियाः; M1. 6 धृतव्रताः (for यत°). ❀ Ca. p : ह्रीरकार्याभिवृत्तिः सैव निषेवो येषां ते ह्रीनिषेवाः । ❀

35 D5 om. 35 (cf. v. l. 34). — a) K2 स्व-; G2 च (for सु-). — d) D7 T1 G1. 3. 6 व्रतिनो (for प्रतीता). M1. 6 -चारिणः (for -वादिनः).

36 V1 reads 36^{a}–37^{b} on marg.; D7 T1 G1. 3. 6 repeat 36^{a} after 37^{ab}. — a) K4 नैनाम्; K6 Ds1 D7 T1 G1. 3. 6 (last five first time) M1. 6. 7 नैतान्; D7 T1 G1. 3. 6 (all second time) तैर्न च (for नैनान्). Ś1 K1. 2. 4. 7 V1 B6 Da4 Ds2 (before corr.) D4. 7 (both times). 9 T1 (both times). 2 G3. 6 (both both times) अभ्यु(K1 °त्यु)दयात्; G1 (first time) उद्भ्युदियात्; M5 अत्यु° (for अभ्यु°). — c) K7 चाभि-;

रात्रौ दधि च सक्तूंश्च नित्यमेव व्यवर्जयन् ॥ ३६
काल्यं घृतं चान्ववेक्षन्प्रयता ब्रह्मचारिणः ।
मङ्गलानपि चापश्यन्ब्राह्मणांश्चाप्यपूजयन् ॥ ३७
सदा हि ददतां धर्मः सदा चाप्रतिगृह्णताम् ।
अर्धं च रात्र्याः स्वपतां दिवा चास्वपतां तथा ॥ ३८
कृपणानाथवृद्धानां दुर्बलातुरयोषिताम् ।
दायं च संविभागं च नित्यमेवानुमोदताम् ॥ ३९
विषण्णं त्रस्तमुद्विग्नं भयार्तं व्याधिपीडितम् ।
हृतस्वं व्यसनार्तं च नित्यमाश्वासयन्ति ते ॥ ४०
धर्ममेवान्ववर्तन्त न हिंसन्ति परस्परम् ।
अनुकूलाश्च कार्येषु गुरुवृद्धोपसेविनः ॥ ४१
पितृदेवातिथींश्चैव यथावत्तेऽभ्यपूजयन् ।

C. 12. 8375
B. 12. 229(8). 43
K. 12. 235. 50

D4 वापि; T2 चाति (for चापि). K6 B7 Dn1. n4 Ds D2. 3. 5. 7. 8 T1 G1. 3. 6 Cs प्रगेशयाः; G2 प्रगोनिशाः (for प्रगे°). Da3. a4 न चाप्यनिद्रणे निशाः. ❀ Ca. p: प्रगेनिशाः प्रातर्दिने निशाः। ❀ —^{c}) G2 M1. 6 transp. दधि and च. K7 Bo. 8. 9 शक्तूंश्; Da4 Dn4 G1 सक्तंश् (for सक्तूंश्). G2 M1. 6 ते (for च). M7 ते रात्रौ दधि सक्तूंश्च. —^{d}) Ś1 K1. 2 D5 विवर्जयन् (D5 °येत्); K7 Bo. 8. 9 D4. 7. 9 T G1 व्यस°; D6 M1 च (M1 व्य-) वर्जयेत्; G2 [उ]पवर्जयन् (for व्यव°).

37 V1 reads 37^{ab} on marg. —^{a}) K6 Ds D5. 6 कल्ये; K7 Bo. 6 (marg.). 7. 8 Da3. a4 Dn1. n4 D2. 3 कल्यं; D4 काल्य- (for काल्यं). Da4 घृते (for घृतं). Ś1 K2. 4 B6–8 चान्ववैक्षन्; K6 Da4 वा(Da4 चा)न्ववैक्षयन्; K7 D4. 5. 7. 9 T1 G1–3. 6 M5. 7 चान्ववेक्ष्य; Ds1 T2 M1. 6 °वेक्षयन् (for °वेक्षन्). —^{b}) Ś1 K1. 2 G1 प्रयाता (for प्रयता). K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T G1. 3. 6 M5. 6 -वादिनः (for -चारिणः). — After 37^{ab}, D7 T1 G1. 3. 6 repeat 36^{a}. D7 T1 G1. 3. 6 read 37^{c} twice. —^{c}) Ś1 K1. 2. 4 D6 G2 मंगलान्यपि; K6. V1 Bo. 6–9 Da3 Dn1. n4 Ds D2–4. 8. 9 G1 (first time) M1. 5. 6 मं(K6 Ds1 मां)गल्यान्यपि; K7 T2 M7 °ल्यानपि; D5 °लामपि; D7 T1 G3. 6 (all first time) °ळान्यपि (for °लानपि). D7 T1 G1. 3. 6 (all first time) वापठन् (for चापश्यन्). D7 T1 G1. 3. 6 (all second time) देवानृषीन्पितॄंश्चैव. —^{d}) M1. 6. 7 चाभि- (for चापि). K7 D4. 9 ब्राह्मणांश्चापि पूजितान्.

38 ^{a}) K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 हि वदतां; K7 D4. 9 विदधतां; D7 T G1. 3. 6 हि ददते (T2 °तो) (for °दतां). K4. 6. 7 V1 Bo. 6 (marg). 7–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 G2 M5 धर्मं; B6 (orig.) सत्यं; D7 T1 G1. 3. 6 दानं; T2 धर्म्यं (for धर्मः). —^{b}) Da4 वाप्रति-; T2 [अ]प्यप्रति-; G2 च प्रति- (for चाप्रति-). K6. 7 D6 -गृह्णतां; D5 corrupt (for -गृह्णताम्). D7 T1 G1. 3. 6 य(D7 G1 स)दा न प्रति(G1 °त्य)गृह्णत. —^{c}) B7 अर्ध- (for अर्धं). B7 Ds1 om. च. K1 रात्र्यः; Bo. 6 (marg. as in text). 7. 9 T2 M1. 6 रात्र्यां; G1 रात्रौ (for रात्र्याः). K7 D4. 9 अर्धंरात्रे च स्वपतां. ❀ Ca: अर्धं च रात्र्याः स्वपतां, प्रथमपश्चिमयामयोः जाग्रतां, स्वाध्यायावश्यकाद्यर्थम्। ❀ —^{d}) D4 वा; G2 तु (for च). D7 T G1. 3. 6 M1. 6. 7 सदा; M5 तदा (for तथा).

39 = (var.) 12. 78. 18; 87. 24. 39^{ab} = 12. 87. 34^{ab}. Cf. Agni Purāṇa 225. 25^{ab}; Matsya P. 214. 61^{ab}. —^{a}) B6 (marg.). 7 -भृत्यानां (for -वृद्धानां). K7 कृपणानाप्यवृद्धानां; Da3. a4 °नां च भृत्यानां; G1 °नथ वृद्धानां. — After 39^{ab}, K7 reads 40^{cd} for the first time, repeating it in its proper place. —^{c}) K6 Bo. 6–9 Da3 Dn1. n4 Ds D2. 3. 5. 6. 8 T2 G2 M7 दयां; Da4 दानं (for दायं). D7 T1 G1. 3. 6 सतां च संविभज्यान्नं. —^{d}) B9 अनमोदताः (sic); Dn1. n4 Ds2 D2. 3. 8 अन्वमोदतां (for अनु°). B8 कुर्वतामनुमोदतां. — After 39, T2 G2 M1. 5–7 Kumbh. ed. ins.:

662* कालो यातः सुखे चैव धर्ममार्गे च वर्तताम् ।

[G2 M7 Kumbh. ed. सुखेनैव (for सुखे चैव).]

40 ^{a}) B9 om. from विषण्णं up to हृतस्वं (in 40^{c}). K6 V1 Bo. 6–8 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 त्रस्तं (Da3. a4 भ्रष्टं) विषण्णम् (by transp.); G2 M7 विषण्णत्रस्तम्. —^{b}) K6 Bo. 6. 7 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 भयार्तं व्याधितं कृशं (Ds1 °तं कृतं). — K7 reads 40^{cd} for the first time after 39^{ab}. —^{c}) K7 (both times) D4. 6. 9 दुर्बलं; Dn1 हतस्वं (for हृ°). K4 व्यसनांते (for °नार्तं). —^{d}) V1 ये; B8 (marg.) [उ]त (for ते). K7 (first time) D4. 6. 9 नित्यमाश्वासयंश्च ते; D7 T1 G1. 3. 6 °मेवाभिरक्षतां (G1 °क्षितं; G3. 6 °क्षत).

41 ^{a}) K2. 7 Bo. 6. 9 Da3. a4 D4–7. 9 T G1. 3. 6 M1. 5–7 एवानु- (for °न्व-). K6 Bo D5–7 T G1. 3. 6 M1. 5–7 -वर्तते; K7 D4. 9 -वर्ततो (for -वर्तन्त). —^{b}) Ś1 K1. 2 नाहिंसंत; K7 D4. 6. 9 न हिंसंतः; D7 T1 G1 नासे-

C. 12. 8375
B. 12. 229[8]. 43
K. 12. 235. 50

अवशेषाणि चाश्नन्ति नित्यं सत्यतपोरताः ॥ ४२
नैकेऽश्नन्ति सुसंपन्नं न गच्छन्ति परस्त्रियम् ।
तेजसा यशसा बुद्ध्या नयेन विनयेन च ।
जन्मना तपसा वृद्धस्तस्मात्सर्वत्र पूजितः ॥ ८
सुखशीलः सुसंभोगः सुभोज्यः स्वादरः शुचिः ।
सुवाक्यश्चाप्यनीर्ष्यश्च तस्मात्सर्वत्र पूजितः ॥ ९
कल्याणं कुरुते बाढं पापमस्मिन्न विद्यते ।
न प्रीयते परानर्थैस्तस्मात्सर्वत्र पूजितः ॥ १०

C. 12. 8464
B. 12. 231(O). 11
K. 12. 237. 11

(before corr.) T_2 $M_{1.7}$ कुक्कु(T_2 M_1 °रु)राधिप ; K_2 कुकुरान्विष ; B_6 कुकुरेश्वर (for °राधिप). $K_{6.7}$ $D_{4-6.9}$ M_1 यन् (for यान्). —^{b}) $K_{6.7}$ Dn_4 $D_{3-5.8.9}$ तन्मे ; $B_{6.9}$ Da_3 तान्वै ; $M_{1.6.7}$ मे तान् (by transp.). Da_4 विचक्षतः ; D_7 विवक्षिताः (for °क्षतः). G_1 श्रूयतां मे विचक्षणः. — After 4^{ab}, B_9 ins. :

666* यच्छ्रुत्वा पारमेष्ठ्येन भवेच्चाप्यमला मतिः ।

—^{c}) $M_{1.7}$ साधो (for साधून्). —^{d}) K_7 Da_4 नराधिपः.

5 ^{a}) D_7 $G_{3.6}$ न च मित्रममित्रोस्य ; G_1 न चामित्रममित्रे स्याद्. —^{b}) G_1 [अ]हंकारे. K_6 V_1 Bo_{6-9} $Dn_{1.n4}$ $D_{2.3.8}$ देहतापनः ; Da_4 Ds D_4 °यातनः ; D_5 देव कश्चन ; D_6 देहमानतः ; T_1 देवपातनः ; Cs (gloss : आयुःक्षयकरः) देहयापनः (for देहपातनः). — D_4 om. (hapl.) 5^{c}–6^{d}. —^{c}) D_5 अगूढ- ; D_7 T_1 G_6 न हि न ; T_2 M_5 अहीन- ; $G_{1.3}$ न हीन- (for अभिन्न-). K_7 D_9 -शुचि- ; B_8 D_5 -श्रुति- (for -श्रुत-). —^{d}) D_5 lacuna ; D_7 T_1 G_1 भवति (for सर्वत्र). — After 5, D_7 T $G_{1.3.6}$ M_5 read 8. K_6 ins. after 6^{ab}: K_7 V_1 Bo_{6-9} $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.5.6.8.9}$ Kumbh. ed. after 5 : D_7 T $G_{1.3.6}$ M_5 after 8 :

667* अरतिः क्रोधचापल्ये भयं नैतानि नारदे ।
अदीर्घसूत्रः शूरश्च तस्मात्सर्वत्र पूजितः ।

[(L. 1) Ds_2 D_8 कोप- (for क्रोध-). K_7 D_9 नैवास्ति ; Da_4 ते नाति ; Ds नैवाति ; D_5 चैतानि (for नै°). Bo नारद ; $Da_{3.a4}$ नारदः ; T_2 नाददे (for नारदे). — (L. 2) Da_4 अदीर्घः सूत्रसूरश्च (for the prior half).]

6 Da_4 D_4 G_1 $M_{6.7}$ om. (hapl.) 6 (for D_4, cf. v. l. 5). M_1 om. (hapl.) 6–8. V_1 reads 6 on marg. —^{a}) $K_{6.7}$ V_1 Bo_{6-9} Da_3 $Dn_{1.n4}$ Ds $D_{2.3.5-9}$ T $G_{3.6}$ M_5 उपास्यो (K_7 °स्ये) (for तपस्वी). —^{b}) V_1 यतो (for वाचि). — After 6^{ab}, K_6 ins. 667*. —^{c}) $K_{4.6}$ $Dn_{1.n4}$ Ds $D_{2.3.6.8}$ कामतो (for कामाद्वा).

7 K_7 M_1 om. (hapl.) 7 (for M_1, cf. v. l. 6). V_1 om. 7^{ab}. —^{a}) K_6 -निधि- (for -विधि-). —^{b}) Da_3 क्षांताः ; Ds_1 ज्ञातः ; D_5 शांतः ; T_2 कांतः (for क्षान्तः). $K_{1.2.4}$ Bo_8 (marg. as in text) $D_{3.7}$ T_1 $G_{1.3.6}$ शांतो ; B_8 (marg. also)$_{.9}$ T_2 Cpp (gloss : विगतरागादिमलः) शुक्तो ; D_5 क्षांतो ; Cpp (also) सक्तो (for शक्तो). ❀ Cs : शक्तो मधुरवाक् । ❀ — V_1 reads 7^{c}–8^{d} on marg. — After 7, D_7 T $G_{1.3.6}$ read 15.

8 D_5 M_1 om. (hapl.) 8 (for M_1, cf. v. l. 6). D_7 T $G_{1.3.6}$ M_5 read 8 after 5. V_1 reads 8 on marg. —^{a}) B_8 (marg.) वृद्ध्या (for बुद्ध्या). —^{b}) K_6 $Bo_{6.7.8}$ (marg.)$_{.9}$ $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.8}$ ज्ञानेन (for नयेन). —^{d}) D_2 पूजिताः. — After 8, D_7 T $G_{1.3.6}$ M_5 ins. 667*.

9 ^{a}) K_7 D_9 सुसंवेषः ; D_4 सुखंवेषः (for सुसंभोगः). K_6 V_1 Bo_{6-9} $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.5.6.8}$ सुशीलः सुखसंवेशः (B_7 °पन्नः ; D_6 °वेषः) ; D_7 T $G_{1.3.6}$ $M_{1.5-7}$ सुसंशीलः सुसंवेषः (M_5 °कः ; M_6 °शः). —^{b}) K_1 स्वभोज्यः ; $K_{4.6.7}$ V_1 Bo_{6-9} $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2-6.8.9}$ सुभोजः (Da_4 °गः) ; D_7 T $G_{3.6}$ $M_{1.5-7}$ सुतेजाः ; G_1 सुवेषा (for सुभोज्यः). K_7 V_1 Bo_9 $Da_{3.a4}$ $D_{4.9}$ M_7 स्वाचरः ; D_5 स्थावरः ; D_7 स्वान्तरः ; G_1 स्वादनः ; $M_{1.6}$ सुचरः (for स्वादरः). —^{c}) B_6 स्ववाक्यश् (for सु°). K_6 चापनीर्ष्यश् ; K_7 $D_{4.6.7.9}$ च सुचक्षुश् ; V_1 Ds_1 चाप्यनीर्षश् ; $B_{6.7.9}$ Cp (gloss : परिभाषणानभिज्ञः) चाविव(B_6 °वि)क्षुश् ; B_8 (marg. as in text) च विवक्षुश् ; Da_3 चाविवुक्षश् ; Da_4 च विविक्षुश् ; D_5 चासुचक्षश् (for चाप्यनीर्ष्यश्). $M_{1.6}$ अमात्सर्योंप्यनीर्ष्यश्च ; M_7 अमात्सर्ये तु व्यनीर्ष्यश्च. — After 9, T_1 reads 12.

10 $Ś_1$ K_1 om. (hapl.) 10 ; D_7 om. (hapl.) 10–11 ; G_1 om. (hapl.) 10–14. —^{a}) Dn_1 कुरुतां. $M_{1.6}$ गूढं (for बाढं). —^{b}) D_6 यस्मान् ; $M_{1.6.7}$ अत्र (for अस्मिन्). —^{c}) $D_{4.9}$ प्रीयेत (for प्रीयते). M_1 च तानर्थैस् (for परा°). — After 10, D_6 reads 21.

C. 12. 8465
B. 12. 231[0]. 12
K. 12. 237. 11

वेदश्रुतिभिराख्यानैरर्थानभिजिगीषते ।
तितिक्षुरनवज्ञश्च तस्मात्सर्वत्र पूजितः ॥ ११
समत्वाद्धि प्रियो नास्ति नाप्रियश्च कथंचन ।
मनोनुकूलवादी च तस्मात्सर्वत्र पूजितः ॥ १२
बहुश्रुतश्चित्रकथः पण्डितोऽनलसोऽशठः ।
अदीनोऽक्रोधनोऽलुब्धस्तस्मात्सर्वत्र पूजितः ॥ १३
नार्थे न धर्मे कामे वा भूतपूर्वोऽस्य विग्रहः ।
दोषाश्चास्य समुच्छिन्नास्तस्मात्सर्वत्र पूजितः ॥ १४
दृढभक्तिरनिन्द्यात्मा श्रुतवाननृशंसवान् ।
वीतसंमोहदोषश्च तस्मात्सर्वत्र पूजितः ॥ १५
असक्तः सर्वसङ्गेषु सक्तात्मेव च लक्ष्यते ।
अदीर्घसंशयो वाग्मी तस्मात्सर्वत्र पूजितः ॥ १६
समाधिर्नास्य मानार्थे नात्मानं स्तौति कर्हिचित् ।
अनीर्ष्युर्दृढसंभाषस्तस्मात्सर्वत्र पूजितः ॥ १७
लोकस्य विविधं वृत्तं प्रकृतेश्चाप्यकुत्सयन् ।
संसर्गविद्याकुशलस्तस्मात्सर्वत्र पूजितः ॥ १८

---

11 D7 G1 om. 11 (cf. v. l. 10). —^{a}) G6 देव- (for वेद-). —^{b}) K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–4. 6. 8. 9 Cp -जिगीषति (for °षते). D5 अन्यास्मात्र जिगीषति. ❀ Cp : अभिजिगीषति तिरश्चिकीर्षति । ❀ —^{c}) B6. 8. 9 Ds2 D3. 5 T1 G3. 6 तितुक्षुर् (for तिति°). K6 V1 Bo. 6. 8 (marg. as in text). 9 Da4 Ds1 D5 M1. 6. 7 अनव(Ds1 °भि)ज्ञाता; K7 B7 Da3 Dn1. n4 Ds2 D2–4. 8. 9 Cp °ज्ञातस् (for °ज्ञश्च).

12 K1 G1 om. (hapl.) 12 (for G1, cf. v. l. 10). T1 reads 12 after 9. —^{a}) K4 सुमत्वाच्; D4 समत्वान् (for समत्वाद्). K4. 6 Bo. 7 Da3 Dn1. n4 Ds D2. 3. 8 च; K7 V1 B6. 8. 9 Da4 D4–6. 9 M1. 6. 7 न (for हि). K7 B6. 8. 9 Da3. a4 D4. 6. 9 M1. 6. 7 नास्य (for नास्ति). —^{b}) B8 नाप्रियस्य; D3 न प्रियश्च; D7 T1 नास्ति कश्चित् (for नाप्रियश्च). B6–9 Da3. a4 कदाचन (for कथं°).

13 G1 om. 13 (cf. v. l. 10). —^{a}) K4 बहुश्रुतिश् (for °श्रुतश्). —^{b}) K6 V1 Bo. 6–8 Da3 Dn1. n4 Ds D2. 3. 8 [ऽ]लालसो; K7 B9 Da4 D4–6. 9 [ऽ]नालसो (K7 °शो; Da4 °को) (for ऽन°). K4 [ऽ]शक्तः; K6 Ds1 [ऽ]सठः (for ऽशठः). —^{c}) K7 D4. 5. 9 न दीनो; Da4 आदित्यो; D7 T1 G3. 6 अधनो (for अदीनो).

14 D7 T G1. 3. 6 om. (hapl.) 14 (for G1, cf. v. l. 10). —^{a}) Da4 धर्मे (for नार्थे). K4. 6 V1 Bo. 7. 9 Da3. a4 Dn1. n4 Ds D2–4. 6. 8. 9 M7 धने वा (M7 धनेथ); K7 न धने वा (hypermetric); B6. 8 धर्मे (B6 [marg.] °ने) वा; D5 धर्मे च; M1 ह धर्मे (for न धर्मे). M5 transp. कामे and वा. ❀ Ca (reading धने च): अर्थपदं प्रयोजनपरं, धने चेति पृथगुपादानात् । ❀ —^{b}) Ś1 K1 निग्रहः; V1 सं° (for वि°). ❀ Ca : विग्रहो विशिष्टो ग्रहः । ❀ —^{c}) Ś1 K1. 2 चात्र (for चास्य). K7 D4. 9 सुविच्छिन्नास्; D6 समुच्छन्नास् (for °च्छिन्नास्). — After 14, B7 reads 17.

15 D7 T G1. 3. 6 read 15 after 7. —^{a}) B9 अनिंदात्मा; D7 T1 G1. 3. 6 अदीनात्मा; M1. 6. 7 अचिंत्यात्मा (for अनिन्द्यात्मा). —^{b}) D5 छिन्नशंसवान्; D7 T G1 3. 6 M5 आनृशंस्य(G1 °स)वान्.

16 K1. 2 D5 om. (hapl.) 16. D7 T G3. 6 read 16 after 18. T1 repeats 16^{ab} after 19. —^{a}) B7. 9 Ds1 अशक्तः. D7 T G1. 3. 6 -भूतेषु (for -सङ्गेषु). —^{b}) Bo सक्तार्थेव; Ds1 °न्येव; D7 T G1. 3. 6 सर्वात्मेव; Ca शक्रात्मेव (for सक्ता°). Dn4 D9 लक्षते. V1 प्रसक्तात्मेव लक्ष्यते. —^{c}) B6 -संचयश्; Da4 -संशयं. B6. 9 Da3. a4 चैव (for वाग्मी).

17 B9 om. 17^{ab}. D2 G1 om. (hapl.) 17–18. B7 reads 17 after 14. —^{a}) T G3. 6 स्वसाधि. D7 T1 G3. 6 चास्य (for नास्य). K4. 6 V1 Bo. 6–8 Da3. a4 Dn1. n4 Ds D3. 5. 6. 8 कामार्थे; D7 T1 G3. 6 मानार्था (for °र्थे). —^{b}) K4 कस्यचित्; K7 B8 (marg.) D4. 6. 9 केनचित् (for कर्हि°). —^{c}) K1. 4. 7 Bo. 6. 7. 9 Dn1 Ds D5. 8 अनीर्षुर्; K6 अनीर्ष्यो (for अनीर्ष्युर्). K2. 4. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D3. 7. 8 T1 G3. 6 मृदु-; K7 B6 (marg.) D4. 5. 9 M1. 5–7 मित-; D6 प्रिय-; T2 मृत्यु- (for दृढ-). K6 Dn1. n4 Ds D3. 8 -संवादस् (for -संभाषस्).

18 D2 G1 om. 18 (cf. v. l. 17). K1 reads 18 on marg. —^{a}) K6. 7 Bo. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1 Ds D3. 5. 8 चित्तं; Dn4 चित्ते (for वृत्तं). —^{b}) K6. 7 Bo. 6–9 Dn1. n4 Ds2 D3–5. 7–9 T G3. 6 M1. 5–7 प्रेक्षते; V1 Da3. a4 Ds1 D6 प्रेक्ष्यते (for प्रकृतेश्). K7 Da4 D4. 9 वापि; Ds1 चाथ (for चापि). Ds1 कुत्सयन्. —^{c}) K7 स स्वर्ग-; B6 (marg.) D6 गंधर्व-; Dn1. n4 Ds1 संवर्ग-; Ds2 संपर्ग-; D5 स सर्व-; T2 स स्वर्ग- (for संसर्ग-). B8 (marg. as in text) मंत्रविद्यासु

नासूयत्यागमं कंचित्स्वं तपो नोपजीवति ।
अवन्ध्यकालो वश्यात्मा तस्मात्सर्वत्र पूजितः ॥ १९
कृतश्रमः कृतप्रज्ञो न च तृप्तः समाधितः ।
नियमस्थोऽप्रमत्तश्च तस्मात्सर्वत्र पूजितः ॥ २०
सापत्रपश्च युक्तश्च सुनेयः श्रेयसे परैः ।
अभेत्ता परगुह्यानां तस्मात्सर्वत्र पूजितः ॥ २१
न हृष्यत्यर्थलाभेषु नालाभेषु व्यथत्यपि ।
स्थिरबुद्धिरसक्तात्मा तस्मात्सर्वत्र पूजितः ॥ २२
तं सर्वगुणसंपन्नं दक्षं शुचिमकातरम् ।
कालज्ञं च नयज्ञं च कः प्रियं न करिष्यति ॥ २३ C. 12. 8477 B. 12. 231[0]. 24 K. 12. 237. 27

इति श्रीमहाभारते शान्तिपर्वणि त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥

कुशलस्. ❀ C$_{a}$: संसर्गविद्या गीतादिविद्या, तत्र हि संसृज्यन्ते प्रायो जनाः ॥ C$_{s}$: प्राणविद्याकुशलः, सर्वेषामनुप्रवेशकुशलो वा । ❀ — After 18, D$_{7}$ T G$_{3.\,6}$ read 16.

19 D$_{7}$ om. (hapl.) 19–20. —^{a}) Da$_{3}$. a$_{4}$ नासूयाति. K$_{6}$ आश्रमं; D$_{5}$ आत्मना (for आगमं). K$_{7}$ Bo Da$_{4}$ G$_{1}$ M$_{1.\,6}$ किंचित्; D$_{6}$ कांश्चित् (for कंचित्). —^{b}) K$_{6}$ corrupt; K$_{7}$ Bo.$_{7}$ Dn$_{1}$. n$_{4}$ Ds D$_{2.\,3.\,5.\,6.\,8}$ स्वनयेन; V$_{1}$ B$_{6.\,8.\,9}$ Da$_{3}$. a$_{4}$ D$_{9}$ स्व(B$_{6}$ सु)तपो न; D$_{4}$ स्वतापो न; M$_{7}$ स्वातपो न (for स्वं तपो न). —^{c}) K$_{1}$ अबंध्य-; D$_{4}$ अवध्य- (for अवन्ध्य-). G$_{6}$ -काले (for -कालो). Ś$_{1}$ K$_{1.\,2}$ व(K$_{1}$ बं)ध्यश्च; G$_{1}$ वध्यात्मा (for वश्यात्मा). ❀ C$_{s}$: अवन्ध्यकालः सदा कल्याणकारी । ❀ — After 19, Ś$_{1}$ K$_{1.\,2.\,4}$ read 22. T$_{1}$ repeats 16^{ab} after 19.

20 D$_{6.\,7}$ om. (hapl.) 20 (for D$_{7}$, cf. v. l. 19). K$_{7}$ D$_{4.\,6.\,9}$ transp. 20 and 21. —^{a}) K$_{7}$ कृतः (for the second कृत-). Da$_{4}$ कृतप्रज्ञो न च प्रख्यो. —^{b}) B$_{8}$ (marg. as in text) T$_{1}$ G$_{1.\,3.\,6}$ M$_{6.\,7}$ ज्ञान- (for न च). B$_{8}$ (marg.) दृप्तः (for तृप्तः). B$_{8}$ (marg. as in text) T G$_{1.\,3.\,6}$ M$_{1.\,6.\,7}$ समाहितः (for °धितः). —^{c}) K$_{4.\,6}$ V$_{1}$ Bo.$_{6-9}$ Da$_{3}$. a$_{4}$ Dn$_{1}$. n$_{4}$ Ds D$_{2.\,3.\,6.\,8}$ T$_{2}$ M$_{5}$ नित्ययुक्तो; K$_{7}$ D$_{4.\,9}$ G$_{1}$ नित्ययज्ञो; T$_{1}$ G$_{3.\,6}$ M$_{1.\,6.\,7}$ नित्ययत्नो (for नियमस्थो). Da$_{4}$ [ऽ]प्रसन्नश्च; G$_{1}$ [ऽ]प्रयत्नश्च (for ऽप्रमत्तश्च).

21 T$_{1}$ om. (hapl.) 21. K$_{7}$ D$_{4.\,6.\,9}$ transp. 20 and 21. D$_{5}$ reads 21 after 10. —^{a}) K$_{6.\,7}$ Bo.$_{6.\,7.\,8}$ (marg. as in text).$_{9}$ Da$_{3}$. a$_{4}$ Dn$_{1}$. n$_{4}$ Ds D$_{2.\,3.\,8}$ M$_{1.\,5.\,6}$ नापत्रप(Da$_{4}$ °य)श्च (for साप°). —^{b}) K$_{6.\,7}$ V$_{1}$ Bo.$_{6-9}$ Da$_{3}$. a$_{4}$ Dn$_{1}$. n$_{4}$ Ds D$_{2.\,3.\,5.\,7.\,8}$ नियु(B$_{9}$ °युं)क्तः; D$_{6}$ सुनयः; T$_{2}$ G$_{3.\,6}$ M$_{1.\,5-7}$ विनेयः; G$_{1}$ विनयः (for सुनेयः). Da$_{4}$ श्रेयसः. Dn$_{1}$ परः; Ds$_{1}$ परे; D$_{4}$ परेः. —^{c}) K$_{1}$ आवेत्ता (for अभेत्ता). Ś$_{1}$ K$_{1}$ सर्व- (for पर-).

22 Ś$_{1}$ K$_{1.\,2.\,4}$ read 22 after 19. —^{a}) Ś$_{1}$ K$_{1}$ अर्थे; T$_{1}$ अत्र (for अर्थ-). V$_{1}$ -लाभेपि; Dn$_{1}$ -लाभे तु (for -लाभेषु). —^{b}) K$_{6}$ B$_{7}$ Dn$_{1}$ Ds D$_{2.\,3.\,6-8}$ T$_{1}$ G$_{3.\,6}$ नालाभे तु; D$_{4}$ lacuna (for °भेषु). D$_{7}$ T$_{1}$ व्यधति (for व्यथति). —^{c}) B$_{8}$ D$_{5}$ अशक्तात्मा (for अस°).

23 ^{a}) D$_{5}$ -संयुक्तं (for -संपन्नं). —^{b}) Da$_{4}$ दक्ष्यं. K$_{2}$ अकारकं; K$_{4}$ अकर्तारं; K$_{6}$ V$_{1}$ Bo.$_{6-9}$ Da$_{3}$. a$_{4}$ Dn$_{1}$. n$_{4}$ Ds D$_{2.\,3.\,7.\,8}$ अनामयं; D$_{5}$ M$_{1.\,7}$ अनातुरं; T G$_{1.\,3.\,6}$ अनाकुलं; M$_{5.\,6}$ अनादरं (for अकातरम्). —^{c}) K$_{4.\,6}$ Bo Dn$_{1}$. n$_{4}$ Ds D$_{2.\,3.\,5.\,8}$ प्रियज्ञं (for नयज्ञं). — After 23, Kumbh. ed. ins. a passage given in App. I, (No. 25).

Colophon : G$_{2}$ missing; K$_{3.\,5}$ B$_{1-5}$ Da$_{1}$. a$_{2}$ Dn$_{2.\,3}$ D$_{1}$ G$_{4.\,5}$ M$_{2-4}$ absent. — *Sub-parvan :* Ś$_{1}$ K$_{1.\,2.\,4.\,6.\,7}$ V$_{1}$ Bo.$_{6-9}$ Da$_{3}$. a$_{4}$ Dn$_{1}$. n$_{4}$ Ds D$_{2-9}$ T$_{1}$ G$_{1.\,3.\,6}$ M$_{1.\,5-7}$ मोक्षधर्म. — *Adhy. name :* Ś$_{1}$ K$_{1.\,2.\,4}$ वासुदेवोग्रसेनसंवादः समाप्तः; K$_{6}$ B$_{7}$ Dn$_{1}$. n$_{4}$ Ds D$_{2.\,3.\,8}$ M$_{1.\,6.\,7}$ वासुदेवोग्रसेनसंवादः; K$_{7}$ V$_{1}$ Bo.$_{6.\,9}$ Da$_{3}$. a$_{4}$ D$_{4-6.\,9}$ केशवोग्रसेनसंवादः; B$_{8}$ नारदकेशवोग्रसेनसंवादः; D$_{7}$ G$_{6}$ उग्रसेनकृष्णसंवादः; M$_{5}$ उग्रसेनवासुदेवसंवादः. — *Adhy. no.* (figures, words or both) : K$_{7}$ B$_{7}$ Dn$_{4}$ Ds D$_{6.\,9}$ 56; Dn$_{1}$ D$_{7}$ T$_{1}$ G$_{1.\,3.\,6}$ M$_{5}$ 57; D$_{8}$ 52; T$_{2}$ 71; M$_{1.\,6.\,7}$ 55. — *Śloka no. :* Dn$_{1}$. n$_{4}$ D$_{8}$ 24.

२२४

C. 12. 8478
B. 12. 232[1]. 1
K. 12. 238. 1

युधिष्ठिर उवाच ।
आद्यन्तं सर्वभूतानां श्रोतुमिच्छामि कौरव ।
ध्यानं कर्म च कालं च तथैवायुर्युगे युगे ॥ १
लोकतत्त्वं च कार्त्स्न्येन भूतानामागतिं गतिम् ।
सर्गश्च निधनं चैव कुत एतत्प्रवर्तते ॥ २
यदि तेऽनुग्रहे बुद्धिरस्मास्विह सतां वर ।
एतद्भवन्तं पृच्छामि तद्भवान्प्रब्रवीतु मे ॥ ३
पूर्वं हि कथितं श्रुत्वा भृगुभाषितमुत्तमम् ।
भरद्वाजस्य विप्रर्षेस्ततो मे बुद्धिरुत्तमा ॥ ४
जाता परमधर्मिष्ठा दिव्यसंस्थानसंस्थिता ।
ततो भूयस्तु पृच्छामि तद्भवान्वक्तुमर्हति ॥ ५
भीष्म उवाच ।
अत्र ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
जगौ यद्भगवान्व्यासः पुत्राय परिपृच्छते ॥ ६
अधीत्य वेदानखिलान्साङ्गोपनिषदस्तथा ।
अन्विच्छन्नैष्ठिकं कर्म धर्मनैपुणदर्शनात् ॥ ७
कृष्णद्वैपायनं व्यासं पुत्रो वैयासकिः शुकः ।
पप्रच्छ संदेहमिमं छिन्नधर्मार्थसंशयम् ॥ ८

224

☞ This adhy. is missing in G$_2$ (cf. v. l. 12. 222. 19).

1 ^{a}) K$_7$ आद्यंत॰; B$_8$ (marg. as in text) अव्यक्तं; D$_{2.8}$ G$_{1.8}$ अद्य तं (for आद्यन्तं). ❀ Cn. p: आदिं संसारहेतुं (Cp: कर्तारं), अन्तं लयस्थानं (Cp: अन्तस्थानं, यद्वा भूतानामादिरन्तश्च यस्मात्तमुपादानकारणमित्यर्थः) । ❀ —^{b}) K$_6$ V$_1$ B$_{0.6.7.8}$ (marg.).$_9$ Da$_{3.4}$ Dn$_{1.4}$ Ds D$_{2.3.5.6.8}$ M$_7$ ज्ञातुम् (for श्रो°). Ś$_1$ K$_{1.2.4}$ V$_1$ भारत; Ds$_1$ D$_5$ केशव (D$_5$ °वं) (for कौरव). —^{c}) B$_7$ damaged. Ś$_1$ K$_1$ B$_8$ (marg.) D$_7$ T G$_{1.3.6}$ च कर्म (by transp.); D$_{4.9}$ धर्मं च. —^{d}) K$_7$ D$_{4.9}$ [आ]दौ (for [आ]युर्). Da$_4$ युगायुगे.

2 ^{a}) K$_6$ Da$_4$ कार्त्स्नैन. —^{b}) K$_2$ अगतिं; B$_{0.6.9}$ चागतिं (for आगतिं). —^{c}) K$_7$ D$_6$ सर्गस्य; B$_{0.6}$ (marg. as in text).$_{8.9}$ D$_7$ T G$_{3.6}$ M$_{5-7}$ सर्गं च; Da$_4$ सर्वं च; G$_1$ स्वर्गं च (for सर्गश्च). — After 2, Kumbh. ed. ins.:

668* भेदकं भेदतत्त्वं च तथान्येषां मतं तथा ।
अवस्थात्रितयं चैव यादृशं च पितामह ।

3 ^{a}) Da$_4$ तु गृहे (for ऽनुग्रहे). —^{b}) B$_8$ (marg. as in text) वद (for इह). Da$_4$ वरः; D$_4$ वरं. —^{c}) Ś$_1$ K$_{1.2.4}$ एवं (for एतद्). — T$_1$ om. (hapl.) 3^d–5^c. —^{d}) Ś$_1$ K$_{1.2.4}$ तद्यथावद्ब्रवीतु मे.

4 T$_1$ om. 4 (cf. v. l. 3). —^{a}) K$_{2.7}$ D$_{4.5.7.9}$ G$_{3.6}$ भारद्वाजस्य. Da$_4$ देवर्षेस् (for विप्र°). —^{d}) B$_6$ (marg.) [ऽ]भूद् (for मे).

5 T$_1$ om. 5^{abc} (cf. v. l. 3). —^{a}) Ś$_1$ K$_{1.2.4}$ ॰संतुष्टा (for ॰धर्मिष्ठा). —^{b}) Ś$_1$ K$_{1.2.4}$ दिव्यं (K$_{2.4}$ °व्य॰) संस्थानमास्थिता (K$_4$ °तः). ❀ Cn: दिव्यसंस्थान॰संस्थिता अलौकिकस्वरूपनिष्ठावती ॥ Cs: दिव्यरूपा । ❀ —^{c}) Ś$_1$ K$_{1.2}$ अतो (for ततो). Ś$_1$ K$_{1.2}$ B$_8$ D$_{4-6.9}$ च (for तु). —^{d}) K$_{6.7}$ Da$_4$ Dn$_{1.4}$ Ds$_2$ (before corr.) D$_6$ G$_1$ अर्हसि (for °ति). D$_5$ तद्भवान्प्रब्रवीतु मे.

6 ^{a}) G$_3$ om. from ते up to पुरात (in 6^b). Ś$_1$ K$_{1.2}$ वर्णयिष्ये (for वर्त°). D$_7$ T G$_{1.6}$ M$_5$ अत्राप्यु॰दाहरंतीमम्. —^{c}) G$_1$ भवतां (for भगवान्).

7 ^{a}) K$_7$ आधीत्य; Da$_4$ अधित्य. Ś$_1$ K$_{1.2}$ D$_5$ निखिलान्; B$_0$ Da$_3$ M$_{5.6}$ सखि°; G$_1$ अधिकान् (for अखिलान्). —^{b}) K$_2$ संगोप॰ (for साङ्गोप॰). K$_6$ V$_1$ B$_{6-8}$ Da$_{3.4}$ Ds D$_{2.3.5}$ T$_2$ M$_{1.6.7}$ -निषदां(K$_6$ °दा)स्; K$_7$ ॰निषधस् (for -निषदस्). G$_{3.6}$ तदा (for तथा). —^{c}) B$_8$ (marg. as in text) अन्वैच्छन्; Dn$_4$ अवि° (for अन्वि°). Ś$_1$ K$_{1.2.4}$ V$_1$ B$_9$ Da$_4$ धर्मं (for कर्म). —^{d}) V$_1$ D$_7$ T G$_{3.6}$ M$_5$ कर्म-; G$_1$ lacuna (for धर्म-). Da$_{3.4}$ Dn$_4$ Ds D$_{6.7}$ G$_1$ -नैपुण्य॰ (for -नैपुण॰). K$_7$ D$_{4.6.9}$ -दर्शनः; D$_5$ -दर्शनं (for -दर्शनात्). B$_8$ (marg.) नैपुणं च निदर्शनात्.

8 ^{a}) Da$_3$ व्यासः (for व्यासं). —^{b}) K$_2$ M$_{1.6}$ वैयासकः; D$_5$ T$_1$ G$_{1.3.6}$ °सिकिः; D$_7$ °सिकः; G$_1$ °सकीः (for °सकिः). G$_{3.6}$ शिशुः; M$_1$ शुभः (for शुकः). ❀ Ca: व्यास एव व्यासकः, संज्ञायां कन् । तस्य अपत्यं वैयासकिः (cf. Vār. to Pāṇini 4. 1. 97 and the

भूतग्रामस्य कर्तारं कालज्ञाने च निश्चयम् ।
ब्राह्मणस्य च यत्कृत्यं तद्भवान्वक्तुमर्हति ॥ ९
तस्मै प्रोवाच तत्सर्वं पिता पुत्राय पृच्छते ।
अतीतानागते विद्वान्सर्वज्ञः सर्वधर्मवित् ॥ १०
अनाद्यन्तमजं दिव्यमजरं ध्रुवमव्ययम् ।
अप्रतर्क्यमविज्ञेयं ब्रह्माग्रे समवर्तत ॥ ११
काष्ठा निमेषा दश पञ्च चैव
त्रिंशत्तु काष्ठा गणयेत्कलां ताम् ।
त्रिंशत्कलाश्चापि भवेन्मुहूर्तो
भागः कलाया दशमश्च यः स्यात् ॥ १२
त्रिंशन्मुहूर्तश्च भवेदहश्च
रात्रिश्च संख्या मुनिभिः प्रणीता ।
मासः स्मृतो रात्र्यहनी च त्रिंश-
त्संवत्सरो द्वादशमास उक्तः ।
संवत्सरं द्वे अयने वदन्ति
संख्याविदो दक्षिणमुत्तरं च ॥ १३
अहोरात्रे विभजते सूर्यो मानुषलौकिके ।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥ १४

C. 12. 8492
B. 12. 223[1]. 15
K. 12. 238. 48

Mahābhāṣya on the same) ॥ Cp : व्यासस्यापत्यं वैयासकिः । ❀ — c) D7 T G1. 3. 6 संशयम् ; M1 संदेशम् (for °हम्). — d) G1 छन्न- ; M6 भिन्न- (for छिन्न-). K7 D4. 6. 9 -संशयः (D4 °याः) (for -संशयम्).

9 Before 9, MSS. ins. शुक उवाच. — b) T2 कालाज्ञाने. K6 B6. 8 (last two marg.) Dn1. n4 Ds D5. 8 -ज्ञानेन ; G1 -ज्ञानवि- (for -ज्ञाने च). K6 D5 निश्चितं ; K7 D4. 9 M1 6 नैष्ठिकं ; B0 Dn1. n4 Ds D2. 3. 8 Cn. s निष्ठितं (for निश्चयम्). — After 9ab, Kumbh. ed. ins. :

669* ज्ञानं ब्रह्म च योगं च गवात्मकमिदं जगत् ।
त्रितये त्वेनमायाति तथा ह्येषोऽपि वा पुनः ।
केनैव च विभागः स्यात्तुरीयो लक्षणैर्विना ।
ज्ञानज्ञेयान्तरे कोऽसौ कोऽयं भावस्तु भेदवत् ।
यज्ज्ञानं लक्षणं चैव तेषां कर्तारमेव च । [5]

— c) Da4 Ds1 ब्रह्मणस्य (for ब्रा°). — d) K7 Da4 D4. 6. 9 T2 अर्हसि (for °ति). B9 भगवान्वक्तुमर्हति.

10 Before 10, MSS. ins. भीष्म उवाच. — b) M1. 6 पुत्राय परिपृच्छते. — c) Da3. a4 अतीतानागतो. — d) B9 धर्मज्ञः (for सर्वज्ञः). D5 -तत्त्ववित् (for -धर्म°). — After 10, Kumbh. ed. Cv ins. a passage given in App. I, (No. 26).

11 Before 11, MSS. ins. व्यास उवाच. — b) V1 B6-9 Da3. a4 D5 M1. 6. 7 अव्य(B6 °स)क्तमजरं ध्रुवं. — c) Da4 अति- (for अवि-). — d) Da4 ब्रह्मज्ञे (for ब्रह्माग्रे). K4 समवर्तते ; K6 B0. 8 (marg.) Dn1. n4 Ds D2. 3. 8 M1. 5-7 संप्रवर्तते ; K7 V1 B6-9 Da3. a4 D4-6. 9 संप्रकाशते ; D7 T1 G3. 6 अप्रवर्तत (for सम°).

12 b) B8. 9 Da3. a4 च (for तु). K6 D8 काष्ठां (for काष्ठा). B6-8 Ds2 D5. 7 T1 G3. 6 गणयेत् ; M1 गुण° (for गण°). Da4 काला ; Ds1 D6 कला ; T2 कळां (for कलां). Ś1 K1. 2. 4 Dn4 तं ; D7 T1 G1. 3. 6 M5 ताः (for ताम्). — c) K2. 4. 6. 7 B6 Da3 Dn1. n4 D2-6. 8. 9 M1. 5. 6 -कलश्च ; T2 -कळाश्च (for -कलाश्च). D7 मुहूर्ता (for °र्तो). — d) K2 भागाः. Da4 कल्पा (for कलाया). Da4 दशमस्य या ; Dn4 °मं च यः ; Ds1 दशपमो यः ; D7 T G1. 3. 6 दश पंच च (for दशमश्च यः). M1 न (for यः). ❀ Cn : भागः, भगः सूर्यस्तत्संबन्धी कलाया दशमोंऽशः, तेन सहितः त्रिंशत्कलो मुहूर्तः । स च सूर्यस्य उदयादुदयान्तरपर्यन्तं यावान्कालस्तस्य षोडशोंऽशः पादोननाडीचतुष्टयात्मकः । तस्यापि दशमांशः सार्धद्वाविंशतिपलात्मकः । ❀

13 a) K4. 6 V1 B0. 6. 9 Dn1. n4 Ds D2. 3. 5. 6. 8 T2 M1. 5-7 त्रिंशन्मुहूर्तं ; B7 Da3. a4 °र्ताश्च (for °र्तश्च). K4. 6 B0. 8 Dn1. n4 Ds D2. 3. 6-8 T G1. 3. 6 M1. 5-7 तु (for the first च). — b) K7 B9 Da3 D6. 9 रात्रेश्च ; G1 रात्र्यश्च (for रात्रिश्च). D2 संख्यं (for संख्या). K1. 6. 7 Da4 D4. 7. 9 प्रणीताः (for °ता). — c) K7 D4. 6. 9 त्रिंशत् (for मासः). K2 स्मृतौ. M6 रात्र्यहानि. K7 D4. 9 ह ; D7 T1 G1. 3. 6 तु ; M6 lacuna (for च). K7 D4. 6. 9 मासः (for त्रिंशत्). — e) V1 Dn1 Ds1 D4. 9 T1 संवत्सरे (T1 °रो) (for °त्सरं). Ś1 K1. 2. 4 V1 B0. 6-9 Da3. a4 Dn1. n4 Ds2 D2. 3. 5-8 T1 G3. 6 M1. 5-7 त्वयने (for अ°). — f) Da4 सांख्योविदो (sic) ; T2 संख्याविधौ. D7 दक्षिण (for °णम्).

14 = Manu. 1. 65. — a) K1 आहोरात्रे. T2 विभजिते (for °जते). — b) Da8 सूर्यें (for सूर्यो). Da8 मनुष- ; D5 दैविक- ; G1 मानस- (for मानुष-). Ś1 K1. 2. 4. 7 B8 D4. 6. 9 -दैविके ; Dn4 -लौकिकं ; D5

C. 12. 8493
B. 12. 232[1]. 16
K. 12. 238 49

पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः ।
कृष्णोऽहः कर्मचेष्टायां शुक्लः स्वप्नाय शर्वरी ॥ १५
दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ।
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥ १६
ये ते रात्र्यहनी पूर्वे कीर्तिते दैवलौकिके ।
तयोः संख्याय वर्षाग्रं ब्राह्मे वक्ष्याम्यहःक्षपे ॥ १७
तेषां संवत्सराग्राणि प्रवक्ष्याम्यनुपूर्वशः ।
कृते त्रेतायुगे चैव द्वापरे च कलौ तथा ॥ १८
चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम् ।
तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥ १९
इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु ।
एकापायेन संयान्ति सहस्राणि शतानि च ॥ २०
एतानि शाश्वताँल्लोकान्धारयन्ति सनातनान् ।
एतद्ब्रह्मविदां तात विदितं ब्रह्म शाश्वतम् ॥ २१
चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
नाधर्मेणागमः कश्चित्परस्तस्य प्रवर्तते ॥ २२

-मानुषं (for -लौकिके). ❀ Cp: मानुषलौकिके मानुषलोकव्यवहारे। अनुशतिकत्वादुभयवृद्धिः। दैविक इति प्रमादः। दैव इति (st. 17) वक्ष्यमाणत्वात्। ❀ — c) Da4 रात्रौ (for रात्रिः). D7 T G1. 3. 6 M1. 5–7 संयाति (for भूतानां). — d) B9 चेष्टाये. K4 कर्मणा सह.

15 = (var.) Manu. 1. 66. — a) K4 सिद्ध्यै (for पित्र्ये). Da4 राज्यहनि; Dn4 रात्रहनी. T2 मासं (for मासः). — b) Da4 ततः (for तयोः). — B9 D4 om. (hapl.) 15c–16b. — c) Ś1 K1. 7 शुक्लाहः; K2. 4. 6 B0. 7 Dn1. n4 Ds D2. 3. 5. 8. 9 शुक्लोहः (for कृष्णोऽहः). K2 कृष्ण- (for कर्म-). B0. 6. 7 Da3. a4 D3 -चेष्टायाः; B6 (marg.) D7 T G1. 3. 6 M5–7 -चेष्टायै; Ds -चेष्टाया (for °यां). V1 B8 कर्मचेष्टा अहः शुक्लः (B8 कृष्णः); M1 (also) कर्मेत्याहः कर्मचेष्टायै (sic). — d) Ś1 K1. 2. 4. 6. 7 V1 B7 Dn1. n4 Ds D2. 3. 5. 8. 9 कृष्णः; D7 G1 कर्म (for शुक्लः). Da4 कृष्णाय (for स्वप्नाय).

16 = Manu. 1. 67. Ś1 K1. 2. 4 B9 D4 om. 16ab (for B9 D4, cf. v. l. 15). — a) T1 देव- (for दैवे). Da4 राज्यहनि. V1 वर्षः; D7 T G1. 3. 6 M1. 5–7 ह्यब्दः (for वर्षं). — b) Da4 प्रतिभागस्; G1 विप्रभागस् (for प्रवि°). Da4 ततः (for तयोः). — c) Ś1 K1. 2 तस्य (for तत्र).

17 a) Ś1 K1. 2. 4. 6 Dn4 T2 G1 M5 एते (for ये ते). Da4 राज्यहनि. K7 D4. 8. 9 M5 पूर्वं; B6. 7 Da3. a4 पार्थ; B6 (marg.) पुरे; T2 पूर्वैः (for पूर्वे). — b) Ś1 K1. 4 कथिते (for कीर्तिते). Ś1 K1. 4 देव-; K6. 7 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 M1. 6 जीव- (for दैव-). D2 om. from कलौ up to संयान्ति (in 20c). K2 कथिते लौकिके च ते. — c) D6 रात्रिः (for तयोः). K7 सख्याय; D7 संख्या च (for संख्याय). K6 वर्गाग्रं; K7 B8 D4. 6. 9 वर्षाद्यं. — d) B0 Dn4 Ds1 G3. 6 ब्राह्मये; Da4 ब्रह्मो; D5 ब्राह्मयं (for ब्राह्मे). Dn4 वक्षामि. Ś1 K1. 2 अह (K2 °हं) क्षये; K6 V1 Da4 Dn4 D6 अहःक्षये; D4. 9 अहःक्षिपे; D5 अशेषतः (for अहःक्षपे).

18 D2 om. 18 (cf. v. l. 17). — a) K4. 6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D3. 6. 8 पृथक् (for तेषां). B8 D5 संवत्सराद्याणि. — d) K7 D4. 6. 9 M1. 6. 7 [ऽ]थ (for च). D5 युगे (for तथा).

19 = Manu. 1. 69. D2 om. 19 (cf. v. l. 17). — c) Dn4 तावच्छता (for °ती). Da3 संध्यां. — d) M1. 6. 7 (*sup. lin.* as in text) ततः परं (for तथाविधः). ❀ Cn: संध्यांशः युगान्तरयोरन्तरम् ॥ Cs: संध्यांशः युगावसानकालः। ❀

20 = (var.) Manu. 1. 70. D2 om. 20abc (cf. v. l. 17). K4 om. 20ab. — a) K1. 2 Dn4 G3 च (for स-). — b) Da4 सु- (for स-). B0 ततस् (for च). K6 B7. 8 (marg.) Dn1. n4 Ds D3. 8 संध्यांशेषु ततस्त्रि (B8 °था त्रि) षु. — 20cd is damaged in B7. — c) K4 D6. 9 संयाति; Ds2 हीयंते; D4 वर्तंते (for संयान्ति). K6 V1 B0. 6. 8. 9 Da3. a4 Dn1. n4 Ds1 D3. 5. 8 एकपादेन ही (Da4 हि) यंते. ❀ Cs: एकापायेन एकसहस्रलोपेन। ❀

21 a) Ds1 गतानि (for ए°). K7 शाश्वतो (for °ताँल्). — b) D9 सनातनात् (for °तनान्). — c) Ś1 K1. 2. 4 तत्र (for तात). B7 एतद्विदां ब्रह्म तात; D7 G1 इति तु ब्रह्म विद्यांतं; T1 G3. 6 इति तत्त्वविदा स (T1 त) त्त्वं. — d) G1 विदित्वा (for °तं).

22 = (var.) Manu. 1. 81. — a) Da4 सकुलो (for सकलो). — c) Da4 [आ]गतः; D4 °मत् (for °मः). D7 T1 G3. 6 नाधर्मो नागमः कश्चित्. — d) V1 B6–9 Da3. a4 D5 मनुष्याणां; D7 T G1. 3. 6 M1. 5–7 युगे तस्मिन् (for परस्तस्य). Ś1 K1. 2. 4 मनस्तस्यातिवर्तते.

23 = (var.) Manu. 1. 82. — a) D7 T1 G1. 3. 6

इतरेष्वागमाद्धर्मः पादशस्त्ववरोप्यते ।
चौरिकानृतमायाभिरधर्मश्चोपचीयते ॥ २३
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिष्वेतेषां पादशो ह्रसते वयः ॥ २४
वेदवादाश्चानुयुगं ह्रसन्तीति च नः श्रुतम् ।
आयूंषि चाशिषश्चैव वेदस्यैव च यत्फलम् ॥ २५
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे धर्मा यथाशक्तिकृता इव ॥ २६
तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमम् ।
द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥ २७
एतां द्वादशसाहस्रीं युगाख्यां कवयो विदुः ।
सहस्रं परिवृत्तं तद्ब्राह्मं दिवसमुच्यते ॥ २८
रात्रिस्तावत्तिथी ब्राह्मी तदादौ विश्वमीश्वरः ।
प्रलयेऽध्यात्ममाविश्य सुप्त्वा सोऽन्ते विबुध्यते ॥ २९ C. 12. 8507 B. 12. 232[1]. 30 K. 12. 238. 63

क्रमाद् (for आगमाद्). —^{b}) Da4 Dn4 यादशस्; M7 पादांशस् (for पादशस्). V1 B8 (marg. as in text). 9 -रोपितः; T2 -रोच्यते; M1. 6 -रोह्यते (for -रोप्यते). — After 23^{ab}, D7 T G1. 3. 6 M1. 5–7 Kumbh. ed. ins :

670* सत्यं शौचं तथायुश्च धर्मश्चापैति पादशः ।

—^{c}) K4. 6 Dn1. n4 Ds D8 चौर्यकानृत-; D6 चौरकानृत-; D7 T G1. 3. 6 चोरकानृत- (for चौरिका°). ❀ Cn (reading चौर्यकानृत-): चौर्यं च कानृतं च कुत्सितमनृतम् ॥ Cs: चौरस्य भावश्चौर्यकम् । ❀ —^{d}) G1 अधर्मैश्च (for °र्मश्च). D5 चाव- (for चोप-).

24 = (var.) Manu. 1. 83. —^{a}) K2 अरोगः. G1 -सिद्धाश्च (for -सिद्धार्थाश्च). —^{c}) D5 कृत- (for कृते). K4. 7 B6 Da3. a4 D4. 5. 9 त्वेषां; D6 तथा (for [ए]तेषां). K6 V1 Bo. 7–9 Dn1. n4 Ds D2. 3. 7. 8 T G1. 3. 6 M1. 5–7 कृते (D7 T1 G1. 3. 6 °त-) त्रेतायुगे त्वेषां (K6 °गेष्वेवं; V1 D7 T G1. 3. 6 °गे तेषां; Ds °गे त्वेवं; M1. 6 °गे चैषां). —^{d}) K7 D4. 6. 9 पादतो; Dn4 यादशो (for पादशो). T2 वशं (for वयः). M5 वयो ह्रसति पादशः.

25 25^{ab} = B. 12. 261[60]. 7^{cd}. With 25, cf. Manu. 1. 84. —^{a}) K1. 4 -वेदाश्च; B6 (marg.) -विद्याश्च; B6 -वादांश्च (for -वादाश्च). —^{b}) K4 Ds1 D2. 5. 8 M1. 6 [इ]ह; K6 B7 Dn4 Ds2 D3 ह; K7 V1 Bo. 6. 9 Da3. a4 Dn1 D4. 6. 9 M5 हि; T1 न (for च). T1 च (for नः). —^{c}) K7 Da4 D2 आयु(K1 °युं)षि. D4 वाशिषाश्च. —^{d}) Da4 om. वेदस्यैव. Ś1 K1 चैव (by transp.); D5 [अ]पि च.

26 = B. 12. 261[60]. 8. = (var.) Manu. 1. 85; (var.) Parāśarasaṁhitā 1. 22. —^{a}) Da3 धर्मस्. —^{c}) Ds1 कलियुगं. K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 M5 नृणां (for धर्मा). —^{d}) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 युग(K6 om. युग)ह्रासानुरूपतः.

27 = (var.) Manu. 1. 86; (var.) Parāśara 1. 23; Vāyu P. 8. 64. —^{a}) D4 तपपरे (for तपः परं). —^{b}) B6–9 Da3. a4 उच्यते (for उत्तमम्). — V1 reads 27^{cd} on marg. —^{c}) M1. 6 दानम् (for यज्ञम्). T2 इति (for एव). —^{d}) M1. 6 शौचम् (for दानम्). K4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn4 Ds D2–6. 8. 9 एकं (for एव). Da4 कलि- (for कलौ). Da3 युगं; D7 T G1. 3. 6 M7 परं (for युगे).

28 With 28^{ab}, cf. Manu. 1. 71^{cd}. —^{a}) Ś1 K1. 2. 4 B8 (marg.). 9 D4. 6. 9 एवं; G1 M6 एतद्- (for एतां). K7 Da4 D7 -साहस्री; Dn4 -साहस्रां; T2 -साहस्रं (for °स्रीं). — With 28^{cd}, cf. Manu. 1. 73^{ab}. —^{c}) K4. 6. 7 V1 Bo. 7–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 T2 M5 सहस्र- (for °स्रं). K6 Bo Da3. a4 Dn1. n4 Ds D2. 3. 8 -परिवर्तं (for °वृत्तं). K6 Ds तं; K7 B8 (marg. as in text) D4–6. 9 तु (for तद्). M1. 6. 7 सहस्रपरिवर्तैषा. —^{d}) K7 B8 D4–7. 9 T1 G1. 3. 6 M1. 6. 7 ब्राह्मो दिवस उच्य(D4 °द्य)ते.

29 ^{a}) V1 B8 (orig.) D7 T G1. 3. 6 M1. 5–7 तु (V1 B8 M5 च) तावती (for तावत्तिथी). K6 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 रात्रिमे(B6. 8 °रे)तावतीं (Da4 Ds1 °ती) चैव; K7 D4. 6. 9 रात्रिश्च तावती चैव. —^{b}) D7 तदादन्; T1 तदा तद्; G3. 6 तदाद्यौ (for तदादौ). K7 D4. 9 देवम् (for विश्वम्). K6 ईदृशः (for ईश्वरः). —^{c}) K2 प्रलयी; T G3. 6 M1. 7 प्रळये. K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 ध्यानम्; M5 [ऽ]ध्यात्मानम् (for ऽध्यात्मम्). B7 T2 M1. 5–7 आवेश्य; D7 T1 G1. 3. 6 एवास्ते (for आविश्य). —^{d}) Da4 सुप्ता. K2 सुप्ते; Ds1 योंते (for सोऽन्ते). T1 न बुध्यते (for विबु°).

30 = 6. 30. 17. With 30, cf. Manu. 1. 73. —^{b}) Ś1 K1. 2 B9 ये; K7 D4. 6. 9 वै (for यद्). —^{c}) K2 Da4 रात्रि-; D7 T1 रात्रिः (for रात्रिं). Ś1

C. 12. 8508
B. 12. 232[1]. 31
K. 12. 238. 64

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ ३०
प्रतिबुद्धो विकुरुते ब्रह्माक्षय्यं क्षपाक्षये ।
सृजते च महद्भूतं तस्माद्व्यक्तात्मकं मनः ॥ ३१
ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं जगत् ।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥ ३२
अहर्मुखे विबुद्धः सन्सृजते विद्यया जगत् ।
अग्र एव महाभूतमाशु व्यक्तात्मकं मनः ॥ ३३
अभिभूयेह चार्चिष्मद्व्यसृजत्सप्त मानसान् ।
दूरगं बहुधागामि प्रार्थनासंशयात्मकम् ॥ ३४
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया ।
आकाशं जायते तस्मात्तस्य शब्दो गुणो मतः ॥ ३५
आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः ।
बलवाञ्जायते वायुस्तस्य स्पर्शो गुणो मतः ॥ ३६

G3 -सहस्रांतं; K1 D7 T1 °स्रांता; D5 °स्रांते (for °स्रान्तां). — ^{d}) M7 अहोरात्र- (for तेऽहोरात्र-). Da4 गेहे रात्रविदो जनाः; D7 T1 G1. 3. 6 तेहोरात्रं विदुर्जनाः.

31 With 31, cf. Manu. 1. 74^{cd}. — ^{a}) D7 T1 G3. 6 स प्रबुद्धो; M1 प्रतिबद्धो (for °बुद्धो). — ^{b}) K2. 6 ब्रह्माक्षय्य-; K7 ब्रह्मा चैव; D5 ब्रह्माक्षय्यौ; M1. 6. 7 ब्रह्माव्यक्तं (for ब्रह्माक्षय्यं). K1 क्षमाक्षये; K6 D6 क्षयाक्षये; D4. 9 क्षिपा° (for क्षपा°). — ^{c}) K7 D4. 9 ज्ञानं; Da3 तत्त्वं (for भूतं). — ^{d}) Ś1 K1. 2 सर्वात्मकं (for व्यक्ता°). K7 D4. 9 व्यक्ताव्यक्तात्मकं मनः. — After 31, K4. 6. 7 Dn1. n4 Ds D2–9 T G1. 3. 6 M1. 5–7 ins. an addl. colophon [*Sub-parvan :* K4. 6. 7 Dn1. n4 Ds D4–7. 9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name :* K4 Dn1. n4 D5 M5 शुकानुप्रश्नः; K6 Ds व्यासशुकसंवादः; M1. 6. 7 शुकानुप्रश्ने कालविभागः. — *Adhy. no.* (figures, words or both): K7 Dn4 Ds2 57; Dn1 D7 T1 G1. 3. 6 M5 58; D8 53; T2 72; M1. 6. 7 56. — *Śloka no.:* Dn1. n4 D8 32.]; while M1. 6. 7 Kumbh. ed. read 35-38 for the first time after 31, repeating the same in the proper place.

32 Ś1 K1. 2 V1 Bo. 7–9 Da3 Kumbh. ed. om. the ref. — ^{a}) B6 D7 T1 शुक्लं (for शुक्रं). ❀ **Cn**: ब्रह्म महत्तत्त्वम् ॥ **Cp**: ब्रह्म व्यापकम् ॥ **Cs**: ब्रह्म चैतन्याधिष्ठितमज्ञानम् । ❀ — ^{b}) K7 D4. 6. 7. 9 T1 G1. 3. 6 M1. 5–7 रसः; T2 रसं (for जगत्). — K6 om. (hapl.) 32^{c}–33^{b}. — ^{c}) Ś1 K1. 2 एकत्व-; B6 (marg. as in text). 7. 8 **Cp** एतस्य (for एकस्य). Ds D7 T G1. 3. 6 **Cs** ब्रह्म- (for भूतं). ❀ **Ca**: एकस्य भूतम्, एकस्माज्जातम् । ❀ ❀ **Cs**: ब्रह्मभूतस्य ब्रह्मचैतन्याधिष्ठितस्य । ❀

33 K6 om. 33^{ab} (cf. v. l. 32). D7 om. 33–34. — ^{a}) K1. 4 अहन्मुखे (for °मुखे). Ś1 K1. 2 Da4 विबुधः; K7 D4. 6. 9 T G3. 6 M1. 6. 7 विबुद्धं (D6 °धं) (for °द्धः). K7 D4. 9 T G3. 6 M6. 7 तत्; D6 सत्; M5 स (for सन्). — ^{c}) Ca. n. p [ऽ]विद्यया (for विद्यया). ❀ **Ca**: अविद्यया गुणत्रयमय्या प्रकृतीत्यादिवाच्यया ॥ **Cn**: अविद्ययेति महत्तत्त्वस्यापि कारणमुक्तम् । ❀ — ^{c}) K4. 6 Bo. 6. 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 T G1. 3. 6 M5 महद्- (for महा-). ❀ **Ca**: महाभूतं महतो जातं मनस्तत्त्वरूपं विराडाख्यम् ॥ **Cn** (reading महद्भूतं): महत् महत्तत्त्वम्, भूतं उद्भूतम् ॥ **Cs**: महद्भूतम्, महदहंकारात्मकाव्यक्तात्मकं प्रपञ्चतन्मात्रात्मकम् । ❀ — ^{d}) B8 आत्म-; D4. 9 आसु; D5 महा-; G3 आहुर्; **Cs** (gloss: शीघ्रगामि) आशु (as in text). Bo व्यक्तात्मनं; Da4 त्यक्तात्मकं (for व्यक्ता°). ❀ **Cn**: व्यक्तात्मकं वियदादिरूपम् । आशु इति सांख्याभिमतः सृष्टिक्रमो निरस्तः । युगपत्सृष्टिरेव हि शास्त्रतत्त्वमिति दृष्टिसृष्टिवादिनां घण्टाघोषः । ❀

34 D7 om. 34 (cf. v. l. 33). — ^{a}) K2 ह (for [इ]ह). K6 Bo. 6 (marg. as in text). 7–9 Da3. a4 Dn4 Ds D2. 3. 5 T2 M5 **Cnp** **Cpp** (gloss: ईश्वरः) चार्चिष्मान् (Dn4 °द्); D4. 6 चार्चिष्मन् (for °ष्मद्). T1 अभिभूते भवार्चिष्मान्; G3. 6 अथ भूयोपि चार्चिष्मान्. ❀ **Cp**: अभिभूय, अविद्यया सह आत्मवशं विधाय ॥ **Cs**: अभिभूय क्षोभयित्वा । ❀ — ^{b}) T G3. 6 M5 असृजत् (for व्यसृ°). Da4 व्यसृजत स मानसान्. ❀ **Ca**: सप्त बुद्ध्यहंकारपञ्चमहाभूताख्यान् ॥ **Cs**: सप्त महदहंकारपञ्चतन्मात्रसंज्ञान् । ❀ — ^{c}) K2 दूरग्रं; D4. 9 पूरगं (for दू°). Dn4 बहुधागामी. — ^{d}) Dn4 प्रार्थया (for प्रार्थना-). K2 -संयथात्मकं (for -संशया°).

35 = (var.) Manu. 1. 75. M1. 6. 7 Kumbh. ed. read 35–38 for the first time after 31. — ^{a}) D7 T1 G3. 6 स्पृष्टं; T2 सृष्टं; G1 स्पृष्टा (for सृष्टिं). — ^{b}) D5 नोद्यमानं (for चोद्य°). — ^{c}) D7 T G1. 3. 6 M5 आकाशो (for °शं). — ^{d}) K7 D4. 6. 9 transp. गुणो and मतः. B8 स्मृतः (for मतः). K6 V1 Bo. 6. 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 तस्य शब्दं (K6 °ब्द-) गुणं विदुः.

36 = (var.) Manu. 1. 76. For the repetition

वायोरपि विकुर्वाणाज्ज्योतिर्भूतं तमोनुदम् ।
रोचिष्णु जायते तत्र तद्रूपगुणमुच्यते ॥ ३७
ज्योतिषोऽपि विकुर्वाणाद्भवन्त्यापो रसात्मिकाः ।
अद्भ्यो गन्धगुणा भूमिः पूर्वैषा सृष्टिरुच्यते ॥ ३८
गुणाः पूर्वस्य पूर्वस्य प्राप्नुवन्त्युत्तरोत्तरम् ।
तेषां यावत्तिथं यद्यत्तत्तत्तावद्गुणं स्मृतम् ॥ ३९
उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणात् ।
पृथिव्यामेव तं विद्यादापो वायुं च संश्रितम् ॥ ४०
एते तु सप्त पुरुषा नानावीर्याः पृथक्पृथक् ।
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य सर्वतः ॥ ४१
ते समेत्य महात्मानमन्योन्यमभिसंश्रिताः ।
शरीराश्रयणं प्राप्तास्ततः पुरुष उच्यते ॥ ४२

C. 12. 8520
B. 12. 233[2]. 11
K. 12. 238. 79

---

in M1.6.7 Kumbh. ed., cf. v. l. 35. K2 om. (hapl.) 36. —ᵈ) D7 T G1.3.6 M1 (second time).5.6 (second time).7 (first time) तस्य स्पर्शं (M1.6 °र्शं·) गुणं विदुः.

37 = (var.) Manu. 1. 77. For the repetition in M1.6.7 Kumbh. ed., cf. v. l. 35. —ᵃ) Da4 विकुर्वाणो; D8 °र्वाणान् (for °र्वाणाज्). —ᵇ) K6 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 Ds D2.3.5.8 M1.6 (both first time).7 (second time) ज्योतिर्भवति भास्वरं (Da4 Ds1 भास्करः; D5 शाश्वतः; M1.6 भास्वरः); M1.6 (both second time).7 (first time) ज्योतिर्भूतस्तमोनुदः. —ᶜ) Ś1 K1.2 ज्योतिः सं·; V1 B8 (marg. as in text) D5 प्रकाशो (B8 °शं); B7 Dn1 Ds1 T2 G3.6 M6 (second time).7 (first time) रोचिष्णुर्; Da4 °ष्णुं; D7 ज्योतिष्णुर् (for रोचिष्णु). K4.6 Bo.7.9 Da3.a4 Dn1.n4 Ds D2.3.8 M1 (second time) शुक्रं; V1 B8 (orig.) D5 तस्मात्; B6.8 (marg.) शुक्लं (for तत्र). K7 D4.6.9 M1.6 (last two first time).7 (second time) रोचनं ज(D4.9 °जनं ज·; M1.6.7 [second time, *inf. lin.*] °चयञ्ज)नयच्छुक्रं. —ᵈ) K7 Da4 D4.6.9 G1.3.6 रूपं (for रूप·). G1 M1.6 (last two second time) ·गुण.

38 = (var.) Manu. 1. 78. For the repetition in M1.6.7 Kumbh. ed., cf. v. l. 35. —ᵃ) K7 ·ज्योतिषापि विकुर्वाणो. —ᵇ) M1.6 (both second time).7 (first time) संभवंति (for भवन्त्यापो). K2.7 रसात्मकः; D9 T2 M1.6.7 (last three both times) °त्मकाः (for °त्मिकाः). —ᶜ) M7 (first time) om. गन्ध. K6 B7 Dn1.n4 Ds D2.3.8 गंधस्तथा; T2 M1.6 (last two second time) °वहा (for °गुणा). —ᵈ) K4.6 V1 Bo 6–9 Da3.a4 Dn1 Ds D2.3 T2 M1 (first time).5.6.7 (last two first time) पूर्वेषां; K7 Dn4 D4–6.8.9 M1.6 (last two second time) सर्वेषां (for पूर्वैषा). K2 सृष्टिम्; K6 सृष्टम्.

39 Before 39, K7 ins. व्यास उवाच. With 39, cf. Manu. 1. 20. —ᵃ) B8 गुणान्; B8 (marg.) गुणं (for गुणाः). K7 D4–6.9 सर्वस्य (for the first पू°). —ᵇ) K2 नाप्नुवंति. V1 B8 (marg. as in text) उत्तरोत्तराः (B8 °रः); Dn4 D9 °त्तमं. —ᶜ) K7 D4.9 एषां (for तेषां). K1.7 D4.9 यावंति यं; V1 यावद्गुणं; Bo.6.9 Da3 D5 °द्यथा; D7 T1 G1.3.6 °द्विधं (for °त्तिथं). K6 Dn1.n4 Ds D2.3.6.8 M1.5–7 ते(D6 ए)षां यावद्यथा य(Dn1 Ds1 D2.6.8 °थाव)च्च. —ᵈ) D5 तावत्तत्तद्· (for तत्तत्तावद्·).

40 ᵃ) K6 D4 वै; B9 ते; D5 तं (for चेद्). —ᵇ) K2.6.7 B8 Dn1 अनैपुणान् (B8 °णं); D7 T G1 3.6 M7 °पुणाः (for °पुणात्). —ᶜ) M1.5.6 पृथिव्या·. Ś1 K1.2 इव (for एव). M7 तद् (for तं). T2 विंद्याद् (for वि°). —ᵈ) K6 V1 Bo.6 (marg.).7.8 Da3.a4 Dn1.n4 Ds D2.3.8 M5 अपां वायोश्; D4 अपो वायुं; D7 G1.3.6 M1.7 आपो वायुश् (for °युं). K6 संश्रितः; V1 B8 (marg. as in text) संश्रयं; B6 (marg.) संश्रयः; B7 संसृतं; M5 संश्रयात् (for संश्रितम्).

41 ᵃ) K7 D4.6.9 त एते; B8 (marg.) तत्र ते; D7 T G1.3.6 M1.5–7 एते वै (for एते तु). K2 transp. सप्त and पुरुषा. K6 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.5.8 एते (Da4 ततः) सप्तविधात्मानो. —ᵇ) G3.6 बुद्धि· (for नाना·). Da3 om. the second पृथक्. —ᶜ) B6 (marg. as in text).9 अशक्नुवन् (for नाश°). K1 Da4 सृष्टुम् (for स्रष्टुम्). —ᵈ) Ś1 K1.2 सममागम्य (for असमा°). K6 Bo.8 Dn1.n4 Ds D2.3.5.7.8 T G1.3.6 कृत्स्नशः; K7 V1 B6.7.8 (marg.).9 Da3.a4 D4.6.9 M1.5–7 सर्वशः (for °तः).

42 ᵃ) K4.6 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds2 D2.3.5.8 महात्मानो (for °त्मानम्). —ᵇ) K4.6 Bo.6.7.9 Da3.a4 Dn1.n4 Ds D2.3.5.8 ह्यन्योन्यम्; V1 B8 त्वन्यो° (for अन्यो°). Ś1 K1.2 ·संवृताः (for ·संश्रिताः). ❀ Cp (reading अभिसंसृताः): संसर्गिणः शरीररूपमाश्रयं संप्राप्ताः । ❀ —ᶜ) K2 प्राप्तस् (for प्राप्तास्). Bo.6.8 (marg.) शरीराश्रयसंप्राप्तास्; Da3.a4 Ca °तां प्राप्तास्.

C. 12. 8521
B. 12. 233[2]. 12
K. 12. 238. 81

श्रयणाच्छरीरं भवति मूर्तिमत्षोडशात्मकम् ।
तदाविशन्ति भूतानि महान्ति सह कर्मणा ॥ ४३
सर्वभूतानि चादाय तपसश्चरणाय च ।
आदिकर्ता महाभूतं तमेवाहुः प्रजापतिम् ॥ ४४
स वै सृजति भूतानि स एव पुरुषः परः ।
अजो जनयते ब्रह्मा देवर्षिपितृमानवान् ॥ ४५
लोकान्नदीः समुद्रांश्च दिशः शैलान्वनस्पतीन् ।
नरकिंनररक्षांसि वयःपशुमृगोरगान् ।
अव्ययं च व्ययं चैव द्वयं स्थावरजङ्गमम् ॥ ४६
तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे ।
तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः ॥ ४७
हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मे ऋतानृते ।
अतो यन्मन्यते धाता तस्मात्तत्तस्य रोचते ॥ ४८
महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्तिषु ।

— d) D4 उद्यतो (for उच्यते). ❀ Cs : पुन्नत्वेन शरीरत्वेन शयितुं शक्ता इति पुरुषाः । ❀

43 a) K6 B6 (marg. as in text). 9 Da3. a4 Dn1 Ds2 शरीरा(K6 B6 °र)श्रयणाद् ; B0 Dn4 Ds1 D2. 3. 6. 8 शरीरं श्रयणाद् (by transp.). D5. 7 अर्वाक् ; M7 श्रवणात् (for श्रय°). G1 अभवत् (for भवति). — b) D6 भूतिमत् ; M1. 6 मूर्तिमान् (for °मत्). Ds T G1. 3. 6 मूर्तिमान्षोडशात्मकः. ❀ Cn : षोडश, पञ्च स्थूलभूतानि समनस्कान्येकादशेन्द्रियाणि । ❀ — 43^{cd} = (var.) Manu. 1. 18^{ab}. — c) K4. 6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T G1. 3. 6 M1. 5–7 तम् (for तद्). K7 D4. 9 आविशति ; T2 आदिशंति (for आवि°). ❀ Cp : तं पुरुषम् । तदिति पाठे लिङ्गशरीरम् । ❀ — d) K7 D4. 9 कर्मभिः ; Dn4 कर्मणां. ❀ Cn : भूतानि सूक्ष्माणि, महान्ति महत्तत्त्वानि भुक्तावशिष्टकर्मसहितानि । बहुत्वं प्रतिपुरुषं महदादीनां भिन्नत्वप्रतिपादनार्थम् । ❀

44 a) Bom. Kumbh. ed. [उ]पादाय (for चादाय). ❀ Cs : सर्वभूतानि चतुर्विंशतितत्त्वानि । आदाय शरीरत्वेन स्वीकृत्य । ❀ — b) Ś1 K1. 2 शरणाय ; D6 तर° (for चर°). K6 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 ह ; M1 वै ; Bom. ed. हि (for च). — c) M7 आदिकर्तृ. K4. 7 B0. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 स भूतानां ; M1. 6. 7 महद्भूतं (for महाभूतं). — d) Da4 प्रजापतिः.

45 a) K7 D4. 9 भूतात्मा (for °नि). — b) T2 G1 M1 एष (for एव). D4 पुरुषाः. K1 M1 पुरः ; D7 T1 G1. 3. 6 M7 वरः (for परः). K6 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 स्थावराणि च(Ds1 क)राणि च (K6 वा) ; B8 (marg.) त्रसानि स्थावराणि च. — c) K7 D4–6. 9 जनयति (for °यते). K6 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 ततः स सृजति (B9 Da3. a4 °ते) ब्रह्मा ; B8 (marg.) ततः संसृजते ब्रह्मा. — d) K4 -मानवं ; B6 (marg.) Da3. a4 D7 T G1. 3. 6 M1. 6 (*inf. lin.*). 7 -दानवान् (for -मान°).

46 a) Da4 नदाः. — c) Da4 नरः (for नर-). D6 -यक्षांश्च (for -रक्षांसि). — d) D6 पक्षिपशु- ; T2 पशुपक्षि- (for वयःपशु-). M7 -गणोरगान् (for -मृगोरगान्). — e) T2 आयं चैव (for अव्ययं च). Da3 om. (hapl.) च व्ययं. ❀ Cs : यावत्कल्पावस्थायि गगनादिकमव्ययम् । व्ययं दंशमशकादि । ❀ — f) B7 lacuna ; D5 जगत् ; D7 T G1. 3. 6 M1. 5–7 सर्वं (for द्वयं).

47 With 47, cf. Manu. 1. 28. — a) D3 (marg.) च ; D5 ते (for ये). — b) K6 प्राक्सृष्ट्या ; D4. 6. 9 °सृष्टाः ; D7 T2 G1. 3. 6 °सृष्टौ ; M1. 5–7 °सृष्टेः (for °सृष्ट्यां). Ś1 K1. 2. 7 V1 B8 (marg. as in text) प्राक्सृष्टानि प्रपेदिरे. ❀ Ca : प्राक्सृष्ट्यां प्रागुजन्मनि ॥ Cs : प्राक्सृष्ट्यां पूर्वकल्पे ॥ Cn : प्रतिकल्पं सृष्टिवैरूप्ये कृतहानाकृताभ्यागमौ प्रसज्येताम् । ❀ — c) M1. 6 तान्येवे (for °व). K4 -पद्यते ; B6. 7 Dn1. n4 D2. 3. 8 -पाद्यंते (for -पद्यन्ते). D7 T G1. 3. 6 तान्येव ते प्रपद्यंते. — d) K1. 7 सृज्य(K1 °ज)मानः ; Da4 सृजमानाः. Ds1 om. the second पुनः.

48 48^{ab} = (var.) Manu. 1. 29. — a) D4 हिंस्राहिंस्र- (for °हिंस्रे). V1 Da3 मृदुः (for मृदु-). Dn1 -खरे (for -क्रूरे). — b) K6 धर्माधर्मान् ; K7 V1 B0. 7. 8 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8. 9 T2 M5–7 °धर्मान् ; D4 °धर्मौ (for °धर्मे). K7 ऋतेनृते ; D6 G1 ऋ(G1 वृ)तावृते ; D7 व्रताव्रते ; T1 रतानृते (for ऋता°). — M1. 6. 7 read 48^{cd} twice. — c) K7 D4. 9 यतो ; M1 (both times). 6. 7 (both second time) ततो (for अतो). K1 T2 G1 यं ; D6 नु (for यन्). K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 M5. 6. 7 (last two first time) तद्भाविताः प्रपद्यंते. — d) K7 D4–6. 9 यस्मात् (for त°). V1 तस्य च (for तत्तस्य). Da3 रोच्यते. M1. 6. 7 (all second time) यस्मिंस्तत्तस्य जायते.

49 a) K7 भूतत्वम् ; D5 नान्य° (for नाना°). ❀ Cp : महाभूतेषु महाभूतकार्येषु देहेषु । ❀ — b) Da4 मुक्तिषु (for मूर्तिषु). — c) B7 partly damaged. Da4

विनियोगं च भूतानां धातैव विदधात्युत ॥ ४९
केचित्पुरुषकारं तु प्राहुः कर्मविदो जनाः ।
दैवमित्यपरे विप्राः स्वभावं भूतचिन्तकाः ॥ ५०
पौरुषं कर्म दैवं च फलवृत्तिस्वभावतः ।
त्रय एतेऽपृथग्भूता नविवेकं तु केचन ॥ ५१
एवमेतच्च नैवं च यद्भूतं सृजते जगत् ।
कर्मस्था विषमं ब्रूयुः सत्त्वस्थाः समदर्शिनः ॥ ५२
तपो निःश्रेयसं जन्तोस्तस्य मूलं दमः शमः ।
तेन सर्वानवाप्नोति यान्कामान्मनसेच्छति ॥ ५३
तपसा तदवाप्नोति यद्भूतं सृजते जगत् ।
स तद्भूतश्च सर्वेषां भूतानां भवति प्रभुः ॥ ५४
ऋषयस्तपसा वेदानध्यैषन्त दिवानिशम् ।
अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ॥ ५५
ऋषीणां नामधेयानि याश्च वेदेषु सृष्टयः ।

C. 12. 8535
B. 12. 232[2]. 25
K. 12. 238. 94

विधियोगं; T2 विनियोगश्च. ❀ Cn: विनियोग भोक्तृभोग्यभावेन संबन्धम्। ❀ —^{d}) D5 M1. 7 वै; T2 [ए]वं (for [ए]व). Ś1 K1. 2. 4 धातैव व्यव(K4 °ध)धात्स्वयं; K6 Da4 °व विदधात्पुनः.

50 With 50, cf. 12. 230. 4. —^{a}) V1 च; B8 (marg.) तं (for तु). —^{b}) D9 om. (hapl.) from विदो up to कर्म (in 51^{a}). K1 जनः. K6 Bo. 6. 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 M1. 6. 7 प्राहुः कर्मसु मानवाः. —^{c}) K2 विष्टाः; V1 B8 (marg. as in text) प्राहुः (for विप्राः). —^{d}) Ś1 K1. 2. 4 स्व(K2 सु)भावमिति चापरे. ❀ Ca: न हि पुरुषकारदैवसहस्रेणापि शिलास्वङ्कुरप्रसवः। तस्मात्स्वभावोऽपि कारणं पृथक्। ❀ ❀ Cs: भूतचिन्तकाः लोकायतिकाः। ❀

51 = (var.) 12. 230. 5. D9 om. up to कर्म (cf. v. l. 50). B7 damaged. —^{a}) K1 चैवं; G1 रूपं (for दैवं). K7 D4–6. 9 M1. 6. 7 तु (for च). —^{b}) Ś1 K1. 2. 4 फलवृद्धिः; K6 D5. 7 T G1 °वृत्ति; B8 °वच्च; Dn1 °वृत्तिः; G3. 6 फलं वृत्ति (for फलवृत्ति-). —^{c}) G1 यत्र (for त्रय). D6 एता (for एते). D5 त्रयमेते पृथग्भूतम्. ❀ Cn: अपृथग्भूता इति पदच्छेदः। ❀ —^{d}) K6 Ds1 D5. 6 T2 M7 अविवेकं (Ds1 T2 °कस्; D5 °कात्); Ds2 M5 नविवेकस् (for °वेकं). K2 om. तु. V1 M1. 6 किंचन; Da4 कं च नः; Dn4 के च नः; Ds T2 [अ]किंचनः (Ds1 °न); D6 केन च; M1 कश्चन (for केचन). K7 D4. 9 न विशेषस्तु कश्चन; D7 T1 G1. 3. 6 अपि लोकेस्ति किंचन.

52 = (var.) 12. 230. 6. —^{a}) K4 Ds2 D3. 7 T1 G3. 6 Cs एतमेतच्; K7 Da3. a4 D4. 6. 9 एवमेवं; B6. 7. 9 D5 एतदेवं; Dn1. n4 एतमेवं; D2. 8 एतमेव; Cs एवमेव (for एवमेतच्). K7 D4. 9 तु (for च). K7 D4. 6. 9 नै(K7 चै)वं तु; Da4 चैनं च; D7 T G1. 3. 6 M5 दैवं च (for नै°). —^{b}) K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 Cs न चोभे नानुभे (Da3. a4 °भृते) न च (B8 तथा). — K2. 4 D4 om. (hapl.) 52^{c}–54^{b}; Ś1 reads the same on marg. —^{c}) K1. 6 Bo. 6–9 Dn1. n4 Ds2 D2. 3. 5–8 T G1. 3. 6 M1. 5. 6 Cp (gloss: विषयत्वावच्छिन्नं कर्म) (Cpp as in text) विषयं; K7 D9 °यान् (for °मं). Da3. a4 प्राहुः; D3 कुर्युः (for ब्रूयुः). ❀ Ca: ये कर्मस्था ऐहिकपारलौकिककर्मप्रधानास्ते विषमं नानारूपं जगत्कारणं ... प्राहुः॥ Cn: कर्मस्था इत्यार्हतानां यौगिकं नाम। ते हि कर्माष्टकवशादेव जीवानां बन्धः, तप्तशिलारोहणादिना निर्जराख्येन च धर्मेण मोक्ष इति वदन्ति। ❀ —^{d}) Da3. a4 स्वस्थाश्च (for सत्त्वस्थाः). V1 -दर्शनाः (for -दर्शिनः).

53 K2. 4 D4 om. 53 (cf. v. l. 52). Ś1 reads 53 on marg. 53^{ab} is damaged in B7. —^{a}) K6 Da3 Dn4 ततो (for तपो). Some MSS. निश्रेयसं. Da3. a4 जंतो; G1 तेजो. —^{b}) K6 V1 Bo. 8. 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 7. 8 T G1. 3. 6 M1. 5–7 transp. दमः and शमः. — 53^{cd} = (var.) 12. 230. 9^{cd}. K7 D6. 9 om. (hapl.) 53^{d}–54^{a}. —^{d}) D7 T G1. 3. 6 M1. 5–7 transp. यान् and कामान्.

54 = (var.) 12. 230. 10. K2. 4 D4 om. 54^{ab} (cf. v. l. 52). K7 D6. 9 om. 54^{a} (cf. v. l. 53). Ś1 reads 54^{ab} on marg. —^{a}) M1. 6 तपसः (for °सा). Ś1 K1 तपसा च तदाप्नोति. —^{b}) ❀ Cs: यद्भूतं परमात्मा। ❀ —^{c}) D5 समुद्भूतश्च; T2 सर्वभूतं (for स तद्भूतश्च). —^{d}) K7 D4. 9 भविता (for भवति).

55 ^{b}) Ś1 K1. 2 G1 M7 अध्यैषत; K6 B8 (marg.) Ds1 °ष्यंत; V1 B6. 7. 9 Da3. a4 D5 T2 अध्येष्यंति; B8 अधीयंते (for अध्यैषन्त). ❀ Cn: अध्यैषन्त, प्राग्जन्मन्यधीतान्योगबलेनैव स्मृतवन्तः। ❀ —^{c}) Ś1 K1. 2. 4 -निधनान्. Ś1 K1. 2 नित्यान्; K6 Bo. 7 Da3 Dn1. n4 Ds D2. 3. 5. 8 विद्या; K7 V1 B6 (marg.). 8 D4. 6. 9 M5. 7 दिव्या (for नित्या). —^{d}) Ś1 K1. 2 वागुत्सृष्टान्. ❀ Cs: उत्सृष्टा स्मृत्वोच्चारिता। ❀ — After 55, M1. 5–7 ins.:

. 671* आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।

C. 12. 8537
B. 12. 233[2]. 26
K. 12. 238. 95

शर्वर्यन्तेषु जातानां तान्येवैभ्यो ददाति सः ॥ ५६
नामभेदस्तपःकर्मयज्ञाख्या लोकसिद्धयः ।
आत्मसिद्धिस्तु वेदेषु प्रोच्यते दशभिः क्रमैः ॥ ५७
यदुक्तं वेदवादेषु गहनं वेददृष्टिभिः ।
तदन्तेषु यथायुक्तं क्रमयोगेन लक्ष्यते ॥ ५८
कर्मजोऽयं पृथग्भावो द्वंद्वयुक्तो वियोगिनः ।
आत्मसिद्धिस्तु विज्ञाता जहाति प्रायशो बलम् ॥ ५९
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।

[M5 नित्या (for दिव्या). — **Cn** refers to the above line as उत्तरार्ध of 55^{cd} ; quoted as such by Śaṁkara in Brahmasūtrabhāṣya on 1. 3. 28.]

56 56^{ab} is partly damaged in B1. — ^{b}) B9 **Cp** (**Cpp** as in text) देवेषु ; D7 T G1. 3. 6 M1. 5–7 लोकेषु (for वेदेषु). Ś1 (*sup. lin.*) K1. 2 B0 Da3. a4 **Cp** दृष्टयः ; K7 D4. 6. 9 वृत्तयः (for सृष्टयः). ❀ **Cp** : देवेषु देवसर्गरूपाः । ❀ — After 56^{ab}, K2. 4. 6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T G1–3. 6 M1. 5–7 **Cn**. p. s Kumbh. ed. ins. :

672* नानारूपं च भूतानां कर्मणां च प्रवर्तनम् ।
वेदशब्देभ्य एवादौ निर्मिमीते स ईश्वरः ।
नामधेयानि चर्षीणां याश्च वेदेषु सृष्टयः ।

[(L. 1) V1 B8 नानारूपाणि ; B8 (marg.) T2 G1 M7 Kumbh. ed. नाम रूपं च (for नानारूपं च). Dn4 प्रवर्तिता ; D4 °र्तने (for °र्तनम्). — D5 om. from the post. half of line 1 up to the post. half of line 3. — (L. 2) K2 वेदशब्देव एव स (for the prior half). K2. 4 निर्ममे तन् ; Da4 Dn4 निर्मिमि(Dn4 °मा)ते ; Ds1 निर्मिमीते (for निर्मि°). K2. 4. 7 V1 D3. 4. 6. 7. 9 T G1. 3. 6 M5 महेश्वरः (for स ईश्वरः). — (L. 3) K2. 4 वेदानां ; Dn1. n4 Ds1 वर्षाणां ; D7 T G3. 6 M5 (*inf. lin.*). 7 वर्णानि ; G1 सर्वाणि ; M1. 5. 6 चार्षाणि (for चर्षीणां). K2 यच्च ; K6 Ds **Cs** वर्णा (for याश्च). B6. 9 देवेषु ; T G1. 3. 6 लोकेषु (for वेदेषु). K2. 4 Da3. a4 D9 **Cp**. s दृष्टयः ; D4 वृत्तयः (for सृष्टयः). ❀ **Cp** : पाठान्तरे वेदेषु दृष्टयः, वेदप्रोक्तानि ज्ञानानि । ❀]

— D5 om. 56^{c}. — ^{c}) Dn1. n4 D2. 3. 8 T1 G6 शर्वर्यंते सु° ; D7 G1 श(D7 स)र्वस्य तेषु (for शर्वर्यन्तेषु). K7 D7 जातानि ; B8 भूतानां ; T2 सृष्टानां (for जातानां). V1 शर्वर्यंते प्रसूतानाम्. ❀ **Cn** : शर्वर्यन्ते सर्गादौ ॥ **Cs** : शर्वर्यन्तेषु पूर्वकल्पेषु । ❀ — ^{d}) K7 D4. 9 तानि तेभ्यो (for तान्येवैभ्यो). M1. 6 दधाति. D7 T G1. 3. 6 M7 [अ]जः (for सः). K6 V1 B0. 6–9 Dn1. n4 Ds D2. 3. 5. 8 M5 अ(B6. 8. 9 Ds D5 M5 ता)न्येभ्यो विदधात्यजः (B8 °ति सः ; D5 °त्पुनः) ; Da3. a4 नान्यथा विदधात्यजः ; D6 तान्येभ्यो ददाति स ह.

57 ^{a}) V1 B6. 8 Da3. a4 D6 नामभेदं ; B0. 7 Dn1. n4 Ds2 D2. 3. 5. 8 °भेद° ; B8 (marg.). 9 °धेयं ; Ds1 D7 T G1. 3. 6 °भेदास् (for °भेदस्). K7 D4. 9 तु यः ; T1 ततः (for तपः-). — ^{b}) K7 D9 -यज्ञाख्यो ; M5 -यज्ञाद्या (for °ख्या). K2 कर्म- (for लोक-). K6. 7 Ds D4. 5. 7. 9 T G1. 3. 6 M1. 5–7 -सिद्धये (for °यः). **Cn** -यज्ञाख्यालोकसिद्धयः. — ^{c}) K6 Ds D7 T G1. 3. 6 M5 **Cs** -सिद्धैस् ; B9 -सिद्धस् ; Da3 -सिद्धीस् (for -सिद्धिस्). G1 देवेषु ; M1. 6. 7 लोकेषु (for वेदेषु). ❀ **Cn** : आत्मसिद्धिः आत्मनो मुक्तिः ॥ **Cp** : आत्मसिद्धिः शरीरादिवैलक्षण्येनावस्थानम् ॥ **Cs** (reading °सिद्धैः) : आत्मसिद्धैः वेदेषु सिद्धस्वरूपैः । ❀ — ^{d}) T2 प्रोच्यंते. ❀ **Cp** : दशभिः क्रमैः मण्डलैः । ❀

58 = (var.) 12. 230. 11. — ^{b}) K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 -दर्शिभिः ; G1 M1 -सृष्टिभिः (for -दृष्टिभिः). — ^{c}) M7 तदंते च (for तदन्तेषु). K6 Ds यदुक्तं च (Ds यत्) ; K7 D9 यथायोगं ; B8 D7 T G1. 3. 6 M5. 6 (*inf. lin.* as in text). 7 °दृष्टं ; B9 lacuna ; D5 च यदुक्तं (for यथायुक्तं). ❀ **Ca**. n. p : अन्तेषु वेदान्तेषु, उपनिषत्सु । ❀ — ^{d}) G1 कर्म- (for क्रम-). K2 -योगो न ; D5 M1. 6 -योगेषु (for -योगेन). Dn4 लक्षते ; M7 लभ्यते. ❀ **Cn** : क्रमयोगेन पूर्वोक्तेन नामादिदशकेन ॥ **Cp** : अष्टाचत्वारिंशत्संस्कारापादनेन ॥ **Cs** : संप्रदायसंबन्धेन । ❀

59 = Maitrā. Up. 6. 22. — ^{a}) ❀ **Cn** : पृथग्भावः पृथक्त्वं, द्वैतदर्शनमिति यावत् । ❀ — ^{b}) K2 तन्मयुक्तो (for द्वंद्व°). K6 B0. 6. 7 Dn1. n4 Ds D2. 3. 8 **Cn**. p (gloss : देहाभिमानवतः). s [ऽ]पि देहिनः ; V1 B8 D7 T G1. 3. 6 M1. 5–7 हि देहिनां (V1 B8 °नः) (for वियोगिनः). ❀ **Ca** : वियोगिनः योगाप्राप्तिमतः । ❀ — ^{c}) K4. 6 B0. 6–9 Da4 Dn4 Ds D2. 3. 6. 8 T2 M1. 5–7 विज्ञानाज् (for °ता). Dn1 तमात्मसिद्धिर्विज्ञानाज्. — ^{d}) B6 (marg. as in text). 9 Da3. a4 **Cn** बलात् ; **Cp** [अ]बलात् ; **Cpp** [अ]बलम् (for बलम्). K6 B0. 7. 8 Dn1. n4 Ds D2. 3. 8 जहाति पुरुषो बलात्. ❀ **Ca** : आत्मसिद्धिः शरीरादिवैलक्षण्येनावस्थानम् । सा विज्ञाता सती बलं कर्मबलं शबलितात्मदर्शनफलं जहाति त्यजति । प्रायोग्रहणात् जीवन्मुक्तावस्थायां भोक्तव्यं कर्मफलमनुजानीते । भाविकर्मफलं विलीयते, ऊषर इव बीजवपनमिति ॥ **Cp** : अबलात्, अनिर्वाच्यादेरज्ञानात् । ❀

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ ६०
आरम्भयज्ञाः क्षत्रस्य हविर्यज्ञा विशस्तथा ।
परिचारयज्ञाः शूद्रास्तु तपोयज्ञा द्विजातयः ॥ ६१
त्रेतायुगे विधिस्त्वेषां यज्ञानां न कृते युगे ।
द्वापरे विप्लवं यान्ति यज्ञाः कलियुगे तथा ॥ ६२
अपृथग्धर्मिणो मर्त्या ऋक्सामानि यजूंषि च ।
काम्यां पुष्टिं पृथग्दृष्ट्वा तपोभिस्तप एव च ॥ ६३
त्रेतायां तु समस्तास्ते प्रादुरासन्महाबलाः ।
संयन्तारः स्थावराणां जङ्गमानां च सर्वशः ॥ ६४
त्रेतायां संहता ह्येते यज्ञा वर्णास्तथैव च ।
संरोधादायुषस्त्वेते व्यस्यन्ते द्वापरे युगे ॥ ६५
दृश्यन्ते नापि दृश्यन्ते वेदाः कलियुगेऽखिलाः ।

C. 12. 8546
B. 12. 233(2). 36
K. 12. 238. 105

---

60 ^{a}) D4 द्वि (for द्वे). K1 ब्रह्मणे; K4 ब्राह्म*; G1 ब्रह्मणि. — ^{c}) K2 निष्क्रांतः; K7 D4.9 M1.6.7 तत्त्वज्ञः (M1.6.7 °ज्ञाः) (for निष्णातः). — ^{d}) Ś1 K1.4 पर- (for परं). M1.6.7 परं ब्रह्माभियांति ते.

61 = (var.) 12. 230. 12. — ^{a}) K6 Da3 Dn1.n4 Ds M5 Cn (gloss : पशुहिंसा) आलंभ- (for आरम्भ-). Ś1 K1.2.4 -यज्ञः (for -यज्ञाः). K6 B0.7.9 Da3.a4 Dn1.n4 Ds D2.3.8 क्षत्राश्च; V1 B6.8 क्षत्राः स्युर्; D7 T G1.3.6 M5 राजानो (for क्षत्रस्य). — ^{b}) Ś1 K1.2.4 हविर्यज्ञो (for °र्यज्ञा). K4 विधास्; D5 M1.6 विशां (for. विशस्). K6 V1 B0.6–9 Da3 Dn1.n4 Ds D2.3.7.8 T G1.3.6 स्मृताः; K7 D4.6.9 तदा; Da4 स्मृतः (for तथा). ❀ Cp : हविरिति पाकयज्ञोपलक्षणम् ॥ Cs : हविर्यज्ञाः कृषिगोरक्षादिना हविरुत्पादकाः । ❀ — ^{c}) Hypermetric. K2 -यज्ञः (for -यज्ञाः). K1 श्रद्धास्तु; K6.7 B9 Da4 Ds1 D4.6.7.9 T G1.3.6 शूद्राश्च; D5 शूद्राणां (for °स्तु). — ^{d}) K2 तपोयज्ञ- (for °यज्ञा).

62 ^{a}) Ś1 K1.2.4 त्रेतायुग- (for °युगे). K6 V1 B0.6 (marg. as in text).7–9 Da3.a4 Dn1.n4 Ds D2.3.8 त्वेष; D5–7 T G1.3.6 M1.6.7 तेषां (for त्वेषां). ❀ Ca : त्रेतायुगे कामप्रवणे मनसि विधिरधिकारिलाभात् । न तु कृते निष्कामत्वात् ॥ Cn : विधिरप्रवृत्तप्रवर्तनम् । तच्च त्रेतायामेव न तु कृते । स्वत एव तत्र तत्सिद्धेः ॥ Cs (reading [अ]विधिस्) : अनुष्ठानविलयम्, यथावदनुष्ठानाभावः । ❀ — ^{b}) Da4 corrupt. — 62^{cd} = 12. 230. 15^{ab}. — ^{c}) V1 B6 (marg.) संप्लवं; Dn4 विस्तवं (for विप्लवं). — ^{d}) D5 कृत- (for कलि-).

19 = (var.) 12. 224. 71. — ^{a}) K1. 4 विसृत्वं ; K6 V1 Bo. 6–9 Da3. a4 Dn1. a4 Ds D2. 3. 5. 8 निश्रितं ; K7 D4. 6. 9 विस्तृतं ; D7 T G1. 3. 6 M5 विहितं (for विसृतं). — ^{c}) K4. 6. 7 Bo. 7 Da4 Dn1. n4 Ds D2–4. 6. 8. 9 यत् (for तत्). B8 (marg. as in text) D5. 7 T G1. 3. 6 M1. 5–7 ते (for मे). — ^{d}) M7 यत्र (for यतः). K7 D7 T1 G3. 6 संयाति (for संयान्ति). K7 D4. 6. 7. 9 T G1. 3. 6 M1. 5–7 च प्रजाः (for यान्ति च). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 सूते यश्चात्ति (K6 यश्चांति ; V1 ययांति) च प्रजाः.

C. 12. 8732
B. 12. 239[6]. 20
K. 12. 244. 20

स्वभावेन प्रवर्तन्ते द्वंद्वसृष्टानि भूरिशः ॥ २०
सर्गः कालो धृतिर्वेदाः कर्ता कार्यं क्रियाफलम् ।
एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥

२३१

भीष्म उवाच ।
इत्युक्तोऽभिप्रशस्यैतत्परमर्षेस्तु शासनम् ।
मोक्षधर्मार्थसंयुक्तमिदं प्रष्टुं प्रचक्रमे ॥ १
शुक उवाच ।
प्रजावाञ्श्रोत्रियो यज्वा वृद्धः प्रज्ञोऽनसूयकः ।
अनागतमनैतिह्यं कथं ब्रह्माधिगच्छति ॥ २
तपसा ब्रह्मचर्येण सर्वत्यागेन मेधया ।
सांख्ये वा यदि वा योगे एतत्पृष्टोऽभिधत्स्व मे ॥ ३
मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं समवाप्यते ।
येनोपायेन पुरुषैस्तच्च व्याख्यातुमर्हसि ॥ ४

---

20 = (var.) 12. 224. 72. —^{a}) K$_6$ V$_1$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2.3.8}$ यच्चेदं; D$_7$ T$_1$ G$_{1.6}$ यातेदं (G$_1$ °तं); G$_3$ सा तेदं (for धातेदं). D$_{a3.a4}$ प्रभवं; D$_{n1}$ °वः (for °व-). —^{c}) B$_{7.8}$ (marg.) D$_{n1.n4}$ D$_s$ D$_{2.3.8}$ स्वभावेनैव वर्तते. —^{d}) K$_6$ B$_{0.6}$ (marg. as in text).$_9$ D$_{a3.a4}$ D$_5$ ब्रह्म- (for द्वंद्व-). Ś$_1$ K$_{1.2}$ -शस्तानि; K$_7$ D$_{4-6.9}$ -युक्तानि (for -सृष्टानि). B$_8$ (marg.) सर्वशः (for भूरिशः).

21 = (var.) 12. 224. 73. —^{a}) K$_7$ सर्ग-; B$_8$ (marg.) G$_3$ स्वर्गः; D$_{a4}$ D$_s$ सर्गाः (for सर्गः). B$_8$ (marg.) कामो (for कालो). D$_6$ भृतिर्; D$_7$ T G$_{1.3.6}$ M$_5$ क्रिया (for धृतिर्). —^{b}) K$_2$ कांता (for कर्ता). K$_7$ कार्य- (for कार्यं). —^{c}) B$_6$ (marg.).$_8$ (marg. as in text) सर्वं (for तात). —^{d}) M$_{1.6.7}$ मा (for मां). G$_3$ -पृच्छति.

Colophon: G$_2$ missing; K$_{3.5}$ B$_{1-5}$ D$_{a1.a2}$ D$_{n2.n3}$ D$_1$ G$_{4.5}$ M$_{2-4}$ absent. —*Sub-parvan*: Ś$_1$ K$_{1.2.4.6.7}$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2-4.6-9}$ T G$_{1.3.6}$ M$_{1.5-7}$ मोक्षधर्म. — *Adhy. name*: Ś$_1$ K$_{1.2.4}$ शुकप्रश्नः; K$_6$ V$_1$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2.3.5.8}$ M$_5$ शुकानुप्रश्नः; K$_7$ D$_{4.6.9}$ शुकानुप्रश्ने धर्मानुख्यापनं; M$_{1.6}$ क्रियाफलप्रतिपादनः; M$_7$ क्रियाफलविपाकः. —*Adhy. no.* (figures, words or both): K$_6$ M$_{1.6.7}$ 63; K$_7$ 7; D$_{n1}$ D$_7$ T$_1$ G$_{1.3.6}$ M$_5$ 65; D$_{n4}$ D$_{s2}$ 64; D$_8$ 60; T$_2$ 79. —*Śloka no.*: D$_{n1.n4}$ D$_s$ 21.

231

☞ This adhy. is missing in G$_2$ (cf. v. l. 12. 222. 19).

1 D$_{a4}$ व्यास (for भीष्म). —^{a}) K$_7$ D$_{4.6.9}$ [ऽ]थ; B$_9$ तु; D$_7$ T$_1$ G$_{1.3.6}$ हि (for ऽभि-). —^{b}) B$_9$ च (for तु). —^{c}) K$_6$ -चयार्थ- (for -धर्मार्थ-). M$_1$ -सहितम् (for -संयुक्तम्). —^{d}) B$_6$ इमं; B$_7$ इति (for इदं). B$_6$ (marg. as in text).$_{7.9}$ प्रश्नं; B$_8$ (marg.) वक्तुं (for प्रष्टुं). D$_5$ इदं वचनमब्रवीत्.

2 ^{a}) K$_{4.6.7}$ V$_1$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2-9}$ T$_1$ G$_3$ प्रज्ञावान् (for प्रजा°). —^{b}) K$_6$ V$_1$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2.3.5.6.8}$ कृत-; T$_2$ M$_5$ वृद्ध-; M$_7$ वृद्धं (for वृद्धः). K$_{1.2.4.7}$ D$_{4.7.9}$ T$_1$ G$_{1.3.6}$ M$_{1.5-7}$ प्राज्ञो (for प्रज्ञो). —^{c}) D$_5$ अनागतमते तिष्ठन्. ❀ Ca: अनागतं, प्रत्यक्षादिप्रमाणानवधृतम्। अनैतिह्यं, इतिहासादावश्रुतम् । ❀

3 ^{b}) Ś$_1$ K$_{1.2.4}$ संग- (for सर्व-). D$_7$ मे यथा (for मेधया). —^{c}) K$_7$ D$_{4.6.9}$ सांख्यो; D$_7$ T$_1$ G$_{1.3.6}$ सांख्यं (for सांख्ये). D$_{4.6.9}$ योगी; D$_7$ T$_1$ G$_{1.3.6}$ योगं (for योगे). —^{d}) K$_{6.7}$ V$_1$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2-6.8.9}$ वदस्व; D$_7$ T G$_{1.3.6}$ M$_{1.5-7}$ ब्रवीहि (for ऽभिधत्स्व).

4 ^{a}) K$_7$ D$_5$ वा (for च). —^{b}) K$_4$ एकाग्र्यं- K$_6$ V$_1$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2.3.5.8}$ यथैका-

व्यास उवाच ।

नान्यत्र विद्यातपसोर्नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र सर्वसंत्यागात्सिद्धिं विन्दति कश्चन ॥ ५
महाभूतानि सर्वाणि पूर्वसृष्टिः स्वयंभुवः ।
भूयिष्ठं प्राणभृद्ग्रामे निविष्टानि शरीरिषु ॥ ६
भूमेर्देहो जलात्सारो ज्योतिषश्चक्षुषी स्मृते ।
प्राणापानाश्रयो वायुः खेष्वाकाशं शरीरिणाम् ॥ ७
क्रान्ते विष्णुर्बले शक्रः कोष्ठेऽग्निर्भुक्तमर्छति ।
कर्णयोः प्रदिशः श्रोत्रे जिह्वायां वाक्सरस्वती ॥ ८
कर्णौ त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
दर्शनानीन्द्रियोक्तानि द्वाराण्याहारसिद्धये ॥ ९
शब्दं स्पर्शं तथा रूपं रसं गन्धं च पञ्चमम् ।
इन्द्रियाणि पृथक्त्वर्थान्मनसो दर्शयन्त्युत ॥ १०
इन्द्रियाणि मनो युङ्क्ते वश्यान्यन्तेव वाजिनः ।
मनश्चापि सदा युङ्क्ते भूतात्मा हृदयाश्रितः ॥ ११
इन्द्रियाणां तथैवेषां सर्वेषामीश्वरं मनः ।

C. 12. 8745
B. 12. 240[39].12
K. 12. 245. 12

ड्यम(Da4 °ग्रम-; D5 °ड्याद)वाप्यते; K7 D4. 6. 7. 9 T G1. 3. 6 M1. 5–7 ऐ(K7 D4. 9 [अ]प्यै)काउयं यदि वा(D4. 9 °दि चा-; M1. 5. 6 °द्वा)प्यते; B8 (marg.) यथैकाउयं समश्नुते. — ^{c}) D6 केन (for येन). B8 (marg.) पुरुषस्; Da4 °षौ (for °षैस्). — ^{d}) Ś1 K1. 2 तं च; K4. 6. 7 Bo. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds D2–5. 8. 9 तत्त्वं; V1 तम्मे (for तच्च). Da4 Dn4 अर्हति.

5 ^{a}) ❀ Cs : तपः सात्त्विको निवृत्तिधर्मः । ❀ — ^{b}) Ś1 K1 -विग्रहात् (for -नि°). — ^{c}) D7 T G1. 3. 6 M1. 6. 7 लोभ- (for सर्व-). Ś1 K1 -संन्यासात्; K2 -संध्यासात् (for -संत्यागात्). — ^{d}) D5 सर्वं (for सिद्धिं). V1 B8 (marg.) D5 मानवः; Da4 कश्च नः.

6 ^{a}) B8 (marg. as in text) महान्येतानि (for महाभू°). — ^{b}) K2 B7 पूर्वा सृष्टिः; K6 पूर्वसृष्टिं; K7 पूर्वं सृष्टिः; Bo पृथक्सृष्टिः; B8 (orig.; marg. as in text) भूतसृष्टिः; B8 (also marg.) Dn4 Ds D2. 3 पृथक्सिद्धिः; D5 सर्वसृष्टिं; D7 T1 G1. 3. 6 पूर्वसृष्टौ (for °सृष्टिः). — ^{c}) D7 T G1. 3. 6 M7 -काये (for -ग्रामे). K2 भूयिष्ठिं प्राणभूद्ग्रामे (sic); K7 D4. 6. 9 °ष्ठं भूत(D6 प्राण)संघाते; D5 °ष्ठं प्राणभिद्ग्राहैर्. — ^{d}) K1 निर्विष्टानि; K2 विनि°; Bo विवि° (for निवि°).

7 G3 om. 7^{a}–8^{b}. — ^{a}) Ds2 D7 T G1. 6 देहा (for देहो). K4. 7 D4. 6. 9 स्वेदो; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 स्नेहो; D5. 7 T G1. 6 M1. 5–7 स्रोतो (for सारो). — ^{b}) D7 T1 G6 सृते (for स्मृते). — ^{c}) D9 वायुं. V1 Da4 D8 प्राणापानाश्रितो (Da4 °समो) वायुः. — ^{d}) Ds1 खं च; D4. 6. 9 खानि (for खेषु). D7 T G1. 6 M7 आकाशः (for °शं).

8 G3 om. 8^{ab} (cf. v. l. 7). — ^{a}) D7 G1 कांते (for क्रान्ते). K2 Da3 विष्णुर्बलेः; Da4 Dn4 M5 विष्णुबले (Da4 °ले:). — ^{b}) K1 कौष्ट्रे; K2. 4 V1 Ds2 काष्ठे (for कोष्ठे). K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 भोक्तुम्; B8 (marg.) भुजम्; D7 T1 G1. 6 भुक्तिम् (for भुक्तम्). K4. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T1 G1. 6 M1 इच्छति (Dn4 °सि); B8 (marg.) T2 M5–7 ऋच्छति (for अर्छति). — ^{c}) Dn1 M5. 7 च (for प्र·). Ś1 K1. 2. 4 Dn1 Ds D2. 3. 8 श्रोत्रं (for श्रोत्रे). K7 D4. 9 कर्णमूले दिशः श्रोत्रे. — ^{d}) K7 D4. 9 च (for वाक्). Ds1 शरीरिणी (for सरस्वती).

9 ^{c}) D5 दशैतानि; D7 T G1. 3. 6 M1. 5. 6 दश तानि (for दर्शनानि). K6 Bo. 6 (marg.). 7. 8 (marg.) Da3. a4 Dn1. n4 Ds D2. 3. 8 दर्शनीयेंद्रियोक्तानि. — ^{d}) K1 आवार-; D7 T G1. 3. 6 आहार्य- (for आहार-).

10 ^{a}) K1. 4. 7 T1 शब्दस्पर्शं; K6 Bo. 6. 7. 8 (marg. as in text) Da3 Dn1. n4 Ds D2. 3. 5. 8 शब्दः स्पर्शस्; B9 Da4 शब्दस्पर्शस्; M1. 5–7 शब्दः स्पर्श (for शब्दं स्पर्शं). — ^{b}) K4. 6 Bo. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 M7 रसो गंधश्च पंचमः (K4 °मं). — ^{c}) V1 Bo. 6–8 Dn1. n4 Ds D2. 3. 8 इंद्रियार्थान् (V1 °र्थं) (for °याणि). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 विद्याद्; K7 D4. 6. 9 चार्थान्; D7 T G1. 3. 6 M1. 5–7 स्वार्थान् (for त्वर्थान्). — ^{d}) K6 V1 B6. 7 Da3 D7 T G1. 3. 6 M1. 5–7 मनसा (for °सो). Bo. 8. 9 Dn1. n4 Ds D2. 3. 5. 8 इंद्रियेभ्यस्तु (B9 °श्च) नित्यदा; Da4 मनसादर्शयत्पुनः.

11 ^{a}) K1 Da4 Dn4 युक्ते. — ^{b}) B6. 8 वश्मीन् (for वश्यान्). Da3. a4 D7 यंते च (for यन्तेव). — ^{c}) K4. 6 Da4 Dn4 सदा युक्ते; B7 समायुंक्ते. — ^{d}) M1 भूतानां (for °त्मा). Ś1 K1. 2 हृदयस्थितः; K4 °यसंस्थितः (hypermetric); D7 T1 G1. 3. 6 °ये स्थितः (for °याश्रितः).

12 ^{a}) K4. 6 B9 Da3 Dn1. n4 Ds1 D2. 8 तथैवैषां;

C. 12. 8746
B. 12. 240[39]. 12
K. 12. 245. 12

नियमे च विसर्गे च भूतात्मा मनसस्तथा ॥ १२
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना मनः ।
प्राणापानौ च जीवश्च नित्यं देहेषु देहिनाम् ॥ १३
आश्रयो नास्ति सत्त्वस्य गुणशब्दो न चेतना ।
सत्त्वं हि तेजः सृजति न गुणान्वै कदाचन ॥ १४
एवं सप्तदशं देहे वृतं षोडशभिर्गुणैः ।
मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि ॥ १५
न ह्ययं चक्षुषा दृश्यो न च सर्वैरपीन्द्रियैः ।
मनसा संप्रदीप्तेन महानात्मा प्रकाशते ॥ १६
अशब्दस्पर्शरूपं तदरसागन्धमव्ययम् ।
अशरीरं शरीरे स्वे निरीक्षेत निरिन्द्रियम् ॥ १७
अव्यक्तं व्यक्तदेहेषु मर्त्येष्वमरमाश्रितम् ।
योऽनुपश्यति स प्रेत्य कल्पते ब्रह्मभूयसे ॥ १८
विद्याभिजनसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १९
स हि सर्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च ।

K7 V1 D4. 6. 9 M5 य(V1 अ)थैतेषां; D7 T G1. 3. 6 यथा तेषां; M1. 6 तथैतेषां; M7 तथा तेषां (for तथैवेषां). —^{b}) B8 (marg. as in text) ईश्वरो. — Ś1 K1. 2. 4 om. (hapl.) 12^{c}–13^{b}. —^{d}) Da3 Dn1. n4 D2. 8 मानसस् (for म°). D5 तदा (for तथा). ❀ Ca : भूतात्मा अहंकारः ॥ Cn : बुद्ध्युपाधिर्जीवः । ❀

13 Ś1 K1. 2. 4 om. 13^{ab} (cf. v. l. 12). D4 reads 13 twice. —^{c}) D5 om. from जीव up to देहेषु (in 13^{d}). K6 जीवस्तु; K7 D4 (both times). 6. 9 देही च; Da3. a4 जीवस्य (for °श्च). —^{d}) M7 नित्य- (for नित्यं). M1. 6. 7 भूतानि (for देहेषु).

14 ^{a}) K6 आश्रमो; T2 G1 (before corr.) आश्रये (for °यो). D4 M1. 5. 6 नाति- (for नास्ति). Ś1 K1. 2. 4 शब्दस्य; T1 देहस्य; G1 तत्त्वस्य (for सत्त्वस्य). ❀ Ca : आश्रयः उपादानकारणम् । सत्त्वस्य आत्मनः ॥ Cn : सत्त्वस्य बुद्धेराश्रयः प्रागुक्तो देहः ॥ Cv : सत्त्वस्य प्राणिसमूहस्य । ❀ —^{b}) K4 Da4 गुणशब्दे; B7–9 Dn1. n4 Ds D2. 8 Cs : गुणाः शब्दो (Ds °ब्दे); D8 गुणः शब्दो (for गुणशब्दो). K6 Bo Da3. a4 चेतनः (for °ना). D7 T G1. 3. 6 M1. 5–7 गुणः सत्त्वस्य चेतना. ❀ Ca : गुणत्वेन कार्यत्वादिना शब्द्यत इति गुणशब्दो बुद्ध्यादिर्विषयान्तः । ❀ —^{c}) Dn4 सत्त्वे (for सत्त्वं). M7 चेतः (for तेजः). ❀ Ca : सत्त्वमात्मा तेजो बुद्धिं सृजति ॥ Cn : तेजः वासना सत्त्वं सृजति, न तु गुणान् ॥ Cs : तेजः दर्शनस्पर्शनादिसामर्थ्यम् । ❀ —^{d}) K4 [अ]गुणान्; Cap गुणाः (for गुणान्). K7 V1 Bo. 6. 8 Dn1. n4 D2–6. 8. 9 कथंचन (for कदा°).

15 ^{a}) Dn4 सप्तदशे. V1 B6. 7. 8 (marg. as in text). 9 Da3 D7 T G1. 3. 6 देहं; Da4 स्नेहं (for देहे). —^{b}) K6 घृतं; K7 Da4 D4. 9 वृत्तं (for वृतं). ❀ Ca : सप्तदशमात्मानं षोडशभिर्विकारैर्भूतैरेकादशेन्द्रियैः ॥ Cn : सप्तदशं चिदात्मानं, षोडशभिः पञ्चेन्द्रियाणि पञ्चेन्द्रियार्थाः स्वभावादयश्च षट् तैः ॥ Cs : षोडशभिः एकादशेन्द्रियपञ्चमहाभूतैः । ❀ —^{c}) D5 मनीषा (for षी°). K1 विप्र; D5 व्यग्रः. —^{d}) Ś1 K1. 2 Bo D5 Cp (gloss : स्वरूपेण) आत्मना (for °नि).

16 ^{a}) Da3. a4 चक्षुषो; T2 °षां. K1 दृश्येन्; M5 ग्राह्यो (for दृश्यो). —^{b}) D3 हि (for च). —^{c}) K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 D3 D2–6. 8. 9 मनसा तु प्रदीपेन; D7 T G1. 3. 6 M1. 5–7 °सा दीपभूतेन. —^{d}) Da4 महात्मा न (for °नात्मा).

17 With 17, cf. Kaṭha Up. 1. 3. 15; 2. 22. —^{a}) Ś1 K1. 2 -रूपस्पर्शं (for -स्पर्शरूपं). D7 च; T G1. 3. 6 M1. 6. 7 तम् (for तद्). —^{b}) D7 मनसा गंधमव्ययं. —^{c}) B8 (marg.) अशरीरी (for °रीरं). K2. 4. 6 V1 Bo. 7. 8 (marg. as in text) Dn1. n4 Ds D3. 3. 7. 8 T G1. 3. 6 M5 शरीरेषु; K7 D4–6. 9 °रस्थं; B6. 9 °रे स्वं (for °रे स्वे). —^{d}) K6. 7 Dn1 D8 T1 M1 निरींद्रियं (M1 °यः); M6. 7 निरिंद्रियः.

18 ^{a}) K6. 7 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2–9 T G1. 3. 6 M1. 5–7 सर्व- (for व्यक्त-). T1 G3. 6 -देवेषु; M5 -भूतेषु (for -देहेषु). —^{b}) B8 (marg.) सत्त्वेषु (for मर्त्येषु). K1. 4. 6. 7 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 परम्; K2 अपरम्; D7 T G1. 3. 6 M7 अमृतन् (for अमरम्). D7 T G1. 3. 6 आहितं (for आश्रितम्). V1 मर्त्येषु शरणाश्रितं. —^{c}) Da4 यो न. Da4 D5 M6 सं- (for स). —^{d}) Ś1 K1. 2 D5 -भूतये; Da3 -भूयते (for -भूयसे).

19 = (var.) 6. 27. 18. —^{a}) K7 D4. 6. 7. 9 T G1. 3. 6 M5 (*inf. lin.* as in text) विद्याविनयसंपन्ने; Ds2 D3. 5 °विजनसंपन्ने. —^{d}) ❀ Cv : समदर्शिनः समं नारायणं पश्यतीति समदर्शिनः । ❀ — After 19, K7 reads 22^{a} followed by 20^{d}–21^{d} for the first time, repeating the same in the proper place.

20 For the repetition in K7, cf. v. l. 19. K1

वसत्येको महानात्मा येन सर्वमिदं ततम् ॥ २०
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
यदा पश्यति भूतात्मा ब्रह्म संपद्यते तदा ॥ २१
यावानात्मनि वेदात्मा तावानात्मा परात्मनि ।
य एवं सततं वेद सोऽमृतत्वाय कल्पते ॥ २२
सर्वभूतात्मभूतस्य सर्वभूतहितस्य च ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ २३
शकुनीनामिवाकाशे जले वारिचरस्य वा ।
यथा गतिर्न दृश्येत तथैव सुमहात्मनः ॥ २४
कालः पचति भूतानि सर्वाण्येवात्मनात्मनि ।
यस्मिंस्तु पच्यते कालस्तं न वेदेह कश्चन ॥ २५
न तदूर्ध्वं न तिर्यक्च नाधो न च तिरः पुनः ।
न मध्ये प्रतिगृह्णीते नैव कश्चित्कुतश्चन ॥ २६
सर्वेऽन्तःस्था इमे लोका बाह्यमेषां न किंचन ।
यः सहस्रं समागच्छेद्यथा बाणो गुणच्युतः ॥ २७
नैवान्तं कारणस्येयाद्यद्यपि स्यान्मनोजवः ।
तस्मात्सूक्ष्मात्सूक्ष्मतरं नास्ति स्थूलतरं ततः ॥ २८
सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखम् ।

C. 12. 8762
B. 12. 240[19]. 26
K. 12. 245. 20

---

reads 20 on marg. — a) D7 T1 G1. 3. 6 च (for हि). D2 om. भूतेषु. — c) D7 T1 G1. 3. 6 महात्मा तु (for °नात्मा). — d) G1 ततः (for ततम्).

21 With 21, cf. 6. 28. 29. For the repetition in K7, cf. v. l. 19. — a) Dn4 -भूते हि (for -भूतेषु). — Ś1 K1. 2. 4 om. (hapl.) 21c–22b.

22 Ś1 K1. 2. 4 om. 22ab (cf. v. l. 21). — a) D7 T G1. 3. 6 M1. 6. 7 मे ह्यात्मा (for वेदात्मा). ❀ Cs: वेदात्मा वेदपुरुषः । आत्मा जीवात्मा । परमात्मनीति विवेकः स्यादिति योग्यपदाध्याहारः । यावद्यावद्वेदाभ्यासो भवति तावत्तावदात्मविवेकबुद्धिर्भवतीति भावः । ❀ — c) K6 D4 एव (for एवं). — d) K6 यो (for सो).

23 With 23, cf. B. 12. 262. 32; 269. 22: B. 13. 113. 7. Quoted in Br. Sūtra. Bhāṣya under iv. 2. 14. — a) D3 -भूतात्मा; D4 lacuna. — b) Bom. ed. विभोर् (for सर्व-). D4 वा (for च). — c) Ś1 K1. 2 M1. 6. 7 (*sup. lin.* as in text) च; G1 वि- (for [अ]पि). T2 मुह्यंते. V1 देवा अपि विमुह्यंति. — d) Ś1 K1. 2 चापदस्य; K4 शापा°; M1. 5. 6 ह्यप° (for अप°). ❀ Cs: अपदस्य पदन्यासरहितस्य, पदन्यासलक्षणरहिते ब्रह्मणि वर्तमानस्य, मार्गागम्ये परमात्मनि पदैषिणः पदन्यासं कर्तुमिच्छन्तः ॥ Cv: अपदस्य, पद्यते ज्ञायते अनेनेति पदं प्राकृतदेहः तद्रहितस्य । ❀

24 With 24, cf. 12. 174. 19; B. 12. 323[2]. 19. — a) K6 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 8 श(Dn4 स)कुंतानाम्; K7 D4–6. 9 शकुनानाम् (for °नीनाम्). — b) K7 D4–6. 9 T G1. 3. 6 च (for वा). K6 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 8 मत्स्यानामिव चोदके. — c) K7 तथा (for यथा). V1 दृश्यंते (for दृश्येत). — d) D5 [अ]स्य (for सु-). K6 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 8 तथा ज्ञानविदां गतिः.

25 a) ❀ Cn: कालः उक्तरूपो जीवः । ❀ — c) K1. 2. 4 पश्यते (for पच्यते). — d) Dn4 ते (for तं). K6 B0. 6. 7. 9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 transp. न and वेदेह. Da4 कश्च नः.

26 D5 om. (hapl.) 26a–27b. — a) D7 T G1. 3. 6 M5 नात; M1. 6. 7 न चैव (for न तद्). — b) K6 B0. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 D8 D2. 3. 8 पुनः; B6 (marg.) पुरः (for तिरः). K7 D4. 9 तु नः (for पुनः). D6 नाधस्तान्नापि पार्श्वतः; D7 T G1. 3. 6 M5. 7 नाधश्चरति वा पु(M7 यत्पु)नः; M1. 6 नाधस्तान्न कुतश्चन. — After 26ab, M1. 6. 7 ins.:

681* इन्द्रियैरपि बुद्ध्या वा गृह्यते न कदाचन ।

— c) D4. 6. 9 परि- (for प्रति-). K2 -गृह्णेत; K7 Da3 D4. 6. 9 -गृह्णीत (K7 °ता); D7 T G1. 3. 6 M1. 5–7 -गृह्णाति (for -गृह्णीते). — d) K6 B6 Da3. a4 नैवं; D7 T1 G1. 3. 6 न तु (for नैव). K6 B0. 6–9 Da3 Dn1. n4 D8 D2. 3. 8 किंचित्; Da4 किं स्वित् (for कश्चित्). Da4 कुतश्च नः.

27 D5 om. 27ab (cf. v. l. 26). — a) D7 सर्वे तर्था. Da4 हीमे (for इमे). — c) K6. 7 V1 B0. 6. 8 (marg.). 9 Dn1. n4 D2. 3. 5. 8 यद्यजस्रं (for यः सहस्रं). — d) Dn1 बाणोऽद्. K2 Da3 T G1. 3. 6 गुणाच्युतः; Da4 गुणोच्युतः (for गुण°).

28 a) D5 [ए]ष (for [इ]याद्). — b) B7. 8 (marg. as in text) यद्यदि; D7 T1 G1. 3. 6 यदि च (for यद्यपि). Ds1 मनोजवाः. — c) K2. 6. 7 D4. 6. 7. 9 T G1. 3. 6 M1. 5–7 तस्मात्सूक्ष्मतरं नास्ति. — d) K2 सूक्ष्मात् (for नास्ति). D7 T1 G1. 3. 6 स्थूलतमं (for °तरं). K6 यथा; B8. 9 Da4 तथा; G1 तमः (for ततः).

C. 12 8762
B. 12 240[39]. 29
K. 12. 245. 29

सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ २९
तदेवाणोरणुतरं तन्महद्भ्यो महत्तरम् ।
तदन्तः सर्वभूतानां ध्रुवं तिष्ठन्न दृश्यते ॥ ३०
अक्षरं च क्षरं चैव द्वैधीभावोऽयमात्मनः ।
क्षरः सर्वेषु भूतेषु दिव्यं ह्यमृतमक्षरम् ॥ ३१
नवद्वारं पुरं गत्वा हंसो हि नियतो वशी ।
ईशः सर्वस्य भूतस्य स्थावरस्य चरस्य च ॥ ३२
हानिभङ्गविकल्पानां नवानां संश्रयेण च ।
शरीरागामजस्याहुर्हंसत्वं पारदर्शिनः ॥ ३३
हंसोक्तं चाक्षरं चैव कूटस्थं यत्तदक्षरम् ।
तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि एकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥

---

29 = (var.) 6. 35. 13. — ^{a}) Da4 Dn1 -पादं तं; D7 T G1. 3. 6 M1. 5–7 -पादं तत् (for -पादान्तं). ❀ Cs: सर्वत इति सार्वविभक्तिकस्तसिः सर्वेषां पाणयः पादाश्च यस्य। ❀ — ^{c}) D8 लोकं (for लोके).

30 ^{a}) K6 अण्वतरं; K7 (also as in text) Ds1 अनुतरं. — ^{b}) D7 T G1. 3. 6 महद्भ्यश्च महत्तरं. — ^{c}) Da4 तदांतः. — ^{d}) T2 ध्रुवस् (for ध्रुवं). Ś1 K1. 2. 4 सर्वं (for तिष्ठन्). G1 दृश्य च (for दृश्यते).

31 ^{a}) D5 चाक्षरं (for च क्षरं). D7 T G1. 3. 6 अक्षरश्च क्षरश्चैव. — ^{b}) Da4 द्वैधि- (for द्वैधी-). — ^{c}) Ś1 K1. 2 M5 क्षरं (for क्षरः). — ^{d}) D7 T G1. 3. 6 M5 दिवि (for दिव्यं). K6 V1 Bo. 6–9 Da3. a4 Dn1 Ds D3. 6. 8 त्वमृतम्; K7 Dn4 D2. 4. 9 तमृतम् (for ह्यमृ°). Ś1 K1. 2. 4 अव्ययं; K7 D4. 6. 9 अक्षयं (for °रम्). D5 दिव्यं त्वक्षरमव्ययं.

32 ^{a}) Ds1 om. (hapl.) रं पु. — V1 reads 32^{b}–34^{a} on marg. — ^{b}) K7 Ds D4–6. 9 T M5. 6 Cs वि-; D7 G1. 3. 6 M1. 7 [ऽ]पि (for हि). D4 नियता; M7 नयते (for नियतो). ❀ Cs: विनियतो बद्धः। ❀ — ^{c}) Da3 om. सर्वं. K7 D4–6. 9 य ईशः सर्वभूतस्य; V1 Bo. 8 (marg.) Dn4 D7 T1 G1. 3. 6 M7 ईश्वरः (B8 ईदृशः) सर्वभूतस्य.

33 V1 reads 33 on marg. — ^{a}) K7 D9 ही (D9 हा) नानांग-; Bo. 8 (marg. as in text) D4. 6 हानेनांग-; B7 हानिभंग-; T2 पृतेनांग- (for हानिभङ्ग-). D7 T1 G1. 3. 6 M1. 5–7 भावे (M1. 5–7 हाने) न ग (M5 ह) त-कालानां; Cs पातेनाजं विकल्पानां. — ^{b}) Da4 नराणां (for नवानां). K4. 6 B6–9 Dn1. n4 Ds D3. 5. 7. 8 T G1. 3. 6 M1. 5–7 संचयेन; V1 Bo संश्रयेन (for °येण). — ^{d}) Ś1 K1 M6 पर-; Dn4 पाद- (for पार-).

34 V1 reads 34^{abc} on marg. — ^{a}) K6 Da3 हंसोक्ते (for °क्तं). Bo. 7–9 Da4 Dn4 D3 M7 च क्षरं; Da3 स्वक्षरं; D7 T G1. 3. 6 M1. 5. 6 Cs यत्क्षरं (for चाक्षरं). — ^{b}) D9 कूटकं (for °स्थं). B8 (marg.) कूटस्थत्वात्तदक्षरं. — ^{c}) K4 प्राप्तो; B8 (marg.) ब्रह्म (for प्राप्य). — ^{d}) Ś1 K1. 2. 4 मृत- (for प्राण-). K6 -कर्मणी; B7 -जन्मनां; Da4 Dn4 Ds1 -जन्मनि (for °नी). D7 T G1. 3. 6 M1. 5–7 जह्यान्मरणजन्मनी (D7 T1 G1 °नि). — After 34, D7 T G1. 3. 6 M1. 5–7 read 12. 232. 2^{cdef} for the first time, repeating the same in the proper place.

Colophon: G2 missing; K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. — *Sub-parvan:* Ś1 K1. 2. 4. 6. 7 V1 Bo. 6. 8. 9 Da3. a4 Dn1. n4 Ds D2–9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name:* Ś1 K1. 2. 4 शुकप्रश्नः; K6. 7 V1 Bo. 8. 9 Da3. a4 Dn1. n4 Ds1 D2–6. 8. 9 M5 शुकानुप्रश्नः; M1. 6 ब्रह्माभिगमनाभ्युपायनं (M6 °पायं); M7 ब्रह्माधिगमाद्युपायकथनं. — *Adhy. no.* (figures, words or both): K6 D3 M1. 6. 7 64; K7 8; Dn1 D7 T1 G1. 3. 6 M5 66; Dn4 Ds2 65; D8 61; T2 80. — *Śloka no.:* Dn1 34; Dn4 D8 33.

२३२

व्यास उवाच ।

पृच्छतस्तव सत्पुत्र यथावदिह तत्त्वतः ।
सांख्यन्यायेन संयुक्तं यदेतत्कीर्तितं मया ॥ १
योगकृत्यं तु ते कृत्स्नं वर्तयिष्यामि तच्छृणु ।
एकत्वं बुद्धिमनसोरिन्द्रियाणां च सर्वशः ।
आत्मनो ध्यायिनस्तात ज्ञानमेतदनुत्तमम् ॥ २
तदेतदुपशान्तेन दान्तेनाध्यात्मशीलिना ।
आत्मारामेण बुद्धेन बोद्धव्यं शुचिकर्मणा ॥ ३
योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः ।
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ॥ ४
क्रोधं शमेन जयति कामं संकल्पवर्जनात् ।
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥ ५
धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ।
चक्षुः श्रोत्रे च मनसा मनो वाचं च कर्मणा ॥ ६
अप्रमादाद्भयं जह्याल्लोभं प्राज्ञोपसेवनात् ।
एवमेतान्योगदोषाञ्जयेन्नित्यमतन्द्रितः ॥ ७
अग्नींश्च ब्राह्मणांश्चार्चेद्देवताः प्रणमेत च ।
वर्जयेद्दुषितां वाचं हिंसायुक्तां मनोनुगाम् ॥ ८

C. 12. 8776
B. 12. 241[40]. 9
K. 12. 246. 9

232

☞ This adhy. is missing in G_2 (cf. v. l. 12. 222. 19). — With this adhy., cf. Brahmapurāṇa (Ānandāshram) 235. 36–68.

1 ^{a}) $K_{1.2.4}$ मत्पुत्र (for सत्पुत्र). — ^{b}) Ds_2 $D_{3.5.7}$ सत्त्वतः; T_2 तत्परं (for तत्त्वतः). — ^{c}) K_4 G_1 सांख्यं (for सांख्य-). K_6 $Bo._{6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.8}$ -ज्ञानेन (for -न्यायेन). $Ś_1$ $K_{1.2}$ M_5 युक्तं यत्; K_7 $D_{4.6.9}$ युक्तं च (for संयुक्तं). — ^{d}) $Ś_1$ $K_{1.2}$ V_1 B_9 D_5 M_5 तदेतद् (for यदे°).

2 ^{a}) Da_4 -कृतं (for -कृत्यं). K_6 च; D_4 नु (for तु). D_7 $G_{1.3.6}$ तत्; T_1 यत् (for ते). — ^{b}) $K_{1.2.4.6}$ D_5 वर्णयिष्यामि; M_5 कीर्त° (for वर्त°). — D_7 T $G_{1.3.6}$ $M_{1.5-7}$ read 2^{cdef} for the first time after 12. 231. 34. — ^{c}) K_6 एकस्त्वं (for °त्वं). K_1 -मानसोर् (for -म°). ❀ Cn: एकत्वं बुद्धिमात्रेणावस्थानम्, बुद्धिवृत्तिनिरोध इति यावत् । ❀ — ^{e}) K_2 ध्यायनस्; K_6 V_1 $Bo._{6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.5.8}$ व्यापिनस्; D_7 T_1 $G_{1.3}$ (all second time) व्यधि°; D_7 T_1 (both first time).$_2$ (both times) $G_{1.3}$ (both first time).$_6$ (both times) M_1 (second time).$_{5-7}$ (all both times) [s]व्ययि°; M_1 (first time) [s]प्ययिनस् (for ध्यायि°). — ^{f}) T_2 ज्ञानमेव तदुत्तमं.

3 ^{b}) Dn_4 -शालिना (for -शी°). T_2 दांतेनाध्यात्मनि स्थितं. ❀ Cs: अध्यात्मशीलिना देहात्मविवेकतत्परेण । ❀ — ^{c}) Ds D_7 T $G_{1.3.6}$ $M_{1.5-7}$ शुद्धेन (for बु°). ❀ Ca: बुद्धेन अविचलता तत्त्वज्ञानात् । ❀ — ^{d}) K_7 श्रुति-; D_7 T_1 $G_{1.3.6}$ शुद्ध- (for शुचि-).

4 ^{a}) K_2 समुच्छ्रित्य; K_7 $D_{4.9}$ °त्सृज्य; D_7 T $G_{1.3.6}$ M_7 समुच्छिंद्यात् (for °च्छिद्य). — 4^{b} is damaged in B_7. — ^{b}) D_7 T_1 G_1 पंचधा (for पञ्च यान्). — ^{c}) Bo Da_4 काम- (for कामं). — ^{d}) D_6 om. (hapl.) from पञ्चमम् up to पादं च (in 6^{b}).

5 D_6 om. 5 (cf. v. l. 4). — ^{a}) K_7 $D_{4.9}$ दमेन (for शमेन). — ^{c}) K_6 सत्य-; Da_4 G_3 सत्त्वं (for सत्त्व-). ❀ Cn: सत्त्वसंसेवनात् सत्त्वेन बुद्ध्या संसेवनं परिशीलनमर्थानां तेन । ❀ — After 5, D_7 T $G_{1.3.6}$ M_5 read 7.

6 D_6 om. up to पादं च (cf. v. l. 4). — ^{a}) V_1 रक्ष्येत्. — ^{b}) Da_4 -पादस्य; T_2 -पादौ च; $M_{1.6}$ -पादश्च (for -पादं च). — ^{c}) D_7 T_1 $G_{1.3.6}$ श्रोत्रं (for श्रोत्रे). — ^{d}) $M_{1.6}$ वाचश् (for वाचं). D_5 बुद्धिमान्; D_7 T $G_{1.3.6}$ $M_{1.5-7}$ विद्यया (for कर्मणा). $D_{4.6.8.9}$ मनोबुद्धिसमाधिना. ❀ Cn: कर्मणा यज्ञादिना । ❀

7 D_7 T $G_{1.3.6}$ M_5 read 7 after 5. — ^{a}) K_1 अप्रसादाद् (for अप्रमा°). — ^{b}) $Ś_1$ $K_{1.2.4.6}$ V_1 $Bo._{6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.5.8}$ दंभं; D_6 दमं (for लोभं). D_7 T_1 $G_{1.3.6}$ M_1 प्रज्ञोप- (for प्राज्ञोप-).

8 = (var.) 12. 227. 9. — ^{a}) $Ś_1$ $K_{1.2}$ Da_4 D_5 अग्निं च (for अग्नींश्च). $D_{5.7}$ T $G_{1.3.6}$ अर्चेद् (for चा°). — ^{b}) Da_4 $M_{1.6}$ प्रणमेन (for °मेत). $G_{3.6}$

C. 12. 8776 B. 12. 241[40]. 9 K. 12. 246. 9 ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं रसः ।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥ ९
ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ।
शौचमाहारसंशुद्धिरिन्द्रियाणां च निग्रहः ॥ १०
एतैर्विवर्धते तेजः पाप्मानं चापकर्षति ।
सिध्यन्ति चास्य सर्वार्था विज्ञानं च प्रवर्तते ॥ ११
समः सर्वेषु भूतेषु लब्धालब्धेन वर्तयन् ।
धुतपाप्मा तु तेजस्वी लघ्वाहारो जितेन्द्रियः ।
कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदम् ॥ १२
मनसश्चेन्द्रियाणां च कृत्वैकाग्र्यं समाहितः ।
प्राग्रात्रापररात्रेषु धारयेन्मन आत्मना ॥ १३
जन्तोः पञ्चेन्द्रियस्यास्य यदेकं छिद्रमिन्द्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः पादादिवोदकम् ॥ १४
मनस्तु पूर्वमादद्यात्कुमीनानिव मत्स्यहा ।

वा (for च). —^{c}) K2 रुपितां; K6 V1 Bo. 6. 8 (marg. as in text). 9 Da3. a4 Ds1 D5 Cp (gloss: दाहिकां, परोपतापिनीं) उषतीं; K7 Ds2 D3. 4. 7. 9 T G1. 3. 6 M1. 5–7 रुशतीं; B7 Dn4 उशतां; Dn1 D2. 8 Ca (Cap कृषतीं) Cn (gloss: कामप्रधानां, विटगोष्ठीरित्यर्थः) उशतीं; D6 असतीं (for रुषितां). —^{d}) Da4 D5 हिंसायुक्तं; Ds1 °युक्तो; D4. 9 °युक्ता (for °युक्तां). K6 मनोनुगः; K7 D4. 6. 9 मनस्तुदां; Bo. 8 Dn1. n4 Ds2 D2. 3. 8 Cn (gloss: मनोभङ्गकारिणीं) मनोनुदां; D5 मनस्तथा; G1 मनोयुग्मं; M1. 6. 7 अनर्थिकां (for मनोनुगाम्).

9 ^{a}) D7 T1 G1. 3. 6 M1. 6. 7 शुक्लं (for शुक्रं). —^{b}) D7 T G1. 3. 6 यस्मिन् (for यस्य). D5 T2 (*sup. lin.*) M1. 7 रसं; D7 T2 (orig.) G3. 6 ततं; G1 ततः (for रसः). —^{c}) V1 B6. 8 (marg.) Da3 Dn1. n4 Ds D2. 3. 5–8 एतस्य (for एकस्य). K6. 7 D4. 9 नूनं; T1 सर्व-; M1. 5. 6 भूत- (for भूतं). Dn1 D2 भव्यस्य (for भूतस्य). ❀ Ca: भूतं सत्यं न तु विवर्तवादिनामिवासत्यम् । भूतस्य सिद्धस्याकल्पितस्य । ❀ —^{d}) K4. 6 B6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 दृष्टं (for द्वयं).

10 ^{a}) Ś1 K1. 2 दानम् (for ध्यानम्). Ś1 K1 ध्यानं; D5 lacuna (for दानं). —^{b}) Da4 सद्भक्तिर् (for सत्यं ह्रीर्). —^{c}) K6 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 आचार- (for आहार-). Ś1 K1. 2. 4 D8 (marg. as in text). 6 -संसिद्धिर् (for -संशुद्धिर्). —^{d}) K6 संग्रहः; Dn1 वि° (for नि°).

11 11^{ab} = (var.) 12. 227. 7^{cd}. —^{a}) K7 D4. 9 विवर्धयंस् (for °र्धते). D4 om. from तेजः up to वर्तयन् (in 12^{b}). —^{b}) D7 पापानां (for पाप्मानं). D5 चाति- (for चाप-). — K7 M1. 6. 7 om. 11^{cd}. —^{c}) Bo सर्वात्मा (for °र्था). —^{d}) G1 प्रज्ञानं (for वि°). B8 (marg.) प्रवर्धते; D7 T G1. 3. 6 प्रकाशते (for प्रवर्तते). ❀ Ca: विज्ञानं साक्षात्कारलक्षणम् । ❀

12 D4 om. 12^{ab} (cf. v. l. 11). —^{a}) D5 स्थितः (for समः). —^{b}) K6. 7 D6. 9 यथालब्धेन (for लब्धाल°). K2 M1. 7 वर्धय(M1 °ये)त्; K6 Bo Dn4 Ds D7 T G1. 3. 6 M5. 6 वर्तयेत् (for °यन्). —^{c}) V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 T G1. 3. 6 M1. 5–7 धूतपाप्मा; D7 घृत° (for धुत°). Ds1 lacuna; Ds2 T2 च (for तु). —^{d}) G1 M1 लब्धाहारो (for लघ्वा°). D4 यतेंद्रियः (for जितेन्द्रियः). — D7 G1 om. 12^{e}–13^{d}; G3 om. (? hapl.) 12^{e}–14^{b}. Ds1 reads 12^{e}–13^{b} on marg. —^{e}) K1. 2 Da4 D4 कामक्रोधो (K1 °धा) (for °क्रोधौ). —^{f}) ❀ Ca: निनीषेत्, निदिध्यासनेनेच्छेत् ॥ Cn: निनीषेद् वशीकर्तुमिच्छेत् । Cs: निनीषेद् आत्मानमिति शेषः । ❀

13 13^{ab} = (var.) B. 12. 251[50]. 4^{ab}. D7 G1. 3 om. 13 (cf. v. l. 12). Ds1 reads 13^{ab} on marg. —^{b}) K2 Da4 D5 T2 कृत्वैकाग्रं (for °ग्र्यं). K7 समाहितं. —^{c}) K6. 7 V1 Bo. 6–9 Dn1. n4 Ds D2–6. 8. 9 Cp पूर्वरात्रापरार्धे (K7 D4. 9 °त्रे) च; Da3. a4 प्राग्रात्रेपररात्रे च; T पूर्वरात्रेपरात्रे च; G6 M1. 5. 7 पूर्वरात्रेपररात्रे च; M6 पूर्वरात्रेपराररात्रे; Cpp प्राग्रात्रापररात्रे च. Ca cites प्राग्रात्रैर्. —^{d}) Ś1 K1. 2. 4 Bo धारयन् (for °येन्). Ś1 K1. 2. 4 आत्मवान्; K6. 7 V1 Bo. 8 Dn1. n4 Ds D2–6. 8. 9 G6 आत्मनि (G6 °नः) (for °ना).

14 = (var.) 5. 33. 65; (var.) Manu. 2. 99. G3 om. 14^{ab} (cf. v. l. 12). T1 reads 14^{ab} twice. —^{a}) D7 T1 (second time) G1. 6 ततः (for जन्तोः). —^{b}) B6 यद्येकं (for यदेकं). K4 इंद्रियः. ❀ Ca: छिद्रं विषयासङ्गि । ❀ —^{c}) K4 [s]सि (for ऽस्य). K6. 7 D6 श्रवति (K6 °ते); V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 M1. 6. 7 स्रवते (for °ति). —^{d}) D5 गिरेः; D7 T1 G3. 6 द्रुतेः; G1 सृतेः (for दृतेः). K2. 4 पात्राद् (for पादाद्). K6 इवोधकं (sic). ❀ Cn: दृतेः चर्मकोशस्य । ❀

15 ^{a}) Ś1 K1. 2. 4 विषयान् (for मनस्तु). K7 D4–6. 9 तत् (for तु). D5 सर्वम् (for पूर्वम्). —^{b})

ततः श्रोत्रं ततश्चक्षुर्जिह्वां घ्राणं च योगवित् ॥ १५
तत एतानि संयम्य मनसि स्थापयेद्यतिः ।
तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् ॥ १६
पञ्च ज्ञानेन संधाय मनसि स्थापयेद्यतिः ।
यदैतान्यवतिष्ठन्ते मनःषष्ठानि चात्मनि ।
प्रसीदन्ति च संस्थाय तदा ब्रह्म प्रकाशते ॥ १७
विधूम इव दीप्तार्चिरादित्य इव दीप्तिमान् ।
वैद्युतोऽग्निरिवाकाशे पश्यत्यात्मानमात्मना ।
सर्वं च तत्र सर्वत्र व्यापकत्वाच्च दृश्यते ॥ १८
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ।
धृतिमन्तो महाप्राज्ञाः सर्वभूतहिते रताः ॥ १९
एवं परिमितं कालमाचरन्संशितव्रतः ।
आसीनो हि रहस्येको गच्छेदक्षरसात्म्यताम् ॥ २०
प्रमोहो भ्रम आवर्तो घ्राणश्रवणदर्शने ।

C. 12. 8790
B. 12. 241[40].23
K. 12.246.23

K6 के मीनम्; V1 Dn1. n4 Ds D2. 3. 5. 8 T2 M1. 5–7 Cn. s कुमीनम्; Bo. 6. 7. 8 (marg.). 9 कूर्माणाम्; D7 T1 G1. 3. 6 कुळीरम्; D9 के मीनान् (for कुमीनान्). ❀ Ca: कुमीनान् क्षुद्रमत्स्यान् ॥ Cn: कुमीनम् जालदंशक्षमम् ॥ Cp (reading कूमीलान्): कूमीन् लान्ति गृह्णन्तीति कूमीला मत्स्याः । तान्यथा उपायेनैकाचित्ततया बध्नाति । ❀ — ^{c}) T2 अत्र; M7 तत्र (for ततः). D7 T G1. 3. 6 च चक्षुश्च; M1. 5–7 त्वचं चक्षुर् (for ततश्चक्षुर्). — ^{d}) Da4 M7 जिह्वा- (for जिह्वां). K1 प्राणं (for घ्राणं).

16 ^{b}) K1 नमसि (for मनसि). K6 ध्यापयेद् (for स्थाप°). B7. 9 Da3. a4 यदि; D7 T1 G1. 3. 6 व्रती (for यतिः). ❀ Ca: मनसि स्थापयेत् विषयविमुखानि कुर्यादित्यर्थः । ❀ — After 16^{ab}, K7 reads 17^{cd} for the first time, repeating it in its proper place. K1 G6 om. (hapl.) 16^{c}–17^{b}. — ^{c}) B3 (marg. as in text) [आ]योज्य (for [अ]पोह्य). T2 संकल्पं. — ^{d}) K6 [ऽ]ध्यात्मनि; Da3. a4 आत्मनि; D5 [ऽ]प्यात्मनि (for ह्यात्मनि). K7 धारये; M6 (*sup. lin.* as in text) सारयेत् (for धार°).

17 K1 G6 M5 om. 17^{ab} (for K1 G6, cf. v. l. 16). — ^{a}) D7 T1 G1. 3 तं च; T2 तत्त्व- (for पञ्च). M1. 6. 7 स्थानानि (for ज्ञानेन). K4. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 पंचेंद्रियाणि संधाय (B6 m. 8 [marg. as in text] °यैं). ❀ Ca (reading पञ्चज्ञानेन): पञ्चविषयनिष्ठेन ज्ञानेन । ❀ — ^{b}) Ś1 K2 D7 T G1. 3 मनःसं- (for मनसि). B9 Da3. a4 Cpp यदि; D7 T1 G1. 3 व्रती (for यतिः). — K7 reads 17^{cd} for the first time after 16^{ab}. — ^{c}) K7 (both times) D4. 7. 9 T G1. 3. 6 M7 यदेतानि; V1 M1 तदै°; Da3. a4 यदि तानि (for यदैतानि). D4. 5 एव (for अव-). K1 Dn1. n4 Ds D2. 3. 5. 8 M1. 5–7 -तिष्ठंति (for -तिष्ठन्ते). — ^{d}) D4 वा (for च). K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 मनःषष्ठान्यथात्मनि. — ^{e}) D5 प्रसीदति. K6 B8 Ds2 D3 संस्थाप्य; B6 (marg. as in text). 7. 8 (marg.). 9 °यां (for °य). ❀ Ca: संस्थाय सम्यग्रूपेणात्मप्रवणतया स्थित्वा ॥ Cn: संस्थाय नाशं प्राप्य । प्रसीदन्ति संकल्पजं कालुष्यं त्यजन्ति । ❀ — ^{f}) T1 G1. 3. 6 तथा (for तदा).

18 ^{a}) B9 दीप्तार्चीर्; Da3. a4 D7 T G1. 3. 6 सप्तार्चिर्. — ^{b}) K4 दीप्तमान्; D5. 7 T1 G1. 3. 6 मूर्ति° (for दीप्ति°). — ^{c}) Ś1 K1. 2 V1 Bo वैद्युताग्निर् (for °तोऽग्निर्). — ^{d}) D7 G1. 3. 6 पश्यंति (for पश्यति). K7 V1 D4–7. 9 T G1. 3. 6 M1. 6. 7 आत्मनि (for °ना). K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3 8 दृश्यतेत्मा तथात्मनि; M5 दृश्येतात्मा तदात्मनि. — ^{e}) Dn1 D2. 3. 8 सर्वंस् (for सर्वं). K6. 7 V1 Bo. 6–9 Da3. a4 Dn1 Ds D2–4. 6–9 T G1. 3. 6 M1. 5–7 तत्र स; D5 तत्र च (by transp.). Dn4 सब्रह्मत्रसमर्वत्र (sic). — ^{f}) T2 व्यापकत्वं (for व्यापकत्वाच्). D5 M1. 6. 7 न (for च).

19 19^{ab} = B. 12. 251[50]. 7^{cd}. — ^{a}) D5 ते (for तं). G1 पश्यंती. — ^{b}) Dn4 Ds ब्राह्मणाय (for °णा ये). — ^{c}) K2 महायज्ञाः; K6 B7. 8 Dn1 D3. 7 °प्रज्ञाः; G3 °प्राज्ञः (for °प्राज्ञाः). — ^{d}) M7 सर्वभूते (for °भूत-).

20 ^{b}) Da4 यश्चरन् (for आचरन्). B6 संसित-; B7 Dn4 Ds D3–5. 9 शंसित-; M1. 6 संशितः (for °त-). M1. 6 सदा (for -व्रतः). — ^{c}) Ca रसस्य (for रहसि). — ^{d}) Dn4 रक्षेद्; Ca इच्छेद् (for गच्छेद्). K4. 6 V1 Bo. 6. 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 M1 Cn.p (Cpp as in text) -साम्यतां; B6 (marg.). 8 D7 T G1. 3. 6 M5 -सात्मतां (for -सात्म्यताम्). ❀ Cn (reading साम्यतां): समतां लक्षणभेदाभावं, स्वार्थे ष्यञ् । ❀

21 ^{a}) B7. 9 आमोहो; Da4 D4 G3. 6 प्रमोदो; T1 G1 प्रमादो (for प्रमोहो). K2 भ्रुम (sic); Da4 ब्रह्म; D6 भ्रंश (for भ्रम). D6 आवर्त- (for °र्तो). ❀ Ca: आवर्तो वातविकारः । उदरमलादीनामावर्तनं शरीर-

C. 12. 8790
B. 12. 241[40].23
K. 12. 246. 23

अद्भुतानि रसस्पर्शे शीतोष्णे मारुताकृतिः ॥ २१
प्रतिभामुपसर्गांश्चाप्युपसंगृह्य योगतः ।
तांस्तत्त्वविदनादृत्य स्वात्मनैव निवर्तयेत् ॥ २२
कुर्यात्परिचयं योगे त्रैकाल्यं नियतो मुनिः ।
गिरिशृङ्गे तथा चैत्ये वृक्षाग्रेषु च योजयेत् ॥ २३
संनियम्येन्द्रियग्रामं गोष्ठे भाण्डमना इव ।
एकाग्रश्चिन्तयेन्नित्यं योगान्नोद्वेजयेन्मनः ॥ २४
येनोपायेन शक्येत संनियन्तुं चलं मनः ।
तं तं युक्तो निषेवेत न चैव विचलेत्ततः ॥ २५
शून्या गिरिगुहाश्चैव देवतायतनानि च ।
शून्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत् ॥ २६
नाभिष्वजेत्परं वाचा कर्मणा मनसापि वा ।
उपेक्षको यताहारो लब्धालब्धे समो भवेत् ॥ २७
यश्चैनमभिनन्देत यश्चैनमपवादयेत् ।
समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभम् ॥ २८
न प्रहृष्येत लाभेषु नालाभेषु च चिन्तयेत् ।

स्यैव भ्रमणमिव वा ॥ Cp : आवर्तो विषयान्तररसास्वादः । ❀ — ^{b}) Ś1 K1. 2. 4 V1 Bo Ds1 M1 घ्राणं ; K7 प्राण- ; Da4 घ्राणः (for घ्राण-). D5 -दर्शनैः. — ^{c}) Ś1 K1. 2 V1 Bo. 8 रसस्पर्शौ ; D7 T1 G1 रसैः स्पर्शैः ; T2 M5 रसे स्पर्शे (for रसस्पर्शे). — ^{d}) Da3. a4 शीतोष्ण- ; D7 T1 G1 °ष्णो (D7 °ष्णौ) (for °ष्णे). K2 मरुताकृतिः.

22 ^{a}) Ś1 K1. 7 D4. 6. 9 प्र(K1 D4. 6. 9 प्रा)तिभान् ; K2. 4 प्रतितान् (for °भाम्). Ś1 K1. 2. 4 उपसंसर्गाद् (for °सर्गांश्च). D7 T1 G1. 3. 6 प्रतिहारापस(G1 °व)र्गांश्च. ❀ Ca : प्रतिभा कवित्वोत्कर्षः ॥ Cn : सकलशास्त्रार्थभानम् । ❀ — ^{b}) Ś1 K1. 2. 4 उप- (for [अ]प्युप-). D7 T G1. 3. 6 M1. 5–7 प्रतिसंहृत्य योगतः. — ^{c}) K6 Dn4 तास् (for तांस्). K2 अनामृत्य (sic) ; Ds1 D4. 7. 9 T1 G1. 3. 6 °वृत्य (for °दृत्य). — ^{d}) K4 Da3. a4 Ds D2. 3. 8 आत्मन्येव ; K6 आत्मने च ; V1 Bo. 6–9 D4 स्वात्मनेव ; D7 T G1. 3. 6 M5 मनसैव ; M1. 6. 7 सोऽत्मनैव (for स्वा°). D4 [अ]भि- (for नि-). D5 -वर्धयेत् (for -वर्त°).

23 ^{a}) D7 आर्यात् (for कु°). K1. 2 परिचरं ; Da4 °चयो (for °चयं). Ś1 K1. 2 योगी (for योगे). — ^{b}) K4. 6. 7 Bo. 6–9 Dn1. n4 Ds D2–4. 8. 9 M5. 6 Cn त्रैकाल्ये ; Da3. a4 °ल्य- ; D5 °लो ; D6 °ले ; M1 °ल्यो (for °ल्यं). ❀ Cn : त्रैकाल्ये, प्रातः पूर्वरात्रे अपररात्रे च ॥ Cp : त्रैकाल्ये, त्रिकालनिर्वाह्ये । ❀ — ^{d}) M1 वृक्षाग्र्येषु.

24 ^{b}) K6 कोष्ठं ; K7 B6 (marg. as in text). 7. 8 (marg.). 9 Dn1. n4 Ds D2. 3. 8 Cn (gloss : हृदयपुण्डरीके) Cp (gloss : गृहाभ्यन्तरे ; Cpp as in text) Cs कोष्ठे (for गोष्ठे). D7 T G1. 3. 6 M5 भांडं मनागू (for भाण्डमना). K2 गोष्ठे गोपोर्जुनीमिव ; M1. 6. 7 कोष्ठे भांडं (M7 कांडे) यथापि च. ❀ Ca : गोष्ठे गोसमूहस्य मध्ये यथा दुग्धादिपूर्णभाण्डे अनेकेभ्यो गोभ्य एकमना रक्षितुं चिन्तयत्येवमनेकोपसर्गपराहतमात्मतत्त्वमेकाग्रश्चिन्तयेत् । ❀ — ^{c}) K2. 4. 6 Bo. 8 Da4 Dn1. n4 Ds D2. 3. 8 T1 G1. 6 M1. 6 एकाग्रं (for °ग्रश्). K6 विनयेन् ; G1 च जयेन् (for चिन्तयेन्). — ^{d}) K2 उद्वेजयेन् ; V1 B8 D4. 9 नोद्वेच° (for नोद्वेज°).

25 Ś1 K1. 2. 4 om. (hapl.) 25^{ab} ; V1 reads the same on marg. — ^{b}) K6 संनियंतं. D6 चलेन् (for चलं). B8 नियंतुं चंचलं मनः. — ^{c}) K4. 6 V1 Bo. 6. 7. 9 Da3. a4 Dn1 Ds D2. 3. 8 तं च ; B8 तत्त्व- ; Dn4 तव ; D7 T G1. 3. 6 M1. 5–7 तत्तद् (for तं तं). K4 B7 Dn1 Ds D2. 3. 8 मुक्तो (for युक्तो). — ^{d}) K6 निश्चलेत् ; T2 विचरेत् ; M7 विमलेत् (for विच°).

26 ^{a}) M1. 6 शून्यागार- (for शून्या गिरि-). D8 -गुहा (for -गुहाश्). — ^{b}) Dn1 दैवतायतनानि च. — D5 om. (hapl.) 26^{cd}. — ^{c}) Da4 चैकाग्रे ; Ds1 D4 वैकाग्रो. M1. 6 क्षेत्रारण्यानि चैकाग्रो. — ^{d}) G3 निवासाग्रम् (for °सार्थम्). K7 D4. 9 उपाक्रमेत् (for उप°).

27 ^{a}) K6 नाभियजेत् ; Dn1 D8 Cp (gloss : आत्मीयत्वेन न गृह्णीयात्) °स्वजेत् ; Dn4 °सज्येत् ; D4. 9 °ष्यजेत् ; M5 °षज्येत् (for °ष्वजेत्). Ś1 K1. 4 परां (K4 °रं) वाचं (for परं वाचा). ❀ Ca : नाभिष्वजेत् न पीडयेत् । ❀ — ^{b}) K7 D4–6. 9 T2 M1. 5–7 तथा ; V1 गिरा ; Ds1 D8 [अ]पि च (for [अ]पि वा). D7 T1 G1. 3. 6 मनसा कर्मणा तथा. — ^{c}) K7 D4. 6. 9 जिताहारो (for यता°). — ^{d}) K1 लुब्धालुब्धे ; D7 T G1. 3. 6 M1. 5–7 लब्धालब्ध- (for °लब्धे).

28 ^{a}) Ś1 K1. 4 न (for यश्). Ś1 K1. 2 D7 T1 G1. 3. 6 अभिनिंदेत (for °नन्देत). — ^{b}) B7 अति- ; Da4 अपि ; D7 T1 G1. 3. 6 अभि- ; Ca अव- (for अप-). K7 D9 -वाहयेत् (for -वादयेत्). ❀ Cn : अपवादयेत्

समः सर्वेषु भूतेषु सधर्मा मातरिश्वनः ॥ २९
एवं सर्वात्मनः साधोः सर्वत्र समदर्शिनः ।
षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्तते ॥ ३०
वेदनार्ताः प्रजा दृष्ट्वा समलोष्टाश्मकाञ्चनः ।
एतस्मिन्निरतो मार्गे विरमेन्न विमोहितः ॥ ३१
अपि वर्णावकृष्टस्तु नारी वा धर्मकाङ्क्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥ ३२
अजं पुराणमजरं सनातनं
यदिन्द्रियैरुपलभते नरोऽचलः ।
अणोरणीयो महतो महत्तरं
तदात्मना पश्यति युक्त आत्मवान् ॥ ३३
इदं महर्षेर्वचनं महात्मनो
यथावदुक्तं मनसानुदृश्य च ।
अवेक्ष्य चेयात्परमेष्ठिसात्म्यतां
प्रयान्ति यां भूतगतिं मनीषिणः ॥ ३४

C. 12. 8803
B. 12. 241[40] 36
K. 12. 246. 36

इति श्रीमहाभारते शान्तिपर्वणि द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥

निन्देत्, स्वार्थे णिच् । ❀ — c) B3 (marg.) मनस्तयोश्र (for सम°). Dn4 चाशु; D5 वापि (for चापि).

29 a) M1.6.7 प्रहृष्येत्तु (for °ष्येत). — b) K4 lacuna for नालाभेषु. K7 D4.6.9 M1.5–7 वि-; D7 T1 G1.3.6 [अ]थ; T2 [अ]व- (for च). Ś1 K1.2.4 V1 B8 (marg. as in text) D6 संज्वरेत्; B6 (marg.) चिरं तपेत् (for चिन्तयेत्). — d) K2 मातरिश्वना; D6 °रिष्वनः. ❀ Ca: मातरिश्वनो वायोः सधर्मा सदृशः । सर्वं स्पृशन्नपि शुचिः गमनशीलो वा । ❀

30 a) Ś1 K1.2 D5 सर्वात्मना; K6 B0.9 सुस्थात्मनः; V1 B6–8 Da3.a4 Dn1.n4 Ds D2.3.8 स्वस्था°; M7 धर्मा° (for सर्वा°). B9 Da4 Dn4 साधो. — b) K2 -दर्शितः (for °नः). — c) Da4 Dn4 D6 षण्मासा (for °सान्). — d) Ś1 K2 V1 -ब्रह्माभि-; K1 -ब्रह्मादि- (for °ति-).

31 a) K1 वेदनांताः; D6 °नार्तः; D7 T1 G1.3.6 अनंताश्च (for वेदनार्ताः). V1 परान् (for प्रजा). Ds1 दृष्टाः; D6 सृष्ट्वा (for दृष्ट्वा). — c) Ś1 K1.2.6 V1 B6.7.9 Da3 M7 एकस्मिन् (for एत°). V1 B0.7–9 Da3 Dn1.n4 Ds D2.3.8 विरतो; Da4 विस्तरे; D5 अंतरे; G1 अंतरतो (hypermetric) (for निरतो). Ds1 D8 मार्गो (for मार्गे). — d) B0 Dn1.n4 Ds D2.3.8 च (for the second वि-). K7 D4.5.9 विहरेद (D5 °त)-विमोहितः; D8 विहारादवमो°.

32 a) Ś1 K1.2 D8 (marg. as in text) धर्माप-; K6 V1 D7.9 T G1.3.6 M7 वर्णाप- (for वर्णाव-). Ś1 -कृष्टस्य; Ca -कृष्टा तु (for -कृष्टस्तु). ❀ Ca: वर्णावकृष्टाः शूद्राः संकीर्णजातयो वा । ❀ — b) D6 नाडी (sic) (for नारी). — d) Da2 गच्छेते; Da4 °त्य (for तां). D4 (also as in text) पदं (for गतिम्). D7 T G1.3.6 M1.5–7 गच्छेतां परमं पदं.

33 a) Dn4 अंतं (for अजं). K7 B8 (marg. as in text) D4.5.7.9 T1 G1.3.6 परमं (for अजरं). — b) K6 D6 यदींद्रियैर्; D7 T G1.3.6 यतेंद्रि° (for यदिन्द्रि°). K1 B8 Dn1.n4 Ds D2.3.5.8 उपलभेत; K6 V1 °लभ्यते; B6.7.9 Da3.a4 लभ्यति वा; D7 T G1.3.6 M1.5–7 उपलभ्येत (for °लभते). K6 V1 B0 च निश्चलैः; B8 Dn1.n4 Ds D2.3.8 T2 G3.6 M1.5–7 निश्चलैः; Da4 [आ]त्मनोष्कलः; D5 नरोवलं; D7 T1 G1 निश्चये (for नरोऽचलः). K7 D4.6.9 यदिंद्रियैरनुपलभ्यमीश्वरैः. — c) Ś1 K1.2.4 M1.6 अणोरणीयान् (for °णीयो). K2 मरुतो (for महतो). Ś1 K1.2.4 महत्तरस्. — d) K6 B7.9 Da3 D5.6 Cp (Cpp as in text) तमात्मना; M7 तमात्मानं (for तदात्मना). K6 B0 Da3.a4 Dn1 Ds D2.3.8 सुक्तम्; B8 D7 T1 G1.3.6 युक्तस् (for युक्त).

34 a) Ś1 K1.2.4 Da3.a4 इमं (for इदं). Da3.a4 महर्षिर्. — b) M1.6 यथा यदुक्तं (for यथावदुक्तं). Ś1 K1.2.4.7 विसृश्य (K1.2 °ष्य); D4.6.9 [अ]नुसृश्य; G3.6 M7 [अ]नुपश्य (for °दृश्य). B0.3 (marg. as in text) ते (for च). Dn4 यथावदुक्तमनुदृश्यते च. ❀ Cn: अनुदृश्य गुरुवचनमनु शब्दतोऽर्थतश्च ज्ञात्वा । ❀ — c) K4.6 V1 B0.6.7.9 Da3.a4 Dn1.n4 Ds D2.3.5.8 चेमां; B8 चैनां; B8 (marg.) ते मां; D7 T1 G1.3.6 चैतत् (for चेयात). K2.4 B0.6.7.9 Da3.a4 Dn1.n4 Ds D2.3.7.8 T1 G1 M1.6.7 -साम्यतां; K6 -सात्वतां; V1 B8 D6 T2 G3.6 -सात्मतां (for -सात्म्यतां). — d) K4.6 B0.6–9 Da3.a4 Dn1.n4 Ds D2.3.8 चाभूत-; D6 तां भूत-; D4.6 यां तत्त्व- (for यां भूत-). D2 -गतिर्;

२३३

C. 12. 8833
B. 12. 242[1]. 1
K. 12. 247. 1

शुक उवाच ।
यदिदं वेदवचनं कुरु कर्म त्यजेति च ।
कां दिशं विद्यया यान्ति कां च गच्छन्ति कर्मणा ॥ १
एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे ।
एतत्त्वन्योन्यवैरूप्ये वर्तते प्रतिकूलतः ॥ २
भीष्म उवाच ।
इत्युक्तः प्रत्युवाचेदं पराशरसुतः सुतम् ।
कर्मविद्यामयावेतौ व्याख्यास्यामि क्षराक्षरौ ॥ ३
यां दिशं विद्यया यान्ति यां च गच्छन्ति कर्मणा ।
शृणुष्वैकमनाः पुत्र गह्वरं ह्येतदन्तरम् ॥ ४
अस्ति धर्म इति प्रोक्तं नास्तीत्यत्रैव यो वदेत् ।
तस्य पक्षस्य सदृशमिदं मम भवेदथ ॥ ५
द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
प्रवृत्तिलक्षणो धर्मो निवृत्तौ च सुभाषितः ॥ ६
कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ ७

D7 -मतिर्; T1 -मतिं; G1 पतिं; M7 -मतीर् (for -गतिं). Da3 मनीषिणाः. ❀ Ca (reading चाभूतगतिं): अभूतगतिं तत्त्वगातिम् । ❀

Colophon: G2 missing; K3. 5 B1–4 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. —*Sub-parvan:* Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. —*Adhy. name:* Ś1 K1. 2. 4 शुकप्रश्नः; K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 M5 शुकानुप्रश्नः; M1. 6 शुकानुप्रश्ने ब्रह्मप्रतिपादनं; M7 ब्रह्मप्रतिपादनं. —*Adhy. no.* (figures, words or both): K6 D3 M1. 6. 7 65; Dn1 Ds D7 T1 G1. 3. 6 M5 67; T2 81. —*Śloka no.:* Dn1. n4 35; Ds 36.

233

☞ This adhy. is missing in G2 (cf. v. l. 12. 222. 19). —With this adhy., cf. Brahmapurāṇa (Ānandāshram) 236. 1–20.

1 ^{a}) T1 इतीदं; G1 य इदं (for यदिदं). Da4 देव- (for वेद-). —After 1^{ab}, D7 T G1. 3. 6 M5 read 2^{cd}. —^{c}) D4. 9 गतिं (for दिशं). D7 T G1. 3. 6 याति (for यान्ति). —^{d}) Da4 कां वा; D7 T1 G1. 3. 6 यां च (for कां च). T2 गच्छति.

2 D7 reads 2–4 on marg. —^{a}) Da3 वेदितुम् (for वै श्रोतुम्). —^{b}) K7 D4. 6. 9 भगवा(D6 °व)न् (for तद्भवान्). —D7 T G1. 3. 6 M5 read 2^{cd} after 1^{ab}. —^{c}) K4. 6 Bo. 7. 8 Dn1. n4 Ds D3. 5. 7. 8 चान्योन्य-; K7 V1 D4. 6. 9 T2 G1. 3. 6 M1 अन्योन्य-; B6 T2 M5–7 ह्यन्योन्य-; B9 वान्योन्य- (for त्वन्योन्य-). D5. 7 T G1. 3. 6 -वैरूप्यं (for °प्ये). —^{d}) K4 Bo. 6–8 Dn1. n4 Ds2 D2. 3. 8 वर्तेते (for वर्तते).

3 B9 om. 3–5. D7 reads 3 on marg. Ś1 K1. 2 T1 G1 om. the ref. —^{a}) G1 इत्युक्तं. —^{c}) D7 चैतौ (for एतौ).

4 B9 om. 4 (cf. v. l. 3). D7 reads 4 on marg. —^{a}) T G1. 3. 6 याति (for यान्ति). —^{b}) K7 Da4 D4. 6. 9 गच्छंति च (by transp.); T2 G1 च गच्छति. —Before 4^{cd}, D7 T1 G1. 3. 6 ins. व्यासः. —^{c}) D7 T G1. 3. 6 शृणु च (for शृणुष्व). K6 विप्र; Bo. 8 (marg.) Dn1. n4 Ds D2. 3. 6. 8 वत्स; B8 (orig.) भूत्वा (for पुत्र). K7 D4. 5. 9 शृणु त्वमेकाग्रमना (D4 °ता). —^{d}) Ś1 K1. 2. 4 गुह्यमेतदनंतरं; K7 T1 G1. 3. 6 गह्वरं ते तदंतरं; D7 गह्वरं तदनंतरं.

5 B9 om. 5 (cf. v. l. 3). —^{a}) B8 (marg.) स्वस्ति (for अस्ति). B8 कर्म (for धर्म). K6 B6–8 Da3. a4 D5. 6 ह्युक्तं; K7 D4. 7. 9 T G1. 3. 6 M1. 5–7 ह्युक्त्वा (for प्रोक्तं). —^{b}) V1 B8 (marg. as in text) तत्रैव; D7 T2 G3. 6 [इ]त्यत्र च (for °त्रैव). Da4 नास्तितश्चैव यो वदेत्; T1 नास्तीत्यत्र वचो वदेत्. —^{d}) D6 इमं (for इदं). K4 T1 यथा; T2 अपि (for अथ).

6 ^{a}) K7 D4. 6. 9 तात; D5 अत्र; M5 अपि (for अथ). —^{d}) B8 (marg.) सु-; B9 स्व- (for च). K6. 7 B6–9 D4. 5. 9 Cp (gloss: विस्पष्टतया भाषितः) विभाषितः; D6 सुभावतः; D7 T G1. 3. 6 M1. 5–7 व्यवस्थितः (for सुभाषितः). ❀ Ca (reading स्वभावितः): स्वभावितः, स्वयं मयोक्त इत्येके पाठमर्थं च मन्वते, तच्चिन्त्यम् । ❀

7 D7 G1. 3. 6 om. 7^{a}–8^{b}. —^{a}) Da4 बाध्यते (for ब°). —^{b}) K6 V1 B7. 9 Da3 D4. 6 तु वि°; K7 B6

कर्मणा जायते प्रेत्य मूर्तिमान्षोडशात्मकः ।
विद्यया जायते नित्यमव्ययो ह्यव्ययात्मकः ॥ ८
कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धितरा नराः ।
तेन ते देहजालानि रमयन्त उपासते ॥ ९
ये तु बुद्धिं परां प्राप्ता धर्मनैपुण्यदर्शिनः ।
न ते कर्म प्रशंसन्ति कूपं नद्यां पिबन्निव ॥ १०
कर्मणः फलमाप्नोति सुखदुःखे भवाभवौ ।
विद्यया तदवाप्नोति यत्र गत्वा न शोचति ॥ ११
यत्र गत्वा न म्रियते यत्र गत्वा न जायते ।
न जीर्यते यत्र गत्वा यत्र गत्वा न वर्धते ॥ १२
यत्र तद्ब्रह्म परममव्यक्तमजरं ध्रुवम् ।
अव्याहतमनायासममृतं चावियोगि च ॥ १३
द्वंद्वैर्यत्र न बाध्यन्ते मानसेन च कर्मणा ।
समाः सर्वत्र मैत्राश्च सर्वभूतहिते रताः ॥ १४
विद्यामयोऽन्यः पुरुषस्तात कर्ममयोऽपरः ।
विद्धि चन्द्रमसं दर्शे सूक्ष्मया कलया स्थितम् ॥ १५ C. 12. 8818 B. 12. 242[1]. 15 K. 12. 247. 15

D5.9 T M5 च वि-; Da4 भुवि; D8 M1.6.7 च प्र- (for तु प्र-). —^{d}) Dn4 D5 पर- (for पार-). K2.4 -दर्शनः; K7 D9 -दृश्वनः (for -दर्शिनः).

8 D7 G1.3.6 om. 8^{ab} (cf. v. l. 7). —^{c}) Da4 विद्याया (for विद्यया). D3 व्यक्तम् (for नित्यम्). —^{d}) K6 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.5.8 अव्यक्तं (for अव्ययो). K6 B6.7.8 (marg.).9 Da3.a4 D5 ह्यक्षरात्मकः (B9 °कं); K7 V1 D4.6.7.9 T G1.3.6 M1.5–7 ह्य(M7 [ऽ]व्य)क्षरात्मकः; Bo.8 (orig.) Dn1.n4 D8 D2.3.8 ह्यव्ययात्मकं (for °त्मकः).

9 ^{a}) K4 त्वेकं; D7 T1 G1.3.6 त्वेते (for त्वेके). —^{b}) Ś1 K1.2 चाल्प-; Da3.a4 अल्प- (for स्वल्प-). K6 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 Ds D2.3.5.6.8 -बुद्धिरता; B8 (orig.) -बुद्धितमा; D7 T G1.3.6 M5 °तया (for °तरा).

10 ^{a}) K4.6 Bo Dn1.n4 Ds D2.3.8.9 स्म (for तु). Da4 D4 बुद्धि- (for बुद्धिं). —^{b}) K7 D4.6.9 धर्मं; Da4 कर्म- (for धर्म-). K7 D4.6.9 निपुण-; V1 Bo.6 (marg. as in text).7.9 Dn4 D8 G1 M7 -नैपुण- (for °ण्य-). V1 -दर्शनाः (for -दर्शिनः). ❀ Cs: धर्मनैपुण्यदर्शिनः, धर्मयोः प्रवृत्तिनिवृत्तिरूपयोर्नैपुण्यं संसारप्रदानमोक्षप्रदानशक्तित्वं, तत् पश्यन्तः। ❀ —^{c}) V1 M1 transp. न and ते. D7 T G1.3.6 M5–7 ते कर्म न प्रशंसंति. —^{d}) Ś1 K1.2.4 नद्यां कू(K1 रू)पं (by transp.); K6 कूपे नद्यां; D4.9 T1 G1.3.6 रूपं नद्यां; T2 M1.5–7 कूपं नद्याः. Bo पिबन्नपि; D2.8 पिबंति च; D5.7 °ति ये (for पिबन्निव).

11 D5 om. 11^{a}–12^{b}. —^{a}) Da4 Ds1 D7 T2 कर्मणा (T2 °णां) (for °णः). —^{b}) D4 सुखदुःख- (for °दुःखे). —^{c}) T2 विद्यायास. —^{d}) Da4 om. (hapl.) from न up to गत्वा (in 12^{b}).

12 Da4 om. up to गत्वा; D5 om. 12^{ab} (for both, cf. v. l. 11). —^{a}) Ś1 K1.2.4 म्रियेत (for म्रियते). —^{b}) Da4 वर्धते (for जायते). —^{c}) K4 जीर्यंते. K6 Bo.6.7.9 Da3.a4 Dn1.n4 Ds D2.3.8 न पुनर्जाय(K6 Bo.9 °र्जीर्य)ते यत्र. —^{d}) M7 तत्र (for यत्र). K6 Da4 Dn1.n4 Ds D2.8 वर्तते; Bo वर्तयेत् (for वर्धते).

13 ^{a}) D5 तत्र (for यत्र). M1.5.6 तद्याति (M6 °द्यांति) (for यत्र तद्). D7 T G1.3.6 M7 तद्याति (G1 °द्यामि; M7 °द्यांति) परमं ब्रह्म. —^{b}) D7 T G1.3.6 पुराणम् (for अव्यक्तम्). K6.7 Bo.6–9 Da3.a4 Dn1.n4 Ds D2–6.8.9 अचलं (for अजरं). —^{c}) Ś1 K1.2.4 अनाहतम्; K6 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.5.8 अव्याकृतम्; K7 D6 °हृतम् (for °हतम्). —^{d}) Da3.a4 अनृतं; Dn1 Ds D2.6.8 Cn (Cnp as in text) अव्यक्तं (for अमृतं). Bo च वियोगि; Da4 M1.5.6 चापि योगि; Ds D6 अवियोगि; D4 वावि° (for चावि°). D7 T1 G1.3.6 अमृतत्वं च विंदति.

14 ^{a}) D7 G1.3.6 द्वंद्वे (for द्वंद्वैर्). K4.6.7 V1 Bo.6–9 Da3.a4 Dn1.n4 D2–6.8.9 न यत्र (by transp.); B6 (marg.) न नित्यं; D7 G1 यत्र नि-. B7 वध्यंते; D4.7 T2 G1.3.6 M5 बध्यंते (for बा°).

15 ^{a}) K2 यः (for ऽन्यः). —^{b}) D8 [ऽ]क्षरः (for ऽपरः). —^{c}) K1 चंद्रसमं (for °मसं). K7 D4.9 स्पर्शे; Da4 दृशे (for दर्शे). —^{d}) Ś1 K1.2.4 वृतं (for स्थितम्). — After 15, D7 T G1.3.6 Kumbh. ed. ins.:

682* विद्यामयं तं पुरुषं नित्यं ज्ञानगुणात्मकम् ।

16 ^{a}) K6 V1 Bo.8 यदेतद्; Da4 तदेव; M7 तदैतद् (for तदे°). ❀ Ca: ऋषिणा वेदेन ॥ Cn: बृह-

C. 12. 8819 B. 12. 242[1]. 16 K. 12. 247. 16 तदेतदृषिणा प्रोक्तं विस्तरेणानुमीयते ।
नवजं शशिनं दृष्ट्वा वक्रं तन्तुमिवाम्बरे ॥ १६
एकादशविकारात्मा कलासंभारसंभृतः ।
मूर्तिमानिति तं विद्धि तात कर्मगुणात्मकम् ॥ १७
देवो यः संश्रितस्तस्मिन्नब्बिन्दुरिव पुष्करे ।
क्षेत्रज्ञं तं विजानीयान्नित्यं त्यागजितात्मकम् ॥ १८
तमो रजश्च सत्त्वं च विद्धि जीवगुणानिमान् ।
जीवमात्मगुणं विद्यादात्मानं परमात्मनः ॥ १९
सचेतनं जीवगुणं वदन्ति
स चेष्टते चेष्टयते च सर्वम् ।
ततः परं क्षेत्रविदो वदन्ति
प्रावर्तयद्यो भुवनानि सप्त ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥

दारण्यक(1. 5. 14)दर्शिना याज्ञवल्क्येन । ❀ — ^{b}) D$_7$ T$_1$ G$_1$ -नीयते (for -मीयते). — ^{c}) K$_6$ न च तं; B$_{7.8}$ D$_7$ T G$_{1.3.6}$ M$_5$ नवं च (B$_{7.8}$ तु); Da$_4$ नरजं (for नवजं). K$_2$ नवजशिशिनं दृष्ट्वा (sic). — ^{d}) K$_6$ V$_1$ Bo$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ Ds D$_{2.3.5.8}$ T$_2$ M$_{1.5-7}$ वक्रतंतुम्; D$_7$ T$_1$ G$_{1.3.6}$ शतक्रतुम् (for वक्रं तन्तुम्).

17 ^{a}) ❀ Ca : भूतानि पञ्च षडिन्द्रियाणि इत्येकादश विकाराः । ❀ — ^{b}) Da$_4$ कथा-; D$_7$ G$_{1.3.6}$ M$_7$ काल- (for कला-). K$_7$ -संभाव- (for -संभार-). K$_1$ -संभृताः; K$_2$ -संव्रतः; K$_7$ D$_5$ -संवृतः; Da$_4$ -संस्मृतः; Ds$_1$ -संधृतः (for -संभृतः). — ^{c}) K$_6$ V$_1$ इव (for इति). — After 17, D$_7$ T G$_{1.3.6}$ M$_{1.5-7}$ Kumbh. ed. Cv ins.:

683* तस्मिन्यः संस्थितो ह्यग्निर्नित्यं स्थाल्यामिवाहितः ।
आत्मानं तं विजानीहि नित्यं त्यागजितात्मकम् ।

[(L. 1) D$_7$ T$_1$ G$_{3.6}$ तन्व्यां हि; G$_1$ तस्यां हि (for तस्मिन्यः). G$_{1.3.6}$ ह्यग्निं. G$_{3.6}$ [आ]हितं; M$_{1.6}$ [अ]र्पितं. — (L. 2) T$_2$ तु (for तं). T$_2$ ज्ञान- (for त्याग-).]

18 ^{a}) K$_2$ वः (for यः). Ś$_1$ K$_{1.4}$ संशितस्; V$_1$ B$_8$ (marg. as in text) D$_{4.5.9}$ M$_7$ संस्थितस्; D$_6$ संस्तृतस् (for संश्रितस्). D$_7$ T$_1$ G$_{1.3.6}$ ह्यस्मिन् (for त°). Cp देवोपमः श्रितो ह्यस्मिन्. — ^{b}) K$_6$ -बिंदुम् (for -बिन्दुर्). — ^{c}) B$_8$ (marg.) क्षेत्रज्ञस्; Da$_4$ क्षेत्रे ज्ञं. Dn$_4$ सं- (for तं). K$_7$ D$_{4.5.7.9}$ T G$_{1.3.6}$ विजानीहि (for °यान्). — ^{d}) G$_1$ M$_{1.6}$ नित्य- (for नित्यं). K$_{4.6}$ V$_1$ Bo$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ D$_{2.3.6.8}$ योग-; T$_2$ G$_3$ M$_{1.5-7}$ ज्ञान- (for त्याग-). K$_7$ D$_9$ -गुणात्मकं (for -जिता°). D$_5$ नित्यं त्यागायतात्मकं.

19 K$_7$ om. (? hapl.) 19^{ab}. D$_4$ transp. 19^{ab} and 19^{cd}. — ^{b}) D$_7$ T$_1$ G$_1$ चैव (for जीव-). K$_6$ V$_1$ Bo$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ Ds D$_{2-9}$ T G$_{1.3.6}$ M$_5$ -गुणात्मकं (G$_1$ °कः) (for -गुणानिमान्). — ^{c}) Da$_4$ आत्मगुणे (for °गुणं). K$_7$ D$_6$ विंद्याद् (for वि°).

20 ^{a}) D$_7$ T G$_{1.3.6}$ M$_{1.5-7}$ अचेतनं (for स°). B$_{6.8}$ (both marg.) Ca (Cap as in text) -गणं (for -गुणं). ❀ Cn : जीवगुणं जीवगुणेन चैतन्येन युक्तम् ॥ Cv : जीवगुणमचेतनम् स्वनिष्ठचैतन्यस्यापि परमाधीनत्वादचेतनमिव जीवगुणं वदन्ति । ❀ — B$_9$ om. (hapl.) 20^{bc}. — ^{b}) Ś$_1$ K$_{1.2.4}$ यश्च; T$_2$ न (for स). K$_6$ Bo$_8$ (marg.) Da$_3$. a$_4$ Dn$_1$. n$_4$ Ds D$_{2.3.8}$ जीवयते (for चेष्ट°). — ^{c}) D$_7$ T G$_{1.3.6}$ अतः (for ततः). Ś$_1$ K$_{1.2.4}$ क्षेत्रविदं; D$_4$ °विदा (for °विदो). — ^{d}) K$_6$ प्रावर्तयन्; V$_1$ Bo$_6$ (marg.). $_{7.8}$ (marg.). $_9$ Dn$_1$. n$_4$ D$_{2.3.7.8}$ T G$_{1.3.6}$ M$_{1.7}$ प्राकल्पयद् (for प्रावर्तयद्).

Colophon : G$_2$ missing; K$_{3.5}$ B$_{1-5}$ Da$_1$. a$_2$ Dn$_2$. n$_3$ D$_1$ G$_{4.5}$ M$_{2-4}$ absent. — *Sub-parvan* : Ś$_1$ K$_{1.2.4.6.7}$ V$_1$ Bo$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ Ds D$_{2-5.7-9}$ T G$_{1.3.6}$ M$_{1.5-7}$ मोक्षधर्म. — *Adhy. name* : Ś$_1$ K$_{1.2.4}$ शुकप्रश्नः; K$_{6.7}$ V$_1$ Bo$_{6-9}$ Da$_3$. a$_4$ Dn$_1$. n$_4$ Ds D$_{2-6.8.9}$ शुकानुप्रश्नः; M$_{1.6.7}$ शुकानुप्रश्ने विद्याकर्मफलभेदः; M$_5$ शुकानुप्रश्ने क्षराक्षरविवेकः. — *Adhy. no.* (figures, words or both): K$_6$ D$_3$ M$_{1.6.7}$ 66; Dn$_1$ D$_7$ T$_1$ G$_{1.3.6}$ M$_5$ 68; Dn$_4$ Ds$_2$ 67; Ds$_1$ 6 (sic); T$_2$ 82. — *Śloka no.*: Dn$_1$. n$_4$ D$_3$ 20.

२३४

शुक उवाच ।

क्षरात्प्रभृति यः सर्गः सगुणानीन्द्रियाणि च ।
बुद्ध्यैश्वर्याभिसर्गार्थं यद्ध्यानं चात्मनः शुभम् ॥ १
भूय एव तु लोकेऽस्मिन्सद्वृत्तिं वृत्तिहैतुकीम् ।
यया सन्तः प्रवर्तन्ते तदिच्छाम्यनुवर्णितम् ॥ २
वेदे वचनमुक्तं तु कुरु कर्म त्यजेति च ।
कथमेतद्विजानीयां तच्च व्याख्यातुमर्हसि ॥ ३
लोकवृत्तान्ततत्त्वज्ञः पूतोऽहं गुरुशासनात् ।
कृत्वा बुद्धिं वियुक्तात्मा त्यक्ष्याम्यात्मानमव्यथः ॥ ४

व्यास उवाच ।

यैषा वै विहिता वृत्तिः पुरस्ताद्ब्रह्मणा स्वयम् ।
एषा पूर्वतरैः सद्भिराचीर्णा परमर्षिभिः ॥ ५
ब्रह्मचर्येण वै लोकाञ्जयन्ति परमर्षयः ।
आत्मनश्च हृदि श्रेयस्त्वन्विच्छ मनसात्मनि ॥ ६

C. 12. 8829
B. 12. 243[2]. 6
K. 12. 248. 6

234

1 a) G2 पुरा (for क्षरात्). V1 प्रभृतयः (for °ति यः). Ś1 K1.2 यत्सर्वं (for यः सर्गः). ❀ Cn : क्षरात् प्रधानात् । ❀ — b) K1 Dn4 सगुणान् (for °णानि). — c) K6 B0.6.7 Dn1 D7.8 G2 M1.5.7 बुद्ध्यैश्वर्याति- (D7 G2 M5.7 °दि-) (for °र्याभि-). K6 B0.6–8 Dn1.n4 Ds D2.3.5.6.8 -सर्गोयं; V1 B9 -सर्गोथ; D7 T G1–3.6 M1.5–7 -संसर्गः (for -सर्गार्थं). Da3.a4 बुद्ध्यैश्वर्यवि(Da4 °नि)सर्गार्थं. ❀ Ca : बुद्ध्यैश्वर्यमणिमादि । ❀ — d) K6 V1 B0.6–9 Dn1.n4 Ds D2–5.7.8 T G1–3.6 M1.5–7 प्रधानश्च (D4 T G1.3.6 M6.7 °नं) (for यद्ध्यानं). D7 T1 G1–3.6 चात्मना (for °नः). K6 V1 B0.6–9 Dn1.n4 Ds D2–8 T G1–3.6 M1.5–7 श्रुतं (for शुभम्).

तथा गतिं गमिष्यतः किमात्मना परेण वा ॥ ६४
यदेकपातिनां सतां भवत्यमुत्र गच्छताम् ।
भयेषु सांपरायिकं निधत्स्व तं महानिधिम् ॥ ६५
सकूलमूलबान्धवं प्रभुर्हरत्यसङ्गवान् ।
न सन्ति यस्य वारकाः कुरुष्व धर्मसंनिधिम् ॥ ६६

C. 12.12110
B. 12. 322(1). 67
K. 12. 329. 66

विगमाद्विना न यावकं, स्वादुभक्ष्यं, इव स्वर्गं प्रति प्रभुः, न स्वेष्टलाभे प्रभुरित्यर्थः ॥ Cp : अबुद्धिमोहनं, बुद्धिमोहनं रसनं विना यावकं सुरसभक्ष्यमिव प्रेप्सितं प्रति प्रभुर्नास्ति। असंमूढबुद्धिरेवेष्टलाभे प्रभुरित्यर्थः ॥ Cv : प्रभुस्तु ते न पावक इत्यत्र अबुद्धिमोहनात् कारणात् पावकः नारकाग्निः ते प्रभुर्न इति योजना । ❀

62 ^{a}) B8 Dn1. n4 Ds D2. 3. 8 त्रिरष्ट-; G2 द्विपृष्ट- (for द्विरष्ट-). Da4 -वर्षतो (for -वर्षता). ❀ Ca : द्विरष्टवर्षता, तारुण्यम् । ❀ — ^{b}) ❀ Ca : ध्रुवः, परिनिष्ठितरूपः । ❀ — K6 B6. 7. 9 Da3. a4 transp. 62^{c} and 62^{d}. — ^{c}) K1 कुरुषु (for कुरुष्व). — ^{d}) T2 विवर्तते (for ऽति°). Da4 (also as in text) वयो हि तेप्यनेकशः.

63 ^{a}) K2 परा; T1 पुरो (for पुरा). B6 (marg. as in text). 7 Da3 सोंतिके; Da4 सांतिके (for सोऽन्तकः). M1. 5–7 पुराभ्युपैति तेंतकं. — ^{b}) B6 (marg.) प्रसाद- (for प्रमाद-). Da4 Ds1 चमूं (for दमम्). Ś1 (*sup. lin.*; before corr. as in text) K1. 6 V1 Bo. 6–9 Da3 Dn1. n4 Ds2 D2. 3. 5. 7. 8 T G1. 3. 6 Ca. p प्रमा(D7 T2 G1. 3 °मो)दगोमुखां (K1 B9 °खा; B6. 8 [both marg.] D5 °खीं) चमूं; K7 D4. 9 °दतो सुखावहं; G2 M1. 5–7 °दगोमुखा च(G2 °खाश्च)मूः. ❀ Cn (reading प्रमादगोऽमुखां चमूम्) : प्रमादगः, प्रमादगृहवासी अन्तकः । चमूं, चमति भक्षयतीति चमूरिन्द्रियसेना, तां अमुखां, अन्तकत्वादिदोषेण स्वस्वविषयभोगहीनां यावत्करोति ततः पुरैव ॥ Cp (reading प्रमादगोमुखां चमूम्) : प्रमादगोमुखां, प्रमादगोचरां प्रमादस्थानेषु सोद्यमां, चमूं रोगादिरूपाम् । ❀ — ^{c}) Cp यथागृहीत (for यथागृहीतम्). K1 उक्तितं; K4 Bo. 7–9 Dn1 Ds D2. 3. 7. 8 T G1–3. 6 Cp (gloss : उद्युक्तः) उत्थितस् (for °तं). ❀ Cp गृहीतः, केशेष्वाकृष्टः, स्वधर्मपालने उत्थितः, उद्युक्तः । ❀ — ^{d}) K2 त्वरस्त; G2 त्वरश्च; Cp यतस्व (for त्वरस्व).

64 ^{a}) K4. 6. 7 B6–9 Da3. a4 Dn1. n4 Ds D2–4. 8. 9 G2 यथा (for यदा). G2 [अ]थैम् (for त्वम्). K2 (*sup. lin.* as in text) पृच्छतस् (for पृष्ठ°). — ^{b}) K7 त्वाम्; Da4 तम्; D7 त्वम् (for त्वम्). D4 गमिष्यति. — ^{c}) Ś1 K1. 2 यथागतं; K7 D4. 9 तथा गतं (for तथा गतिं). Da4 गमिष्यंतः; G2 °ष्यता (for °ष्यतः). ❀ Cn : गतिं, आत्मज्ञानरूपाम् । ❀ — ^{d}) D5 वै; G3 या (for वा). ❀ Cn : आत्मना, देहेन । परेण, तत्संबन्धिपुत्रादिना ॥ Cp : आत्मना, आत्मीयेन । परेण, उदासीनेन । ❀

65 ^{a}) K4 Dn1 D2. 8 Cn (gloss : एकाकिना) -पातिना; Dn4 -पातिनं (for °नां). K6. 7 D4. 9 शुभं (for सतां). Da4 corrupt; G2 यदेकमास्यतासनं; M1. 5–7 यदेव पाकिनां सतां. — ^{b}) M7 अमुग्र (for °त्र). Da4 गच्छतः (for °ताम्). — ^{c}) Ś1 K1. 6 B8 (marg. as in text) D5. 7 T1 G3. 6 भवेषु; K2 भावेषु; G2 परेषु (for भयेषु). Dn4 M7 सांपरायिकां; Cn (gloss : परलोके हितम्) °कं (as in text). — ^{d}) V1 B8 M1. 5–7 विधत्स्व; D7 T G1. 3. 6 दधत्स्व; G2 निधस्व (for °त्स्व). K2 मर्महा-; K4 Bo. 8 Da3. a4 Dn1. n4 Ds D2. 3. 8 केवलं (for तं महा-). D7 T1 G3. 6 -मुनिं (for -निधिम्).

66 ^{a}) V1 M1. 5–7 समूल-; B8 (marg. as in text) सकाल-; T1 G3. 6 स तत्र; T2 समाल-; Ca (gloss : तूलं, तुच्छं) सतूल ; Cn (gloss : कूलं, अग्रं) सकूल- (as in text). M1. 6. 7 -तूल-; M5 -कूल-; Ca (gloss : महद्वा सारवत्) -मूल- (as in text). G2 -बंधनं (for -बान्धवं). ❀ Cn : सकूलमूलबान्धवम्, बालवृद्धवयस्यैः सहितं यथा स्यात्तथा ॥ Cp : सतूलमूलबान्धवम् । तूलमूलयम्, अलेतरम् । ❀ — ^{b}) D7 भवति (for हरति). K2 संगवान्; K6 D9 [अ]संगतान्; Da4 T G1 [अ]संभवान्; G2 M1. 5–7 [अ]संशयं (for [अ]सङ्गवान्). — ^{c}) D5 वसंति; M1 नयंति (for न सन्ति). G2 M1. 5–7 यत्र (for यस्य). K7 D4. 9 धारकाः; B8 बांधवाः; Da4 वारकः; D5 चारकाः; D7 T2 G1 भा°; T1 G2. 3. 6 हा° (for वा°). — ^{d}) Ś1 K1. 2. 4 तन्महा-; Ds1 कर्मसं- (for धर्मसं-). D4. 9 कुरुष्व धर्मसंचयं; G2 °ष्व धर्मसंविधिं.

67 ^{a}) B6 (marg.) निदर्शितं (for °र्शनं). — ^{b}) T2 तदेह (for तवेह). Dn4 सूत्र- (for पुत्र). K6. 7 Bo. 6. 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 सांप्रतं; V1

C. 12. 12111
B. 12. 322[1].68
K. 12. 329. 67

इदं निदर्शनं मया तवेह पुत्र संमतम् ।
स्वदर्शनानुमानतः प्रवर्णितं कुरुष्व तत् ॥ ६७
दधाति यः स्वकर्मणा धनानि यस्य कस्यचित् ।
अबुद्धिमोहजैर्गुणैः शतैक एव युज्यते ॥ ६८
श्रुतं समर्थमस्तु ते प्रकुर्वतः शुभाः क्रियाः ।
तदेव तत्र दर्शनं कृतज्ञमर्थसंहितम् ॥ ६९
निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः ।
छित्त्वैनां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः ॥ ७०
किं ते धनेन किं बन्धुभिस्ते
किं ते पुत्रैः पुत्रक यो मरिष्यसि ।
आत्मानमन्विच्छ गुहां प्रविष्टं
पितामहास्ते क्व गताश्च सर्वे ॥ ७१
श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
को हि तद्वेद कस्याद्य मृत्युसेना निवेक्ष्यते ॥ ७२

D$_{5.7}$ संमतः; T$_1$ G$_6$ सत्तमं; G$_3$ सत्तम (for संमतम्). — ^{c}) K$_6$ B$_0$ सु- (for स्व-). — ^{d}) K$_6$ प्रवलिगतं; G$_2$ °र्णितः; M$_5$ °र्तितं (for °र्णितं). D$_7$ T$_1$ G$_{3.6}$ कुरुष्व तत्र (T$_1$ G$_6$ °स्व-) वर्णितं; T$_2$ G$_1$ कुरुष्व तत्प्रवर्णितं (by transp.).

68 ^{a}) B$_{0.8}$ (marg. as in text) D$_7$ T G$_{1.3.6}$ ददाति; Cn (gloss: आत्मानं, देहं पुष्णाति) दधाति (as in text). Ś$_1$ K$_{1.2}$ V$_1$ यश्च; K$_6$ B$_{0.8}$ Ds D$_8$ यस्य; B$_6$ वा स्व-; Da$_{3.a4}$ वा सु- (for यः स्व-). Dn$_4$ -धर्मणा (for -कर्मणा). — ^{b}) K$_6$ B$_{0.6-9}$ Da$_{3.a4}$ Dn$_{1.n4}$ Ds D$_{2.3.8}$ Cn ददाति (for धनानि). K$_{2.4}$ धनानि यश्च दर्शनात्. — ^{c}) Da$_{3.a4}$ अबुद्धिर्; G$_2$ प्रबुद्ध- (for अबुद्धि-). — ^{d}) K$_{4.6}$ B$_{6.7.9}$ Da$_{3.a4}$ Dn$_{1.n4}$ Ds D$_{2.3.5.8}$ Cn.p स एक; K$_7$ B$_8$ D$_{4.9}$ स चैक; B$_0$ शतैव; T$_2$ शृतैः स; G$_1$ शतैः क; G$_3$ कृतैः क; M$_{1.5.6}$ गतैक; M$_7$ गतौ क (for शतैक). B$_0$ एक (for एव). K$_6$ V$_1$ B$_{6.7.8}$ (marg. as in text).$_9$ Da$_{3.a4}$ Cnp मुच्यते (for युज्यते).

69 ^{a}) K$_7$ समस्तम् (for समर्थम्). D$_{5.7}$ Cn अश्नुते (for अस्तु ते). K$_6$ V$_1$ B$_{0.6-9}$ Da$_{3.a4}$ Dn$_{1.n4}$ Ds D$_{2.3.8}$ श्रुतं समस्तमश्नुते (Da$_4$ °श्रुते; Dn$_4$ °श्रुतं); T$_1$ G$_6$ श्रुतं समश्नुते सदा; T$_2$ G$_3$ श्रुतं स्वधर्ममश्नुते; G$_1$ श्रुतं स्वमर्थमश्नुते. ❀ Cn: श्रुतं तत्त्वमस्यादिवाक्यजं ज्ञानं कर्तृ, समस्तं ब्रह्माण्डमश्नुते, व्याप्नोति । ❀ — ^{b}) V$_1$ शुभां; B$_8$ (marg.) स्वकाः; Da$_4$ शुभा (for शुभाः). K$_2$ प्रियाः; V$_1$ क्रियां (for क्रियाः). — ^{c}) K$_2$ partly damaged. V$_1$ तस्य (for तत्र). Ś$_1$ K$_1$ तदेव दर्शनं तव; K$_{4.6}$ B$_{0.6-9}$ Da$_{3.a4}$ Dn$_{1.n4}$ Ds D$_{2.3.8}$ Cs तदेतदर्थदर्शनं; M$_{1.7}$ °तदत्र दर्शनं; M$_{5.6}$ °वदत्र द° (sic). — ^{d}) Da$_{3.a4}$ अज्ञ- (for अर्थ-). D$_5$ -संज्ञकं (for -संहितम्). T$_2$ कृतज्ञधर्मसंहितं. ❀ Cn: कृतज्ञं, कृतज्ञे उपदिष्टं, अर्थसंहितं पुरुषार्थसंगतं भवति । ❀

70 = 12. 169. 24; 316. 37; quoted in Śaṁkara's Bṛ. Up. Bhāṣya on iv. 5. 15. — ^{a}) Ś$_1$ K$_{1.2.4}$ V$_1$ निबंधिनी; B$_7$ निबद्धनी; Dn$_4$ निबंधना; G$_2$ न बध्नती. — ^{c}) K$_{4.6}$ V$_1$ B$_{0.6-9}$ Da$_{3.a4}$ Dn$_{1.n4}$ Ds$_2$ D$_{2.3.5.8}$ छित्त्वैतां; K$_7$ °नं; D$_7$ जित्वैनां; G$_2$ हित्वैतां (for छित्त्वैनां). — ^{d}) Ś$_1$ K$_1$ T$_2$ दुष्कृताः.

71 G$_1$ om. 71^{a}–72^{b}. — ^{a}) Ś$_1$ K$_{1.2}$ किं वा; K$_6$ B$_6$ Da$_4$ T$_2$ G$_2$ M$_{1.5-7}$ किमु (T$_2$ °मुत) (for the second किं). B$_8$ पुत्रकस् (for बन्धुभिस्). D$_{5.7}$ किं बंधुभिः पुत्र धनैश्च किं ते; T$_1$ G$_{3.6}$ किं ते धनेन किमुत बालिभिस्ते. — ^{b}) Ś$_1$ K$_{1.2.4}$ किं वा पुत्रैर्ब्राह्मण (K$_1$ °णो) मरिष्यसि; D$_{5.7}$ दारैश्च किं पुत्रक यन्मरिष्यसि. — ^{c}) K$_2$ D$_3$ प्रविष्टां (for °ष्टं). — ^{d}) D$_2$ om. from पितामहा up to गम्य इम (in 73^{a}). D$_5$ तात (for सर्वे). D$_7$ T G$_{3.6}$ M$_{1.6.7}$ पितामहा (T$_1$ G$_{3.6}$ °ह)स्ते क्व गतः पिता च. — After 71, D$_5$ ins. 787*.

72 D$_2$ om. 72; G$_1$ om. 72^{ab} (for both, cf. v. l. 71). 72^{ab} = 12. 169. 14^{ab}. — ^{a}) K$_6$ स्वःकार्यम्; Da$_4$ श्वकार्यम्; Ds$_1$ स्वकार्यम्. Ds$_1$ अत्र (for अद्य). B$_6$ वर्तव्यं (for कुर्वीत). — ^{b}) B$_6$ मध्याह्ने (for पूर्वाह्णे). Some MSS. पूर्वाह्ने चापराह्णिकं. — K$_7$ B$_{6-9}$ Da$_{3.a4}$ ins. after 72^{ab}: K$_6$ after 72: V$_1$ B$_0$ Dn$_{1.n4}$ Ds D$_{3.8}$ Cn subst. for 72^{cd}: D$_5$ ins. after 71:

787* न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ।

[= 12. 169. 14^{cd}. K$_7$ वापि; B$_8$ अस्य (for वास्य).]

— 72^{cd} = 12.169. 14^{ef}. — ^{c}) B$_{6.7.9}$ Da$_{3.a4}$ तं; B$_8$ D$_{5.7}$ सं- (for तद्). K$_7$ कस्यास्य; T$_1$ G$_{3.6}$ यत्रास्य; T$_2$ G$_1$ M$_{1.5-7}$ यत्राद्य (for कस्याद्य). G$_2$ को हि कस्याद्य मर्त्यस्य. — ^{d}) K$_6$ प्रवेक्ष्यति; K$_7$ B$_8$ D$_{4.5.7.9}$ पतिष्यति (D$_7$ °ष्ति); B$_7$ Da$_{3.a4}$ विवक्षते; B$_9$ विवेक्ष्यते; T G$_{1-3.6}$ M$_{1.5-7}$ [अ]भिवीक्ष(T$_1$ G$_{2.3.6}$ °क्ष्य)ते (for निवेक्ष्यते).

73 D$_2$ om. up to गम्य इम (cf. v. l. 71). — ^{a})

अनुगम्य श्मशानान्तं निवर्तन्तीह बान्धवाः ।
अग्नौ प्रक्षिप्य पुरुषं ज्ञातयः सुहृदस्तथा ॥ ७३
नास्तिकान्निरनुक्रोशान्नरान्पापमतौ स्थितान् ।
वामतः कुरु विश्रब्धं परं प्रेप्सुरतन्द्रितः ॥ ७४
एवमभ्याहते लोके कालेनोपनिपीडिते ।
सुमहद्धैर्यमालम्ब्य धर्मं सर्वात्मना कुरु ॥ ७५
अथेमं दर्शनोपायं सम्यग्यो वेत्ति मानवः ।
सम्यक्स धर्मं कृत्वेह परत्र सुखमेधते ॥ ७६
न देहभेदे मरणं विजानतां
न च प्रणाशः स्वनुपालिते पथि ।
धर्मं हि यो वर्धयते स पण्डितो
य एव धर्माच्च्यवते स मुह्यति ॥ ७७
प्रयुक्तयोः कर्मपथि स्वकर्मणोः
फलं प्रयोक्ता लभते यथाविधि ।
निहीनकर्मा निरयं प्रपद्यते
त्रिविष्टपं गच्छति धर्मपारगः ॥ ७८
सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभम् ।
तथात्मानं समादध्याद्भ्रश्येत न पुनर्यथा ॥ ७९

C. 12. 12173
B. 12. 322(1). 8
K. 12. 329. 79

K6.7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–5. 8. 9 G2 M1. 5–7 Cn त्रि(D2 om. त्रि)नाशांते (K7 D1. 9 °तं); D7 T G1. 3. 6 श्मशानांते (for °नान्तं). — b) Ś1 K1 निवर्ततेद्य ; K2. 4. 7 D4. 5. 7. 9 T G1. 3. 6 °र्तंते हि ; B7. 8 Dn1. n4 Ds D2. 3 8 °र्तंते ह (for °र्तन्तीह). K4 बांधवः. — c) G2 पुरुषा (for °षं).

74 b) T2 नरान् (for नरान्). K4 पापमितौ ; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 Cn °मते (for °मतौ). K4 स्थिता ; T1 G3. 6 रतान् (for स्थितान्). — c) K7 वि * * ; V1 B8–9 Dn1. n4 Ds2 D2. 3. 5. 8 T2 G1 M1. 5–7 विस्रब्धं ; G2 विस्रंभं (for विश्रब्धं). Ś1 K1. 2. 4 वामे कुरुष्व विस्रब्धं ; T1 G3. 6 समानकुल-विस्रब्धं. — d) K1 G2 M1. 5–7 पर- ; K2 पुर- (for परं). K7 अतंद्रिताः ; T1 G3. 6 अतामितः ; G2 अतंद्रितं.

75 75ab = 12. 169. 7ab ; cf. Uttarādhyayanasūtra 14. 22ab. — a) K1 अद्याहते ; V1 G2 अभ्यागते (for °हते). — b) Ś1 K1. 2. 4 -निपीड्यते (for °डिते). G2 कालेनोपनीवीड्यते. — c) K4 स्वमहद् (for सु°). K1 आलस्य (for आलम्ब्य). — d) M1. 5–7 चर (for कुरु).

76 a) Ś1 K1. 2. 4 प्रथमं ; Bo Ds1 अथैनं ; D4 अशेषं ; D5. 7 अशेष- ; G1 अथैमं (for अथेमं). — c) K4 Bo. 8. 9 Dn1 Ds D2. 3. 5. 7. 8 T1 G1–3. 6 M7 Cn स्व- ; K6 lacuna ; B6. 7 Da3. a4 Dn4 च (for स). Ds1 कृतेह ; D7 कृत्वा वै ; Cn कृत्वेह (as in text). — d) K4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–5. 8. 9 G3 M1. 5–7 अश्नुते (for एधते).

77 Ds1 reads 77a twice. — a) G1 नृ- (for न). K7 D1. 9 G1 देहभेदो ; Ds1 (first time) °भेद- (for °भेदे). B6 D7 G3 विजानता (for °नतां). T1 G6 न तेन भूदमरभूर्विजानता. — b) T G1. 3. 6 न तु ; G2 नय- ; M1. 6. 7 तत्तु (for न च). Ś1 K1. 4 प्रणाशं (for °शः). D5. 7 T2 G1. 2 त्वनु- (for स्वनु-). G3 -पाल्यते (for -पालिते). K2 न चेष्टनाशं सुनुपालिते पथि (sic). ❀ Cn : अनुपालिते, शिष्टैरादृते ॥ Cs : पूर्वैराचरिते । ❀ — c) B6 (marg. as in text). 7 धर्मे हि यो ; Da4 धर्मो हि यो ; D5 धर्मेरियं. T G1. 2 M1. 5–7 वर्तयते (for वर्धं°). T2 न (for स). Da4 पिंडितो (for पण्डितो). — d) K7 मोह्यति ; D7 T1 G6 मुच्यते ; T2 G1. 3 मुह्यते ; G2 M7 हीयते (for मुह्यति).

78 a) Da4 प्रमुक्तयोः ; T1 G1. 3. 6 प्रवृत्तयोः ; T2 प्रवर्तयोः (for प्रयुक्तयोः). V1 Bo. 7. 9 Da4 D5 G2 कर्मपथे (for °पथि). Ś1 K1. 2. 4 स्वकर्मणा (for °णोः). K6 B6 प्रयु(K6 °मु)क्तयोः कर्मपथेषु (B6 °ष्व-) कर्मणोः. — b) K7 पलं ; Ds1 फले (for फलं). M1. 6. 7 प्रयोक्तो (for °क्ता). G1 om. यथा. K7 V1 Bo. 8 (marg.) Dn1. n4 Ds D2–5. 8. 9 G2 M1. 5–7 -कृतं ; B6 lacuna (for -विधि). — c) Ś1 K1. 6 B7–9 Da4 D4 T2 G1. 2 विहीन- ; K2. 4 विहाय (for निहीन-). Ds1 निवयं ; D7 T G1–3. 6 नरकं (for निरयं). — d) K1 त्रिविष्टं ; V1 Bo त्रिपिष्टपं. Da3 repeats from धर्मं up to दध्याद् (in 79c) after 80a. K4 धर्मपारकः.

79 For the repetition in Da3, cf. v. l. 78. — c) G2 अथ (for तथा). K2 समारुध्याद् (for °दध्याद्). — d) K4. 6. 7 B7. 8 (marg. as in text) Dn1. n4 Ds D3. 5. 8 G3 M1. 5. 6 भ्रश्यते ; Bo. 6 भ्रस्येत ; D1. 9 भ्रस्यते ; D7 T G1. 3. 6 म्रियते ; M7 भ्राश्यते (for भ्रश्येत).

80 For the repetition in Da3, cf. v. l. 78. D5 om. 80. — a) ❀ Cn : नोत्क्रामति, धर्ममिति शेषः । ❀

C. 12. 12124
B. 12. 322[1]. 81
K. 12. 329. 60

यस्य नोत्क्रामति मतिः स्वर्गमार्गानुसारिणी ।
तमाहुः पुण्यकर्माणमशोच्यं मित्रबान्धवैः ॥ ८०
यस्य नोपहता बुद्धिर्निश्चयेष्ववलम्बते ।
स्वर्गे कृतावकाशस्य तस्य नास्ति महद्भयम् ॥ ८१
तपोवनेषु ये जातास्तत्रैव निधनं गताः ।
तेषामल्पतरो धर्मः कामभोगमजानताम् ॥ ८२
यस्तु भोगान्परित्यज्य शरीरेण तपश्चरेत् ।
न तेन किंचिन्नप्राप्तं तन्मे बहुमतं फलम् ॥ ८३
मातापितृसहस्राणि पुत्रदारशतानि च ।
अनागतान्यतीतानि कस्य ते कस्य वा वयम् ॥ ८४
न तेषां भवता कार्यं न कार्यं तव तैरपि ।
स्वकृतैस्तानि यातानि भवांश्चैव गमिष्यति ॥ ८५
इह लोके हि धनिनः परोऽपि स्वजनायते ।
स्वजनस्तु दरिद्राणां जीवतामेव नश्यति ॥ ८६
संचिनोत्यशुभं कर्म कलत्रापेक्षया नरः ।
ततः क्लेशमवाप्नोति परत्रेह तथैव च ॥ ८७
पश्य त्वं छिद्रभूतं हि जीवलोकं स्वकर्मणा ।
तत्कुरुष्व तथा पुत्र कृत्स्नं यत्समुदाहृतम् ॥ ८८

— Da3 om. 80^{bc}. — ^{b}) Ś1 K1.2.4.7 B8 (marg.) D4.5.9 धर्म- (for स्वर्ग-). G3 स्वर्गमद्यानुसारिणी. — ^{d}) K6 नशोच्यं; Da3.a4 अशोचं (for °च्यं). Bo.6.8 (last two marg. as in text) Dn1.n4 Ds D2.3.8 पुत्र- (for मित्र-).

81 ^{a}) B7 Da3.a4 नोपरता; T1 G3.6 नो भविता (for नोपहता). — ^{b}) K4 Bo.8 (marg. as in text).9 Da3.a4 Dn1.n4 Ds D2.3.8 निश्चये हि; T2 G1 °ये तु (for °येषु). K6 अवलंब्यते; B7 °लंबिते (for °लम्बते). — ^{c}) Ś1 K1.2.4 स्वर्गे कृतावशायस्य; Da3.a4 °शेषस्य; D4 स्वर्गे क्षतावकाशस्य. — ^{d}) K6 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.5.7.8 T G1–3.6 M1.5–7 transp. तस्य and नास्ति.

82 ^{a}) D7 T G1–3.6 तपोवने च (for °वनेषु). D5 यातास् (for जातास्). — ^{b}) Dn1 तथा (for तत्र). — ^{c}) K1 धर्मा:. — ^{d}) Dn1.n4 Ds D2.3.8 कामभोगान् (for °भोगम्).

83 D4 reads 83 twice. — ^{b}) G3 चरन् (for चरेत्). — ^{c}) D5 T1 G2.3.6 M1.5–7 किंचिदप्राप्यं; D7 T2 °न्न प्राप्यं. — ^{d}) K6 V1 B6.7.8 (marg.).9 Da3.a4 D5.7 G2 M1.5–7 तन्मे बहुफलं मतं; T G1.3.6 तदे(T2 G1 °मे)व बहुलं मतं.

84 = (var.) 11.2.12 : 12.28.38 : B. 18.5.63. — ^{a}) K1 महा- (for माता-). — After 84, Ś1 K1.2.4.6.7 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2–5.7–9 T G1.3.6 Cn editions ins.:

788* अहमेको न मे कश्चिदहं वापि न कस्यचित् ।
तं न पश्यामि यस्याहं तं न पश्यामि यो मम ।

[(L. 1) K6 V1 Da4 D5 च (for वा). Bo.8 Dn1.n4 Ds D2.3.7.8 T G1.3.6 editions नाहमन्यस्य कस्यचित् (for the post. half). — (L. 2) K1 तेन; K4.6.7 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.8 न तं (by transp.). Da4 यत्याहं; Dn4 पश्याहं (for यस्याहं). Ś1 K1.2.4 V1 Ds D5.7 न तं (by transp.); T1 G3.6 स न; T2 न स. T G1.3.6 पश्यति (for पश्यामि).]

85 ^{a}) T1 तत् (for न). — ^{c}) K6 Da3.a4 सुकृतैस् (for स्व°). K6.7 B6–9 Da3.a4 Dn1 Ds1 D4.8 Bom. Kumbh. ed. जातानि (for या°). Ś1 K1.2.4 स्वकृतैरथ यातास्ते; V1 स्वकृतैरवजातास्ते. — ^{d}) K6 om. भवांश्चैव. B6.7.9 च स्वैर्; B8 च स्वर्; Da3.a4 स्वर्ग (for चैव). K6 D7 T2 G3 गमिष्यसि (for °ष्यति).

86 ^{a}) D7 T1 G3.6 भुवि (for इह). Ś1 K1.2.4 [ऽ]पि; T G1.3.6 M1.5–7 तु (for हि). K3.7 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2–5.8.9 M5 धनिनां (for °नः). G2 इह लोकेषु धनिनः. — ^{b}) K6.7 Bo.6–9 Da3.a4 Dn1.n4 Ds D2–5.8.9 T2 G2 M1.5–7 Cal. Bom. ed. स्वजनः (for परोऽपि). G3 परोपि सन्न जायते. — ^{c}) B9 स्वजनं. — ^{d}) Bo जीविताम्. K6 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.8 T G1–3.6 M1.5–7 editions अपि (for एव). T2 नस्यति; G3 पश्यति (for न°).

87 ^{a}) K1 संश्रितोनिशुभं कर्म (sic). — ^{b}) K1 नराः. Bo कलात्रापेक्षमानवः; T G3.3.6 M7 कळत्रावे(M7 °वे)क्षया नरः. — G2 om. 87^{c}–90^{b}. — ^{c}) Ś1 K1.2 T1 G1.3.6 तत्र; D7 तत्तत्- (for ततः). — ^{d}) D7 च मानवः (for तथैव च). G3 परत्र सुखमेधते.

88 G2 om. 88 (cf. v. l. 87). — ^{a}) Ś1 K1.2.4

तदेतत्संप्रदृश्यैव कर्मभूमिं प्रविश्य ताम् ।
शुभान्याचरितव्यानि परलोकमभीप्सता ॥ ८९
मासर्तुसंज्ञापरिवर्तकेन
सूर्याग्निना रात्रिदिवेन्धनेन ।
स्वकर्मनिष्ठाफलसाक्षिकेण
भूतानि कालः पचति प्रसह्य ॥ ९०

धनेन किं यन्न ददाति नाश्नुते
बलेन किं येन रिपून्न बाधते ।
श्रुतेन किं येन न धर्ममाचरे-
त्किमात्मना यो न जितेन्द्रियो वशी ९१
इदं द्वैपायनवचो हितमुक्तं निशम्य तु ।
शुको गतः परित्यज्य पितरं मोक्षदेशिकम् ॥ ९२

C. 12. 12137
B. 12. 322[1].94
K. 12. 329. 93

इति श्रीमहाभारते शान्तिपर्वणि नवाधिकत्रिशततमोऽध्यायः ॥ ३०९ ॥

तस्य यच्च्; K6 V1 Bo. 6 (marg.). 7. 9 Dn1. n4 Ds D2. 8 editions पश्यति; B6 (orig.) Da3. a4 D3 °तश्च्; D5 पश्य वा; M1. 5–7 पश्यैतच्च् (for पश्य त्वं). Dn1 D2. 8 editions छिन्न-; D3 T2 चित्र-; D5 स्थिर-; G3 शत्रु- (for छिद्र-). Ś1 K1. 2. 4 -रूपं (for -भूतं). M1. 5–7 तु (for हि). D7 अपश्यास्थिरभूतं हि; T1 अपश्यतो हतांस्तत्र. — ^{b}) T1 जीवलोकान् (for °लोकं). — ^{c}) M1 तं (for तत्). B9 D7 T G1. 3. 6 यथा (for तथा).

89 G2 om. 89 (cf. v. l. 87). — ^{a}) Ś1 K1. 2. 7 तदेव; K4 D4. 5. 7. 9 तदेवं; M1. 7 तदैतत् (for तदेतत्). Ś1 (marg. as in text) K2. 4 संप्रविश्य (K4 °श्ये); Da4 °देश्य; D4. 5 °दश्य (for °दृश्य). K4 च; D7 M1. 5–7 [ए]वं (for [ए]व). T1 G6 तवैतत्प्राप्य पश्येत; T2 G1. 3 तथैव तत्प्रपश्येत. — ^{b}) D5. 7 -भूतं (for -भूमिं). K6 V1 Bo. 6–8 Da3. a4 Dn1. n4 Ds D2. 3 T1 G1. 3. 6 प्रपश्यता; K7 D4. 9 प्रपद्यतां; B9 D5. 7 T2 M1. 5–7 प्रप(D7 °द)श्यतां; Bom. ed. प्रपश्यतः (for प्रविश्य ताम्). — ^{d}) Ś1 K2 अभीप्सुना; K1 °त्सता; M5–7 °प्सतां.

90 With 90, cf. 3. App. I, (32), lines 69–72. G2 om. 90^{ab} (cf. v. l. 87). — ^{a}) K1. 2. 4 मासं तु (for मासर्तु-). Ś1 K2 Bom. ed. -परिवर्तकेण (for °केन). — ^{b}) Dn4 रात्र- (for रात्रि-). K1. 2. 4 M1. 5–7 -दिनेंधनेन (for -दिवे°). — ^{c}) Bo D7 G2. 3. 6 स्वधर्म- (for स्वकर्म-). M1. 5 (*inf. lin.*). 6. 7 -पर- (for -फल-). K4. 6. 7 V1 Bo. 6. 8. 9 Dn1. n4 Ds D2–5. 7–9 T1 G2. 3. 6 -साक्षिकेन; B7 -रात्रिकेन (for -साक्षिकेण). — ^{d}) M1. 7 कालं (for कालः).

91 = (var.) Hitopadeśa 2. 9. — ^{a}) Dn4 धनेन (for धनेन). G3 किंचिन् (for किं यन्). K7 D4 यत्र ददाति; T1 G1 न ददाति (for यन्न ददाति). — ^{b}) D7 यं न; G3 यत्तु (for येन). K6 V1 B6–9 Da3. a4 Ds1 D2. 3. 8 editions रिपुं; Bo Dn1. n4 Ds2 G2 रिपुर् (for रिपून्). Dn1 Ds2 G2 बाध्यते. K7 D4. 9 यत्र रिपून्प्रबाधते. — ^{c}) D5 यन्न च (for येन न). — ^{d}) K6 G2 यो नि-; B6 (marg. as in text) यन्न; Da3. a4 यन्नि-; Dn1 Ds1 येन (for यो न). K6. 7 D4. 9 यतेंद्रियो (for जितेन्द्रियो). D5 भवेत् (for वशी).

92 Before 92, Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–5. 7–9 ins. भीष्म उवाच. — ^{a}) M1. 5–7 इति (for इदं). — ^{b}) B3 (marg.) G2 हितयुक्तं; Da4 दिनमुक्तं; D5 ज्ञेय° (for हित°). K2 निपश्य; Da4 निशाम्य (for निशम्य). K7 D4. 9 च; D5. 7 T2 G1 तत् (for तु). — ^{c}) B3 परिष्वज्य (for °त्यज्य). G2 शुकोगात्संपरित्यज्य. — ^{d}) Ś1 K1. 4 Bo. 6. 7 Da3. a4 Dn1. n4 Ds D2. 3. 8 Cn (gloss: मोक्षोपदेष्टारम्) -दैशिकं; K2 -दैविकं; K6 G3 -देशिकः; D5. 7 -दर्शकं; T1 G6 -देशतः; G2 -दर्शिकः (for -देशिकम्).

Colophon. D6 missing: K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. — *Sub-parvan*: Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–5. 7–9 T G1–3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name*: Ś1 K2 B9 Ca यावकाध्यायः; K1 यावकाख्यायः; K4. 6 V1 Da3. a4 D8 पावकाध्यायः; K7 ध्यातयाध्यायः; Bo. 6. 7 पाचकाध्यायः; B8 पावकाध्यायोत्क्रमः; Dn1 पावकाध्यापनं; Dn4 D2. 8 Cn (gloss: पावकस्य धर्मस्य अध्ययनम् । यद्वा, चित्तशोधकाध्ययनम्) पावकाध्ययनं; Ds शुकानुध्यापनं; D4. 9 ध्यातव्याध्यायः; D7 T1 G1. 6

३१०

C. 12. 12158
B. 12. 324 [3]. 1
K. 12. 331. 1

युधिष्ठिर उवाच ।
कथं व्यासस्य धर्मात्मा शुको जज्ञे महातपाः ।
सिद्धिं च परमां प्राप्तस्तन्मे ब्रूहि पितामह ॥ १
कस्यां चोत्पादयामास शुकं व्यासस्तपोधनः ।
न ह्यस्य जननीं विद्म जन्म चाग्र्यं महात्मनः ॥ २
कथं च बालस्य सतः सूक्ष्मज्ञाने गता मतिः ।
यथा नान्यस्य लोकेऽस्मिन्द्वितीयस्येह कस्यचित् ॥ ३
एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते ।
न हि मे तृप्तिरस्तीह शृण्वतोऽमृतमुत्तमम् ॥ ४
माहात्म्यमात्मयोगं च विज्ञानं च शुकस्य ह ।
यथावदानुपूर्व्येण तन्मे ब्रूहि पितामह ॥ ५
भीष्म उवाच ।
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ ६
तपोमूलमिदं सर्वं यन्मां पृच्छसि पाण्डव ।
तदिन्द्रियाणि संयम्य तपो भवति नान्यथा ॥ ७
इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
संनियम्य तु तान्येव सिद्धिं प्राप्नोति मानवः ॥ ८
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
योगस्य कलया तात न तुल्यं विद्यते फलम् ॥ ९

$M_{1.5-7}$ शुकानुशासनं; G_2 वेदव्यासशुकप्रसंगः; Cnp यावकाध्ययनं. — *Adhy. no.* (figures, words or both): B_8 148; Dn_1 147; Dn_4 Ds_2 G_3 145; Ds_1 G_1 $M_{1.6.7}$ 143; D_8 142; T_1 G_6 144; T_2 157; G_3 159; M_5 180. — *Śloka no.*: Da_4 95; $Dn_{1.n4}$ 92; D_8 94.

☞ After this adhy., all N MSS. (D_6 [second time] missing: $K_{3.5}$ B_{1-5} $Da_{1.a2}$ $Dn_{2.n3}$ D_1 absent) and of S MSS. G_2 alone ($G_{4.5}$ M_{2-4} absent) repeat 12. 174, in the Crit. App. of which are included the v. l. from the repeating MSS.

310

☞ This adhy. is missing in D_6 (cf. v. l. 12. 283. 15).

1 ^{b}) K_7 D_9 सुतो (for शुको). K_4 $B_{0.7}$ यज्ञे; K_7 Ds_2 $D_{4.5.7.9}$ जातो; Ds_1 जातौ (for जज्ञे). $D_{5.7}$ महात्मनः (for °तपाः).

2 ^{b}) G_2 तपोनिधिः (for °धनः). — ^{c}) $Ś_1$ $K_{1.2}$ च (for ह्य). V_1 B_8 D_9 (marg.) T $G_{1-3.6}$ $M_{1.5-7}$ विद्मो; B_7 (also as in text) Da_4 Dn_4 $D_{5.7}$ विप्र; D_4 विग्र (sic) (for विद्म). — ^{d}) D_4 वाग्र्यं; G_2 $M_{1.6-7}$ चास्य (for चाग्र्यं).

3 ^{a}) D_7 नु (for च). K_6 $M_{1.7}$ ततः (for सतः). — ^{b}) $K_{2.4}$ B_8 D_4 सूक्ष्मज्ञान°. K_6 कृता; T $G_{2.3.6}$ $M_{1.5-7}$ रता; G_1 नता (for गता).

4 ^{a}) $Ś_1$ $K_{1.2.4}$ संश्रोतुं (for [अ]हं श्रोतुं). — ^{b}) K_4 महात्मने; V_1 $B_{0.8}$ Da_4 $Dn_{1.n4}$ Ds $D_{2.3.8}$ °मते (for °द्युते). — ^{c}) $Ś_1$ $K_{1.2}$ च (for हि). D_7 मृतम् (for तृप्तिर्).

5 ^{a}) $K_{1.2}$ Da_4 महात्म्यम्; K_6 माहात्मम्. K_7 आत्मयोगश्च (for °योगं). — ^{b}) G_2 तथा जन्म (for विज्ञानं च). K_6 $B_{7.9}$ $Da_{3.a4}$ D_5 $G_{1.2}$ च; K_7 $D_{4.9}$ यत् (for ह). — ^{c}) $Ś_1$ $K_{1.2}$ यथार्थम्; Ds_1 यदावद् (sic) (for यथा°). K_1 T_1 आनुपूर्वेण; $K_{2.4.6.7}$ V_1 $B_{0.6.7.8}$ (orig.) Da_4 Dn_4 Ds $D_{2-5.7-9}$ G_6 अनुपूर्वेण; Dn_1 G_1 अनुपूर्व्येण (for आनुपूर्व्येण).

6 = 3. 133. 12; Manu. 2. 154. — ^{b}) $K_{4.6}$ V_1 $B_{0.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.8}$ T $G_{1-3.6}$ न वित्तैर्न च बंधुभिः. — ^{c}) T_2 च क्रियते (hypermetric) (for चक्रिरे). — ^{d}) K_7 $D_{4.9}$ वै (for नो). ❀ Ca: अनूचानः, गुरुमुखादधीतसाङ्गवेदः ॥ Cs: षडङ्गवेदाध्यायी परेषामध्यापकश्च । ❀

7 ^{a}) K_2 पूर्वं (for सर्वं). — ^{b}) $M_{1.5-7}$ मा (for मां). $D_{5.7}$ यन्मां त्वं परिपृच्छसि.

8 ^{b}) K_7 V_1 $B_{0.6}$ (marg. as in text).7.8 (marg. as in text).9 $Dn_{1.n4}$ Ds $D_{2-4.8.9}$ अच्छंति; $Da_{3.a4}$ अर्हंति; $D_{5.7}$ आच्छंति; M_7 ऋच्छतु (for °ति). T_2 [अ]संशयः. K_2 G_3 दोषपृच्छति (G_3 °त्य-) संशयं (sic). — ^{c}) M_6 तानेव (for तान्येव). — ^{d}) $K_{1.4}$ $Dn_{1.n4}$ $D_{2.8}$ आप्नोति (for प्रा°).

अत्र ते वर्तयिष्यामि जन्मयोगफलं यथा ।
शुकस्याग्र्यां गतिं चैव दुर्विदामकृतात्मभिः ॥ १०
मेरुशृङ्गे किल पुरा कर्णिकारवनायुते ।
विजहार महादेवो भीमैर्भूतगणैर्वृतः ॥ ११
शैलराजसुता चैव देवी तत्राभवत्पुरा ।
तत्र दिव्यं तपस्तेपे कृष्णद्वैपायनः प्रभुः ॥ १२
योगेनात्मानमाविश्य योगधर्मपरायणः ।
धारयन्स तपस्तेपे पुत्रार्थं कुरुसत्तम ॥ १३
अग्नेर्भूमेरपां वायोरन्तरिक्षस्य चाभिभो ।
वीर्येण संमितः पुत्रो मम भूयादिति स्म ह ॥ १४
संकल्पेनाथ सोऽनेन दुष्प्रापेणाकृतात्मभिः ।
वरयामास देवेशमास्थितस्तप उत्तमम् ॥ १५
अतिष्ठन्मारुताहारः शतं किल समाः प्रभुः ।
आराधयन्महादेवं बहुरूपमुमापतिम् ॥ १६
तत्र ब्रह्मर्षयश्चैव सर्वे देवर्षयस्तथा ।
लोकपालाश्च लोकेशं साध्याश्च वसुभिः सह ॥ १७
आदित्याश्चैव रुद्राश्च दिवाकरनिशाकरौ ।
मरुतो मारुतश्चैव सागराः सरितस्तथा ॥ १८

C. 12. 12175
B. 12. 324[3].18
K. 12. 331. 18

---

9 ^{b}) M$_{1}$ वाजिपेय-. Da$_{3. a4}$ -शतानि (for -शतस्य). T$_{1}$ G$_{6}$ वा (for च). — ^{d}) D$_{5. 7}$ परं (for फलम्).

10 ^{a}) Ś$_{1}$ K$_{1. 2. 4. 6}$ वर्णयिष्यामि (for वर्त°). — ^{b}) Ś$_{1}$ K$_{1. 2. 4}$ जंतोर्; M$_{1. 5-7}$ यन्मा (sic) (for जन्म-). T$_{1}$ जन्मयोगं. K$_{7}$ B$_{6}$ (marg. as in text). $_{7-9}$ Da$_{3. a4}$ D$_{4. 5. 9}$ T G$_{1. 3. 6}$ -बलं (for -फलं). K$_{4. 7}$ V$_{1}$ B$_{8}$ (marg.). $_{9}$ Dn$_{1. n4}$ D$_{4. 5. 7-9}$ T G$_{1-3. 6}$ M$_{1. 5-7}$ तथा (for यथा). — ^{d}) Da$_{4}$ देवी तत्र भवत्पुरा (cf. 12^{b}).

☞ Adhy. 12. 310. 10—12. 320 are repeated (adhy. 310-13 verbally and 314-20 in substance) in the Bṛhan-Nāradīya P., I 58. 2^{c}-62^{d}. The v. l. to the text accepted in the Crit. Ed. for the entire episode will be found in Appendix II No. 7.

11 ^{b}) B$_{8}$ (marg. as in text) कर्णिकारवनं प्रति; Da$_{4}$ °वनायुतेः; G$_{2}$ °वनेषु वै. — ^{d}) K$_{2. 4}$ भौमैर्; G$_{2}$ भूमौ; M$_{1. 5-7}$ भीमो (for भीमैर्). B$_{6}$ (marg. as in text) भूतशतैर् (for °गणैर्). G$_{2}$ नृप; M$_{7}$ वृतं (for वृतः).

12 ^{b}) B$_{8}$ (marg.) देशे (for देवी). M$_{1. 5-7}$ तदा (for पुरा). — ^{d}) K$_{6}$ Bo.$_{8}$ Dn$_{1. n4}$ Ds D$_{2. 3. 8}$ तदा ; B$_{6. 7. 9}$ Da$_{3}$ पुरा (for प्रभुः). Da$_{4}$ पुत्रार्थं कुरुसत्तम (= 13^{d}).

13 ^{a}) D$_{4}$ आदिश्य (for आविश्य). ❀ Cn : योगेनात्मानमाविश्य, अन्तर्हृदये इन्द्रियाणि निरुध्येत्यर्थः । ❀ — ^{b}) K$_{7}$ योगधर्मः; G$_{1}$ (*sup. lin.*) योगधर्मं (for योगधर्म-). — ^{d}) K$_{7}$ D$_{4. 5. 7. 9}$ राजसत्तम; V$_{1}$ B$_{6}$ (marg.). $_{8}$ मुनिसत्तमः (B$_{6}$ °म).

14 ^{a}) Ś$_{1}$ K$_{1. 2}$ तथा (for अपां). — ^{b}) K$_{7}$ V$_{1}$ Bo.$_{6. 7. 9}$ अंतरीक्षस्य. Ś$_{1}$ K$_{1. 2}$ चाभिभोः; K$_{2}$ $_{4}$ चाभितः; K$_{7}$ D$_{4. 9}$ चाप्ययं; V$_{1}$ Bo.$_{6-9}$ Da$_{3. a4}$ Dn$_{1}$ Ds D$_{2. 3. 8}$ वा विभो (Da$_{4}$ °भोः); Dn$_{4}$ चाधिभो; D$_{5}$ चांभसां; D$_{7}$ चाभयं; G$_{1}$ चाहिभो (for चाभिभो). — ^{c}) K$_{4. 6}$ Bo.$_{6-9}$ Da$_{3. a4}$ Dn$_{1. n4}$ Ds D$_{2. 3. 8}$ धैर्येण (for वीर्येण). Ś$_{1}$ K$_{1}$ G$_{1}$ M$_{6}$ संमतः (K$_{1}$ °ताः); K$_{2}$ संपतः (for संमितः). — ^{d}) K$_{2}$ V$_{1}$ Da$_{4}$ इति सह; Dn$_{4}$ Ds$_{1}$ इति स्म हे; T$_{2}$ इति स्म हा (for इति स्म ह).

15 ^{a}) K$_{2}$ सोमेण; K$_{6}$ Da$_{4}$ Dn$_{1. n4}$ Ds$_{2}$ D$_{2. 3. 8}$ योगेन; K$_{7}$ V$_{1}$ Bo.$_{8}$ T G$_{1-3. 6}$ मौनेन; M$_{1. 6. 7}$ सौतेन (for सोऽनेन). B$_{7}$ संकल्पे मानसोनेन. — ^{b}) K$_{7}$ D$_{4. 9}$ दुःप्रापेन. M$_{1. 6}$ कृतात्मभिः. K$_{6}$ V$_{1}$ Bo.$_{6-9}$ Da$_{3. a4}$ Dn$_{1. n4}$ Ds D$_{2. 3. 5. 7. 8}$ दुष्प्रापमकृतात्मभिः. — ^{c}) K$_{7}$ D$_{4. 5. 7. 9}$ पूजयामास; G$_{3}$ वार°; Ca (gloss : वरं प्रार्थयामास) वर° (as in text). — ^{d}) Dn$_{4}$ तपम् (for तप).

16 ^{a}) Da$_{4}$ आतिष्टन्. K$_{2}$ मारुतः हार (sic); Da$_{4}$ G$_{1}$ मारुताहारा (G$_{1}$ °र). — ^{b}) K$_{4. 6. 7}$ Da$_{4}$ समः (for समाः). — ^{c}) T$_{1}$ G$_{3. 6}$ समाराध्य (for आराधयन्). — ^{d}) D$_{5. 7}$ उमाधवं (for °पतिम्).

17 ^{a}) K$_{2}$ अत्र (for तत्र). — ^{b}) K$_{6}$ V$_{1}$ Bo.$_{6-9}$ Da$_{3. a4}$ Dn$_{1. n4}$ Ds D$_{2. 3. 8}$ राजर्षयश् (for देव°). G$_{2}$ च ये (for तथा). — D$_{7}$ om. (hapl.) 17^{c}-18^{d}. — ^{c}) K$_{1. 4}$ लोकपालश्. Ś$_{1}$ K$_{1. 2}$ लोकाश्च; G$_{2}$ लोकेश (for °शं). — K$_{2}$ om. 17^{d}-20^{a}. — ^{d}) B$_{9}$ वहुभिः (for वसुभिः).

18 K$_{2}$ D$_{7}$ om. 18 (cf. v. l. 17). K$_{4}$ om. 18^{c}-19^{b}. — ^{c}) K$_{6}$ V$_{1}$ Bo.$_{6-9}$ Da$_{3. a4}$ Dn$_{1. n4}$ Ds D$_{2. 3. 8}$

C. 12. 12176
B. 12. 324(3). 19
K. 12. 331. 19

अश्विनौ देवगन्धर्वास्तथा नारदपर्वतौ ।
विश्वावसुश्च गन्धर्वः सिद्धाश्चाप्सरसां गणाः ॥ १९
तत्र रुद्रो महादेवः कर्णिकारमयीं शुभाम् ।
धारयाणः स्रजं भाति ज्योत्स्नामिव निशाकरः ॥ २०
तस्मिन्दिव्ये वने रम्ये देवदेवर्षिसंकुले ।
आस्थितः परमं योगमृषिः पुत्रार्थमुद्यतः ॥ २१
न चास्य हीयते वर्णो न ग्लानिरुपजायते ।
त्रयाणामपि लोकानां तदद्भुतमिवाभवत् ॥ २२
जटाश्च तेजसा तस्य वैश्वानरशिखोपमाः ।
प्रज्वलन्त्यः स्म दृश्यन्ते युक्तस्यामिततेजसः ॥ २३
मार्कण्डेयो हि भगवानेतदाख्यातवान्मम ।
स देवचरितानीह कथयामास मे सदा ॥ २४
ता एताद्यापि कृष्णस्य तपसा तेन दीपिताः ।
अग्निवर्णा जटास्तात प्रकाशन्ते महात्मनः ॥ २५
एवंविधेन तपसा तस्य भक्त्या च भारत ।
महेश्वरः प्रसन्नात्मा चकार मनसा मतिम् ॥ २६
उवाच चैनं भगवांस्त्र्यम्बकः प्रहसन्निव ।
एवंविधस्ते तनयो द्वैपायन भविष्यति ॥ २७
यथा ह्यग्निर्यथा वायुर्यथा भूमिर्यथा जलम् ।
यथा च खं तथा शुद्धो भविष्यति सुतो महान् ॥ २८

वसवो; D5 मरुतौ (for मरुतो). K6 V1 Bo. 6–9 Da3 Dn1. n4 Ds D2. 3. 8 मरुतश्; K7 D4. 9 मारुताश्; Da4 भरतश्; D5 वसवश् (for मारुतश्). T G1–3. 6 M1. 6. 7 मारुतो मरुतश् (by transp.). — ^{d}) M1. 5–7 सरितः सागरास् (by transp.). K1 सागरः. G2 सुरभिस् (for सरितस्).

19 K2 om. 19 (cf. v. l. 17). K4 om. 19^{ab} (cf. v. l. 18). K7 D9 transp. 19^{b} and 19^{d}. — ^{c}) Da4 D5 M1. 7 गंधर्वाः. — ^{d}) Bo. 7. 8 (marg.) Da3. a4 Dn1. n4 Ds D2. 3. 8 अप्सरस्. Bo Dn1. n4 Ds D2. 3. 8 तथा (for गणाः).

20 K2 om. 20^{c} (cf. v. l. 17). — ^{a}) B9 ततो; D4 तव (for तत्र). D5 देवो (for रुद्रो). — ^{b}) G3 स्रजः (for शुभाम्). — ^{c}) Ś1 K1. 2. 4. 7 Da3. a4 Dn1. n4 Ds D2. 4. 8. 9 T G1–3. 6 धारयानः (K4 °याना; T1 G6 °यं च; G3 °यन्नः) (for °याणः). K7 सृजं (for स्रजं). — ^{d}) Ś1 K1. 2. 4 शरदि; K7 ज्योतिस्नाम् (sic) (for ज्योत्स्नाम्).

21 ^{a}) D9 दिव्य- (for दिव्ये). Da4 Dn4 वरे रम्ये; G2 मनोरम्ये (for वने रम्ये). — ^{b}) K1 देवे; K4 Da3 lacuna (for देव-). — ^{d}) K2 उदितः; K6 V1 Bo. 6–9 Da3. a4 Dn4 Ds D2. 3. 5. 8 M1. 5–7 अच्युतः; Dn1 T1 G2. 3. 6 अच्युत; D4 उष्टतः (sic); D9 उद्यत; T2 G1 अप्युत (for उद्यतः).

22 ^{a}) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 प्राणो; D7 वर्णं; G2 वक्त्रं (for वर्णो). — ^{b}) T1 G3. 6 न विरूपं हि जायते. — ^{c}) G1 सदुष्टाम् (for त्रयाणाम्).

23 ^{a}) D5. 7 G3 प्रजाश्; M7 जटां (for जटाश्). — ^{b}) D5. 7 -शिखोपमं. — ^{c}) Bo T1 G1. 3. 6 प्रज्वलंतः. — ^{d}) D5. 7 मुक्तस्य (for यु°). Bo. 8 (marg.) Dn1. n4 Ds D2 -तेजसा (for -तेजसः).

24 ^{a}) K1 मार्कंडिये (sic); K2 मार्कांडेयो. D5. 7 [ऽ]पि (for हि). — ^{c}) B7 तदेव (for स देव-). — ^{d}) Ds सर्वदा; T1 G3. 6 मे तथा; T2 G1. 2 M1. 5–7 मे तदा (for मे सदा).

25 ^{a}) Ś1 K1. 2. 4 तावत्ताद्यापि; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 T2 G1 एता अद्या(B8 °स्या)पि; D5. 7 त एवाद्यापि; T1 G3. 6 अतोद्यापि च (for ता एताद्यापि). D5. 7 कृत्स्नस्य (for कृष्णस्य). — ^{b}) T2 G1. 2 M1. 5–7 तेजसा (for तपसा). V1 B8 (marg.) तत्र (for तेन). K7 दीपिता; G2 पीडिताः (for दीपिताः). — ^{c}) K1. 7 अग्निवर्ण-. D5. 7 द्विपास् (for जटास्). — ^{d}) Bo प्रकाशंति.

26 ^{a}) Da3 एवंविद्येन (for एवंविधेन). — ^{c}) Da4 महेश्वर-. — ^{d}) D7 T G1. 3. 6 मतिमान् (for मनसा). Da4 मतिः; Ds2 (by corr.) D3 गतिं (for मतिम्). — After 26, G2 M1. 5–7 Kumbh. ed. ins.:

789* ततस्तस्य महादेवो दर्शयामास साम्बिकः ।

27 Before 27, B8. 9 ins. महेश्वर उवाच. — ^{a}) K4 Da4 Dn4 Ds1 D2. 3. 8 चैवं; D5 [ए]नं च (by transp.). — ^{c}) ❀ Cv: एवंविधः, यथा अहमेवंविधः। ❀

28 ^{a}) B7 यदा; Da3. a4 यः स (for यथा). Da4 तु; G2 [अ]पि (for हि). — ^{b}) K6 वायुर् (for भूमिर्). — ^{c}) K6 Da3. a4 जलं यथा (by transp.).

तद्भावभावी तद्बुद्धिस्तदात्मा तदपाश्रयः ।
तेजसावृत्य लोकांस्त्रीन्यशः प्राप्स्यति केवलम् ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि दशाधिकत्रिशततमोऽध्यायः ॥ ३१० ॥

३११

भीष्म उवाच ।
स लब्ध्वा परमं देवाद्वरं सत्यवतीसुतः ।
अरणीं त्वथ संगृह्य ममन्थाग्निचिकीर्षया ॥ १
अथ रूपं परं राजन्बिभ्रतीं स्वेन तेजसा ।
घृताचीं नामाप्सरसमपश्यद्भगवानृषिः ॥ २
ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः ।
अभवद्भगवान्व्यासो वने तस्मिन्युधिष्ठिर ॥ ३
सा च कृत्वा तदा व्यासं कामसंविग्नमानसम् ।
शुकी भूत्वा महाराज घृताची समुपागमत् ॥ ४
स तामप्सरसं दृष्ट्वा रूपेणान्येन संवृताम् ।
शरीरजेनानुगतः सर्वगात्रातिगेन ह ॥ ५
स तु धैर्येण महता निगृह्णन्हृच्छयं मुनिः ।

C. 12. 12192
B. 12. 325[4]. 6
K. 12. 332. 6

K_7 $D_{4.5.9}$ खं च (by transp.); D_7 T $G_{1-3.6}$ $M_{1.5-7}$ [आ]काशस् (G_1 °शं). D_5 यथा (for तथा). T_1 $G_{3.6}$ ऊर्ध्वं (for शुद्धो). — ^{d}) K_6 V_1 $B_{0.6-9}$ $D_{a3.a4}$ $D_{n1.n4}$ D_s $D_{2.3.8}$ भविता ते (for भविष्यति). K_7 $D_{4.5.9}$ तव (for महान्).

29 ^{a}) D_{s1} $D_{5.7}$ G_2 -भाविता (for भावी तद्-). K_7 तच्छुद्धिस् (for तद्बु°). ❀ Cn : तद्भावभावी, तद्भावं, ब्रह्म अहमिति भावं, आशयं भावयतीति तद्भावभावी । ❀ — ^{b}) $Ś_1$ $K_{1.2.4}$ तथात्मा (for तदा°). K_6 V_1 B_8 (marg.).$_9$ $D_{a3.a4}$ D_9 तद्बु(V_1 °द्ध्य)पाश्रयः (for तदपा°). — ^{c}) $Ś_1$ $K_{1.2.4}$ तस्य (for [आ]वृत्य). K_6 om. त्रीन्. — ^{d}) $Ś_1$ $K_{1.2.4}$ $D_{5.7}$ T_1 $G_{3.6}$ प्राप्स्यसि. K_6 V_1 $B_{0.6-9}$ $D_{a3.a4}$ $D_{n1.n4}$ D_s $D_{2.3.8}$ ते सुतः (for केवलम्).

Colophon. D_6 missing: $K_{3.5}$ B_{1-5} $D_{a1.a2}$ $D_{n2.n3}$ D_1 $G_{4.5}$ M_{2-4} absent. — *Sub-parvan :* $Ś_1$ $K_{1.2.4.6.7}$ V_1 $B_{0.6-9}$ $D_{a3.a4}$ $D_{n1.n4}$ D_s $D_{2-5.7-9}$ T $G_{1-3.6}$ $M_{1.5-7}$ मोक्षधर्म. -- *Adhy. name :* $Ś_1$ $K_{1.2.4.6}$ V_1 $B_{0.6.7.9}$ $D_{a3.a4}$ D_{n1} D_s $D_{2.3.7.8}$ T_1 G_6 $M_{1.5-7}$ शुकोत्पत्तिः ; K_7 B_8 $D_{4.5.9}$ शुकोत्पत्तौ व्यासवरप्राप्तिः (B_8 °लम्भः). — *Adhy. no.* (figures, words or both) : K_6 48 ; B_6 140 ; B_7 G_3 146 ; B_8 250 ; D_{n1} 149 ; D_{n4} D_{s2} 147 ; D_{s1} D_s G_1 $M_{1.6.7}$ 144 ; T_1 G_6 145 ; T_2 158 ; G_2 161 ; M_5 181.

311

☞ This adhy. is missing in D_6 (cf. v. l. 12. 283. 15).

1 ^{a}) D_{a4} स लब्धा ; D_7 T_1 $G_{3.6}$ लब्धवान्. M_5 वरदाद् (for परमं). — ^{b}) D_{s1} स्वरं (for वरं). — ^{c}) V_1 B_3 (orig.) स ततो : B_6 (orig.).$_{7.8}$ (marg.) $D_{a3.a4}$ D_s रहिते ; B_9 D_7 T $G_{1.3.6}$ तु ततो (for त्वथ सं-). $K_{4.7}$ B_0 $D_{n1.n4}$ D_s $D_{1-4.8.9}$ G_2 $M_{1.5-7}$ अरणी सहिते (K_7 सहिता ; $D_{4.9}$ G_2 $M_{1.5-7}$ सहितं) गृह्य ; K_6 °णीव हि ते गृह्य. ❀ Cn : अरणी द्वे अधरोत्तरे सहिते मिथुनरूपे । ❀

2 ^{a}) K_7 रूप- (for रूपं). — ^{b}) K_7 $D_{4.5.7.9}$ T_1 $G_{3.6}$ $M_{1.6.7}$ बिभ्रती ; D_{n4} बिभ्रंति (for बिभ्रतीं). — ^{c}) K_7 D_{a4} $D_{4.5.9}$ G_3 घृताची- (D_{a4} °चि-). — ^{d}) $Ś_1$ $K_{1.2.4}$ ददर्श ; G_1 अपश्यन् (for °श्यद्). V_1 अपश्यन्स महानृषिः ; D_7 पश्यन्स भगवानृषिः.

3 D_{a4} reads 3^{ab} twice. — ^{a}) K_1 -अप्सरसां. D_{a4} (both times) ऋषिमप्सरसं दृष्ट्वा (sic).

4 ^{a}) K_6 V_1 $B_{0.6-9}$ $D_{a3.a4}$ $D_{n1.n4}$ D_s $D_{2.3.5.8}$ G_2 दृष्ट्वा (for कृत्वा). — ^{b}) D_{a3} lacuna ; D_4 कामं (for काम-). $Ś_1$ K_1 -संविघ्न- (for -संविग्न-). D_7 -तेजसं (for -मानसम्). — ^{c}) B_3 (marg.) स्तुकी (sic) ; D_{a4} पुकाद् (sic) (for शुकी). D_5 $G_{1.3}$ -भूता (for भूत्वा). — ^{d}) D_7 T_1 $G_{3.6}$ घृताची सत्वरागमत् ; T_2 G_1 °च्यस्तमुपागमत् ; M_6 °ची समवागमत्.

5 ^{a}) M_7 तम् (for ताम्). K_2 अप्सरसां. — ^{b}) K_2 $D_{a3.a4}$ रूपेन (for °ण). G_2 [आ]येन (for [अ]न्येन). — ^{c}) B_0 शरीरयेन (for °जेन). V_1 D_7 [अ]नुगतां ; $M_{1.6.7}$ °गतं (for °गतः). K_1 शरीरजीतानुरतः (sic). — ^{d}) G_3 $M_{1.7}$ -गात्रादि- (for -गात्राति-).

C. 12. 12192
B. 12. 325[4]. 6
K. 12. 332. 6

न शशाक नियन्तुं तद्व्यासः प्रविसृतं मनः ।
भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतः ॥ ६
यत्नान्नियच्छतस्तस्य मुनेरग्निचिकीर्षया ।
अरण्यामेव सहसा तस्य शुक्रमवापतत् ॥ ७
सोऽविशङ्केन मनसा तथैव द्विजसत्तमः ।
अरणीं ममन्थ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृप ॥ ८
शुक्रे निर्मथ्यमाने तु शुको जज्ञे महातपाः ।
परमर्षिर्महायोगी अरणीगर्भसंभवः ॥ ९
यथाध्वरे समिद्धोऽग्निर्भाति हव्यमुपात्तवान् ।
तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा ॥ १०
बिभ्रत्पितुश्च कौरव्य रूपवर्णमनुत्तमम् ।
बभौ तदा भावितात्मा विधूमोऽग्निरिव ज्वलन् ॥ ११
तं गङ्गा सरितां श्रेष्ठा मेरुपृष्ठे जनेश्वर ।
स्वरूपिणी तदाभ्येत्य स्नापयामास वारिणा ॥ १२
अन्तरिक्षाच्च कौरव्य दण्डः कृष्णाजिनं च ह ।
पपात भुवि राजेन्द्र शुकस्यार्थे महात्मनः ॥ १३

$D_{4.5.7.9}$ च (for ह).

6 ^{a}) $Bo_{6.7}$ वीर्येण; Da_{4} धुर्येण (for धैर्येण). — ^{b}) $K_{6.7}$ निगृह्णा(K_{7} °ह्ण)न्; $Da_{3.a4}$ न्यगृह्णाद्; G_{2} अगृह्णाद् (for निगृह्णन्). Bo हृदयं (for हृच्छयं). Ds_{1} निगृह्य मनसा मुनिः. — ^{c}) $Ś_{1}$ $K_{1.2.4}$ D_{5} T $G_{1.3.6}$ तं; D_{7} तां (for तद्). — ^{d}) K_{4} प्रविसृक्षं; K_{6} B_{6} परिसृतं; G_{2} संप्रसृतं (for प्रवि°). B_{8} (marg. as in text) व्यासः प्रसृतमानसः. — ^{e}) K_{1} भवित्वाच्; T G_{1-3} भावितात् (for °त्वाच्). $Ś_{1}$ K_{7} B_{6} (marg. as in text) $D_{4.5.9}$ भाव्यस्य (for भावस्य). — ^{f}) D_{2} वपुशा. V_{1} Bo कृतः; Ds_{1} D_{2} हतः; D_{7} भृतः; D_{9} G_{1} M_{5} हृतं; $M_{1.7}$ धृतं (for हृतः). T_{1} G_{6} घृताच्यां पुरुषो भृतः.

7 ^{a}) $Ś_{1}$ $K_{1.2}$ यत्नान्नियच्छता तत्तु. — ^{b}) K_{6} Da_{4} G_{2} पुनरग्नि-; Ds_{2} मुनिरग्नि-; $D_{5.7}$ मुनिस्तस्य; $M_{1.5-7}$ मन्नतोऽग्नि- (for मुनेरग्नि-). — ^{c}) K_{1} अरण्यम्; Da_{4} आरण्याम् (for अर°). — K_{7} repeats 7^{d} after 8^{a}. — ^{d}) D_{7} T_{1} G_{1} तत्र (for तस्य). D_{7} T $G_{2.3.6}$ शुक्लम् (for शुक्रम्).

8 ^{a}) $M_{1.7}$ महता (for मनसा). — After 8^{a}, K_{7} repeats 7^{d}. — ^{b}) T_{2} तस्यैव (for तथैव). Dn_{4} -सत्तम; D_{8} -सत्तमं. — ^{c}) $Da_{3.a4}$ Dn_{4} $D_{2.8}$ T_{2} M_{1} अरणी (for °णीं). K_{6} V_{1} $B_{3.7}$ $Da_{3.a4}$ विप्रर्षिस्; G_{3} महर्षिस् (for ब्रह्म°). K_{7} $D_{4.5.7.9}$ ममंथारणिमेवाथ. — ^{d}) K_{7} तस्या; G_{2} तस्माज्; M_{7} तस्य (for तस्यां). D_{7} G_{3} गुरोद् (for शुको). Bo नृपः.

9 ^{a}) D_{7} T $G_{1.3.6}$ $M_{1.5-7}$ शुक्ले (for शुक्रे). K_{2} निमथ्यमाने. K_{7} $Bo_{.8}$ Da_{4} Dn_{1} Ds_{1} $D_{2-4.8.9}$ T $G_{1.3.6}$ M_{5} स; Ds_{2} न; D_{7} हि; $M_{1.6.7}$ च (for तु). G_{2} निर्मथ्यमानेन च स. — D_{8} om. 9^{b}–10^{c}. — ^{b}) Da_{4} शुक्को (for शुको). K_{4} यज्ञे (for जज्ञे). G_{1} महातपः.

10 D_{8} om. 10^{abc} (cf. v. l. 9). — ^{a}) $Ś_{1}$ $K_{1.2.4}$ यथैव हि; $M_{1.7}$ यथाध्वरेत्. K_{6} B_{7} समृद्धो; Da_{3} समीद्धो; D_{5} समिद्धे. — ^{b}) D_{7} हुता; G_{3} हुतं (for भाति). K_{6} V_{1} B_{7} Ds D_{2} उदा(V_{1} B_{7} °पा)हरन्; K_{7} $D_{4.9}$ उपाददत्; $Bo_{.6.8}$ (marg.).$_{9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_{8} उदा(B_{8} [orig.] °पा)वहन्; D_{5} उपेयिवान्; T_{2} अवाप्तवान् (for उपात्त°). G_{2} भाति हव्यमुखात्तदा. — ^{c}) K_{2} D_{1} यथारूपः (for तथा°). Bo यज्ञे; B_{8} (marg.) भाति (for जज्ञे). — ^{d}) K_{7} प्रज्वालन्.

11 ^{a}) $Ś_{1}$ $K_{1.2.4}$ चित्रं (for पितुश्). — ^{b}) K_{2} रूपवर्णाम्; V_{1} D_{7} T_{1} $G_{2.6}$ रूपं वर्णम्. — ^{c}) D_{4} om. (hapl.) from भाविता up to तदा (in 12^{c}). — ^{d}) G_{2} $M_{1.5-7}$ [उ]त्थितः (for ज्वलन्). K_{6} V_{1} $Bo_{.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.8}$ विधूम इव पावकः.

12 D_{4} om. up to तदा (cf. v. l. 11). — ^{a}) K_{1} गंगां. D_{7} सरितः (for °तां). — ^{b}) D_{5} मेरुशृंगे (for °पृष्ठे). Bo Da_{4} जनेश्वरः; Dn_{4} नरेश्वर; G_{1} मुने° (for जने°). — ^{c}) K_{6} सुरूपिणी. D_{7} श्रेष्ठ; T_{1} $G_{3.6}$ श्रेष्ठं (for [अ]भ्येत्य). — ^{d}) $K_{2.4}$ $B_{6.7}$ $Da_{3.a4}$ Ds_{1} $D_{2.5.8}$ स्नपयामास; B_{9} Dn_{1} Ds_{2} D_{3} तर्प°; Dn_{4} स्तपसा° (for स्नापया°). Da_{4} वारिणी.

13 ^{a}) K_{1} अंतरिक्षं; K_{7} V_{1} $Bo_{.7-9}$ °रीक्षाच्. D_{5} गगनाच्च महाराज. — ^{b}) $K_{1.2}$ Da_{4} दंड-; M_{7} दंडं (for दण्डः). $Ś_{1}$ $K_{1.2}$ महत्; K_{7} B_{8} (marg. as in text) तदा; Da_{4} स ह; $D_{4.5.9}$ तथा; T_{2} च सा (for च ह). — ^{c}) $K_{6.7}$ $Bo_{.6.7.8}$ (marg.).$_{9}$ $Da_{3.a4}$ $Dn_{1.n4}$ Ds $D_{2.3.8}$ भूमिं; B_{3} (orig.) भूमौ (for भुवि).

14 ^{a}) K_{2} जेगीयंती; K_{7} $M_{1.7}$ जैगीयंते; Da_{4} योगी°; D_{7} G_{3} गेगी°; G_{1} खे गी°; G_{2} जगी° (for

जेगीयन्ते स्म गन्धर्वा ननृतुश्चाप्सरोगणाः ।
देवदुन्दुभयश्चैव प्रावाद्यन्त महास्वनाः ॥ १४
विश्वावसुश्च गन्धर्वस्तथा तुम्बुरुनारदौ ।
हाहाहूहू च गन्धर्वौ तुष्टुवुः शुकसंभवम् ॥ १५
तत्र शक्रपुरोगाश्च लोकपालाः समागताः ।
देवा देवर्षयश्चैव तथा ब्रह्मर्षयोऽपि च ॥ १६
दिव्यानि सर्वपुष्पाणि प्रववर्षात्र मारुतः ।
जङ्गमं स्थावरं चैव प्रहृष्टमभवज्जगत् ॥ १७
तं महात्मा स्वयं प्रीत्या देव्या सह महाद्युतिः ।
जातमात्रं मुनेः पुत्रं विधिनोपानयत्तदा ॥ १८
तस्य देवेश्वरः शक्रो दिव्यमद्भुतदर्शनम् ।
ददौ कमण्डलुं प्रीत्या देववासांसि चाभिभो ॥ १९
हंसाश्च शतपत्राश्च सारसाश्च सहस्रशः ।
प्रदक्षिणमवर्तन्त शुकाश्चाषाश्च भारत ॥ २०
आरणेयस्तथा दिव्यं प्राप्य जन्म महाद्युतिः ।
तत्रैवोवास मेधावी व्रतचारी समाहितः ॥ २१
उत्पन्नमात्रं तं वेदाः सरहस्याः ससंग्रहाः ।
उपतस्थुर्महाराज यथास्य पितरं तथा ॥ २२
बृहस्पतिं तु वव्रे स वेदवेदाङ्गभाष्यवित् ।
उपाध्यायं महाराज धर्ममेवानुचिन्तयन् ॥ २३

C. 12. 12210
B. 12. 325[4]. 24
K. 12. 332. 23

जेगी°). K1 स्म; K6 V1 B9 Da3. a4 Ds च (for स्म). — ^{c}) Ś1 K1. 2 देवैर् (for देव-). K3 -द्वंद्वभयश् (for -दुन्दु°). — ^{d}) K1. 2 V1 T2 G1 प्रव.द्यंत; K7 Ds1 प्रावाद्यंते. K7 महास्वना; Da4 °स्वनां; D7 T G1–3. 6 M1. 5–7 सहस्रशः (for महास्वनाः).

15 ^{a}) Da1 गंधर्वास्. — ^{b}) K3 Dn4 तुंबुर; K6 Dn1 D9 तुंबरु; Da4 D4 तुंबर- (for तुम्बुरु-). D7 T2 G1. 3 तथा नारदपर्वतौ. — ^{c}) K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 7. 8 T G1–3. 6 हाहाहू(Da4 Ds1 °हु)हूश्; K7 D4. 9 °हूह्वौ (for °हूहू). D7 गंधर्वस्; T1 G3. 6 °र्वास् (for °र्वौ). — ^{d}) B9 तुंबुरुः (for तुष्टुवुः).

16 ^{a}) D7 T1 G1–3. 6 ततः (for तत्र). K3 D4 T2 G3 M1 शुक्र- (for शक्र-). — ^{d}) K6 Da4 [ऽ]पि वा; D3 (marg.) विदुः (for ऽपि च).

17 ^{a}) K7 D9 दिव्यानि पुष्पवर्षाणि. — ^{b}) K6 V1 B0. 6–9 Da3. a4 Dn1 Ds D2. 3. 8 च (for [अ]त्र). Dn4 प्रवर्षंय च मारुतः; T1 G3. 6 ववर्षात्र च मा°. — ^{c}) T1 जंगमः. K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 जंगमाजंगमं चैव; D7 जंगमः स्थावरश्चैव; G2. 3 °मस्थावरं चैव.

18 ^{a}) ❀ Cn: महात्मा, महादेवः । ❀ — ^{c}) Da4 lacuna; Dn4 जातमात्र- (for °मात्रं). K6 om. पुत्रं. — ^{d}) G1 M7 विधिनोपनयत्तथा. ❀ Cn: उपानयत्, स्वशिष्यं कृतवान् । ❀

19 ^{c}) K1 कमंडलं; K2 °डुलं; Da4 °डलौ; Dn4 °डलु (for कमण्डलुं). — ^{d}) Ś1 K1. 2 T1 G2. 3. 6 देवा; D5 दिव्यं (for देव-). Ś1 K1. 2. 4 चाभितः; B0. 6–9 Da3 Dn1. n4 Ds D2. 3. 5 वा विभो; Da4 D4 वा विभोः; D7 चावुभौ; D8 चा विभौ; D9 चाभिभोः (for °भो).

20 ^{a}) D5 शित- (for शत-). — D2 om. 20^{c}–21^{b}. — ^{c}) D7 T G1. 3. 6 अकुर्वंत; G2 प्रकुर्वंत (for अवर्तन्त). — ^{d}) B0. 8 चासाश्; Da4 चाश्वश्; M1. 7 चाषश् (for चाषाश्). G2 भाषते (for भारत). G3 शक्राश्चक्राश्च भारत.

21 D2 om. 21^{ab} (cf. v. l. 20). — ^{a}) K7 D3 D4. 5. 9 आरणेयं: Da4 °ण्येयस् (for °णेयस्). Ś1 K1. 2 D5. 7 तदा; K4. 6 V1 B0. 6–9 Da3. a4 Dn1 Ds D3. 8 ततो (for तथा). G1 दिव्या (for दिव्यं). Dn4 आरणोपस्ततो दिव्यं. — ^{b}) Ś1 K1. 2. 7 D4. 5. 9 महामुनिः (for °द्युतिः). — ^{c}) Da4 अत्र (for तत्र). — ^{d}) K6 B6 Ds D7 T1 G3. 6 ब्रह्मचारी; G2 विवृतश्च; M1. 5–7 व्रतधारी (for °चारी).

22 ^{a}) Da4 -मात्रे (for -मात्रं). K7 G1 तं वेदा; B6 Ds1 वेदास्तं (by transp.); Dn4 च वेदाः; Ds2 देवास्तं. — ^{c}) Da4 महाराजः; G1 °राजा. — ^{d}) D7 यथा स्वे; T2 G1. 3 यथा स्व- (for यथास्य). B8 G3 पितरस्.

23 ^{a}) T1 G2. 3 बृहस्पतिस् (for °स्पतिं). Ś1 K1. 2 स; K4. 6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 च (for तु). ❀ Cn: स्वयं भातवेदोऽपि शिष्टाचारपालनार्थं बृहस्पतिं गुरुं चकार । ❀ — ^{b}) K7 D4. 9 -भाष्यकृत्; V1 -भाष्यवान् (for °वित्). — ^{d}) Da3. a4 अन्व- (for अनु-). Ś1 K1. 2 धर्ममेवान्वचिंतयत्; D4 धर्मेवानुविचिंतयन्.

C. 12. 12210
B. 12. 325(4). 24
K. 12. 332. 24

सोऽधीत्य वेदानखिलान्सरहस्यान्ससंग्रहान् ।
इतिहासं च कार्त्स्न्येन राजशास्त्राणि चाभिभो ॥ २४
गुरवे दक्षिणां दत्त्वा समावृत्तो महामुनिः ।
उग्रं तपः समारेभे ब्रह्मचारी समाहितः ॥ २५

देवतानामृषीणां च बाल्येऽपि स महातपाः ।
संमन्त्रणीयो मान्यश्च ज्ञानेन तपसा तथा ॥ २६
न त्वस्य रमते बुद्धिराश्रमेषु नराधिप ।
त्रिषु गार्हस्थ्यमूलेषु मोक्षधर्मानुदर्शिनः ॥ २७

इति श्रीमहाभारते शान्तिपर्वणि एकादशाधिकत्रिशततमोऽध्यायः ॥ ३११ ॥

३१२

भीष्म उवाच ।
स मोक्षमनुचिन्त्यैव शुकः पितरमभ्यगात् ।
प्राहाभिवाद्य च गुरुं श्रेयोर्थी विनयान्वितः ॥ १

मोक्षधर्मेषु कुशलो भगवान्प्रब्रवीतु मे ।
यथा मे मनसः शान्तिः परमा संभवेत्प्रभो ॥ २
श्रुत्वा पुत्रस्य वचनं परमर्षिरुवाच तम् ।

---

24 ^{a}) K$_{6, 7}$ V$_1$ B$_{0, 6-9}$ D$_{a3, a4}$ D$_{n1}$ D$_{s}$ D$_{2-5, 7-9}$ T G$_{1-3, 6}$ सोधीत्य निखि(K$_7$ D$_{4, 9}$ सखि·; D$_{5, 7}$ T G$_{1, 3, 6}$ चाखि·; G$_2$ सक)लान्वेदान्. — ^{b}) D$_5$ ससंत्रकान् (for ससंग्रहान्). — ^{c}) D$_{a4}$ D$_{n4}$ D$_{s1}$ D$_4$ कार्त्स्नेन (for कार्त्स्न्येन). G$_2$ इतिहासांश्च शास्त्राणि. — ^{d}) Ś$_1$ K$_{1, 2, 4}$ V$_1$ D$_3$ वेद-; K$_7$ D$_{4, 5, 7, 9}$ T G$_{1, 3, 6}$ धर्म- (for राज-). D$_5$ -शास्त्रं च (for -शास्त्राणि). Ś$_1$ K$_{1, 2, 4}$ चाभितः; V$_1$ B$_{0, 6-9}$ D$_{a3, a4}$ D$_{n1, n4}$ D$_{s}$ D$_{2, 3, 5, 7, 8}$ वा विभो; D$_9$ चाभिभोः (for चाभिभो).

25 ^{b}) K$_1$ समावृत्तौ. B$_8$ (marg.) महामतिः; G$_2$ °द्युतिः (for °मुनिः). — ^{c}) D$_{n4}$ दुर्गं (for उग्रं). D$_{a3, a4}$ स आरेभे (for समारेभे).

26 ^{a}) G$_2$ देवानां च (for देवतानाम्). — ^{b}) D$_7$ T G$_{1, 3, 6}$ च; G$_2$ स (for ऽपि). Ś$_1$ K$_{1, 2, 4, 7}$ D$_{4, 9}$ G$_2$ सु- (for स). — ^{c}) K$_{1, 2, 6}$ D$_{5, 7}$ T$_1$ G$_6$ स मंत्रणीयो; K$_7$ D$_{4, 9}$ संपूजनीयो; D$_{n1, n4}$ D$_{s1}$ सन्मंत्रणीयो; C$_a$ (gloss: गौरवेण संभावनीयः) संमन्त्र° (as in text). K$_{2, 4}$ जन्यश्च; T G$_{1, 3, 6}$ भृत्यश्च (for मान्यश्च). G$_2$ सोद्वितीयो हि मान्यश्च. — ^{d}) G$_2$ तदा (for तथा).

27 ^{b}) D$_{a4}$ नराधिपः. — ^{c}) B$_6$ (marg. as in text) [अ]गार्हस्थ्य-; D$_{s1}$ गार्हस्थ- (for गार्हस्थ्य-). — ^{d}) K$_7$ -धर्मेषु; B$_8$ D$_{s2}$ -धर्मार्थ- (for -धर्मानु-).

Colophon. D$_6$ missing: K$_{3, 5}$ B$_{1-5}$ D$_{a1, a2}$ D$_{n2, n3}$ D$_1$ G$_{4, 5}$ M$_{2-4}$ absent. — *Sub-parvan:* Ś$_1$ K$_{1, 2, 4, 6, 7}$ V$_1$ B$_{0, 6-9}$ D$_{a3, a4}$ D$_{n1, n4}$ D$_{s}$ D$_{2, 4, 5, 7-9}$ T G$_{1-3, 6}$ M$_{1, 5-7}$ मोक्षधर्म. — *Adhy. name:* Ś$_1$ K$_{1, 2, 4, 6}$ V$_1$ B$_{0, 6-9}$ D$_{a3, a4}$ D$_{n1}$ D$_{s}$ D$_{2, 3, 8}$ M$_{1, 5-7}$ शुकोत्पत्तिः; K$_7$ D$_{4, 9}$ शुकजन्म; D$_5$ शुकजनकसंवादः; T$_1$ G$_6$ शुकजनक(G$_6$ °न)कथनं. — *Adhy. no.* (figures, words or both): K$_6$ 49; B$_7$ G$_3$ 147; B$_8$ 151; D$_{n1}$ 150; D$_{n4}$ D$_{s2}$ 148; D$_{s1}$ G$_1$ 145; D$_8$ T$_1$ G$_6$ 146; T$_2$ 159; G$_2$ 162; M$_{1, 6, 7}$ 140; M$_5$ 182. — *Śloka no.:* D$_{a4}$ 25; D$_{n1}$ 27; D$_{n4}$ 28; D$_{s1}$ 24; D$_8$ 26.

312

☞ This adhy. is missing in D$_3$ (cf. v. l. 12. 283. 15).

1 T$_1$ om. the ref. — ^{a}) K$_7$ D$_4$ अनुचिंत्येव. — ^{b}) D$_{s}$ अन्वगात् (for अभ्य°). — ^{c}) M$_{1, 5-7}$ आह (for प्राह). B$_9$ D$_{s1}$ [अ]भिवंद्य (for °वाद्य). Ś$_1$ K$_{1, 2}$ च शुकः; B$_8$ पितरं (for च गुरुं). — ^{d}) K$_7$ V$_1$ B$_6$ (marg.) D$_{5, 9}$ विनयानतः (for °न्वितः).

2 Before 2, B$_{7, 9}$ ins. शुक उवाच. — ^{c}) K$_7$ B$_{6, 7, 9}$ D$_{a3, a4}$ येन; G$_2$ यया (for यथा). K$_1$ मनसा. — ^{d}) Ś$_1$ K$_{1, 2, 4}$ मुने; D$_{a4}$ प्रभोः.

3 ^{a}) K$_{6, 7}$ B$_{0, 6-9}$ D$_{a3, a4}$ D$_{n1, n4}$ D$_{s}$ D$_{2-6, 8, 9}$ M$_{1, 5-7}$ तु (K$_6$ च) वचः (for वचनं). — ^{b}) V$_1$ B$_{7, 8}$ (marg.), $_{9}$ D$_{a3, a4}$ D$_5$ ह (for तम्). — Before

अधीष्व पुत्र मोक्षं वै धर्मांश्च विविधानपि ॥ ३
पितुर्नियोगाज्जग्राह शुको ब्रह्मविदां वरः ।
योगशास्त्रं च निखिलं कापिलं चैव भारत ॥ ४
स तं ब्राह्म्या श्रिया युक्तं ब्रह्मतुल्यपराक्रमम् ।
मेने पुत्रं यदा व्यासो मोक्षविद्याविशारदम् ॥ ५
उवाच गच्छेति तदा जनकं मिथिलेश्वरम् ।
स ते वक्ष्यति मोक्षार्थं निखिलेन विशेषतः ॥ ६
पितुर्नियोगादगमन्मैथिलं जनकं नृपम् ।
प्रष्टुं धर्मस्य निष्ठां वै मोक्षस्य च परायणम् ॥ ७
उक्तश्च मानुषेण त्वं पथा गच्छेत्यविस्मितः ।
न प्रभावेण गन्तव्यमन्तरिक्षचरेण वै ॥ ८
आर्जवेणैव गन्तव्यं न सुखान्वेषिणा पथा ।
नान्वेष्टव्या विशेषास्तु विशेषा हि प्रसङ्गिनः ॥ ९
अहंकारो न कर्तव्यो याज्ये तस्मिन्नराधिपे ।
स्थातव्यं च वशे तस्य स ते छेत्स्यति संशयम् ॥ १०
स धर्मकुशलो राजा मोक्षशास्त्रविशारदः ।
याज्यो मम स यद्ब्रूयात्तत्कार्यमविशङ्कया ॥ ११
एवमुक्तः स धर्मात्मा जगाम मिथिलां मुनिः ।

C. 12. 12226
B. 12. 326[5]. 12
K. 12. 333. 12

3cd, B8 ins. व्यास उवाच. — c) D7 T1 G1.3.6 M1.5–7 अधीहि; T2 अथ हे (for अधीष्व). Ds2 पुत्रं; D6 पुत्रो (for पुत्र). — d) K2 धर्मांश्च; Da4 धर्मौ.

4 Before 4, B6.8.9 ins. भीष्म उवाच. — a) Ś1 K1.2 निदेशाज् (for नियोगाज्). — b) K6 B8 (marg.).9 Da4 M1.5–7 धर्मविदां; V1 Bo.6.7.8 (orig.) Da3 Dn1.n4 Ds D2.3.8 धर्मभृतां; D7 T G1–3.6 वेदविदां (for ब्रह्म°). — c) D7 G2.6 -शास्त्रेण; T1 -शास्त्रे च (for -शास्त्रं च). Da4 निखिले (for °लं). — d) D5 कपिलं.

5 a) K1 सुतं (for स तं). K6 B6.8 (marg.).9 Da3.a4 ब्रह्म-; V1 ब्रह्मया (for ब्राह्मया). B7 स तं ब्रह्माश्रिता युक्तं. — c) D5 पुत्रो (for पुत्रं). K2 यथा (for यदा). — d) Ś1 K1.2 -शास्त्र-; K4.7 Bo.6.8 (marg. as in text) Da3 Dn1.n4 Ds D2.3.8 -धर्म- (for -विद्या-). M1.6.7 -विशारदः (for °रदम्).

6 b) K7 मैथिलेश्वरं; Da4 मिथिलेश्वरः. — Ś1 K1.2 om. (? hapl.) 6c–7b. — c) K7 वक्षति. K6 मोक्षार्थे (for °र्थं). — d) K7 D4.5.9 अखिलेन (for निखि°). Bo.8 Dn1.n4 Ds D2.3.8 निखिलं मिथिलेश्वरः.

7 Ś1 K1.2 om. 7ab (cf. v. l. 6). Before 7, B8.9 ins. भीष्म उवाच. — a) K6 B7.9 Da3.a4 D5 पितुर्नियोगं ज(B7 D5 °गाज्ज)ग्राह; Bo.6 (marg. as in text).8 Dn1.n4 Ds D2.3.8 पितुर्नियोगमादाय (Bo °स्थाय; Ds1 °साद्य). — b) D7 G3 जगतां; G2 जगदां (for जनकं). K4.7 V1 D4.9 जनकं मि(K4 V1 मै)थिलं नृपं (K4 D4 °प); K6 B6.9 D5 शुको धर्मविदां वरः (K6 °र); Bo.8 Dn1.n4 Ds D2.3.8 जगाम मिथिलां नृप (Ds D8 °पं); B7 Da3.a4 शुको धर्मभृतां वरः. — c) D5.7 प्रष्टुं धर्मवरिष्ठं वै.

8 a) D5.7 T1 उक्तं च; D9 स उक्तो (for उक्तश्च). — b) Ś1 K1.2 तथा; V1 Bo Da4 Dn1 Ds D3.5.7 यथा (for पथा). V1 B7.8 गच्छति (for गच्छेति). T1 G3.6 अविस्मयन्; T2 G1 °स्मयः (for °स्मितः). G2 पथा गच्छेन्न विस्मयं. — c) K4.6.7 V1 Bo.6.7.9 Da3.a4 Dn4 Ds D2.4.5.8.9 T G1–3.6 M1.5–7 प्रभावे(Ds2 °गे)न; D7 °वो न (for °वेण). D7 om. (hapl.) from गन्तव्य up to णैव (in 9a). — d) V1 Bo.6–9 अंतरीक्ष- (for °रिक्ष-). K6 अंतरीक्ष्यवरेण वै.

9 D7 om. up to णैव (cf. v. l. 8). — a) K2.4.6.7 Bo.6.7 Da3.a4 Dn1 Ds D3.4.5.8 T G1–3.6 M1.5–7 आर्जवेन (for °वेण). K6 D4.5 इव (for एव). — b) K7 T2 G1 सुखान्वे(K7 °न्वि)षिणः; D7 °क्षिणः (for °षिणा). K2.4.6.7 V1 Bo.6–9 Da3.a4 Dn1.n4 Ds D2.3.8 तथा; D4.5.9 यथा (for पथा). — c) Ś1 K1.2.4 न द्रष्टव्या; K7 G2 नन्वेष्टव्या; Ds2 मान्वे° (for नान्वे°). Ś1 K1.2.4 हि; T G1–3.6 ते (for तु). — d) T2 विशेषो (for °षा). D7 G2 [अ]भि-; M1.5–7 वि- (for हि). ❀ Cs: प्रसङ्गिनः, विघ्नप्रसङ्गकरा इत्यर्थः। ❀

10 b) K6 प्राज्ये; D7 G3 यास्ये; G2 याह्ये (sic) (for याज्ये). K4 B7 D5.7 G8 नराधिप (B7 °पैः). — c) Ś1 (sup. lin. as in text) K1.2 वसथे; Da4 च विशे (for च वशे). — d) D5.7 T G1–3.6 M1.5–7 संशयान् (for °यम्).

11 a) T1 G2.3.6 स्व- (for स). — b) Ds D2 T G1.2 M1.5–7 मोक्षधर्म-; D7 °धर्मे; G3.6 °धर्मो (for -शास्त्र-). K1.4 -विशारदाः. — c) Ś1 K1.2.4 यथा यथा च ते ब्रूयात् (K1 dittography for यथा च ते).

12 Before 12, B9 ins. भीष्म उवाच. — b) K7

C. 12. 12226
B. 12. 326[5]. 12
K. 12. 333. 12

पद्भ्यां शक्तोऽन्तरिक्षेण क्रान्तुं भूमिं ससागराम् ॥ १२
स गिरींश्चाप्यतिक्रम्य नदीस्तीर्त्वा सरांसि च ।
बहुव्यालमृगाकीर्णा विविधाश्चाटवीस्तथा ॥ १३
मेरोर्हरेश्च द्वे वर्षे वर्षं हैमवतं तथा ।
क्रमेणैव व्यतिक्रम्य भारतं वर्षमासदत् ॥ १४
स देशान्विविधान्पश्यंश्चीनहूणनिषेवितान् ।
आर्यावर्तमिमं देशमाजगाम महामुनिः ॥ १५
पितुर्वचनमाज्ञाय तमेवार्थं विचिन्तयन् ।
अध्वानं सोऽतिचक्राम खेऽचरः खे चरन्निव ॥ १६
पत्तनानि च रम्याणि स्फीतानि नगराणि च ।
रत्नानि च विचित्राणि शुकः पश्यन्न पश्यति ॥ १७
उद्यानानि च रम्याणि तथैवायतनानि च ।
पुण्यानि चैव तीर्थानि सोऽतिक्रम्य तथाध्वनः ॥ १८
सोऽचिरेणैव कालेन विदेहानाससाद ह ।
रक्षितान्धर्मराजेन जनकेन महात्मना ॥ १९
तत्र ग्रामान्बहून्पश्यन्बह्वन्नरसभोजनान् ।
पल्लीघोषान्समृद्धांश्च बहुगोकुलसंकुलान् ॥ २०
स्फीतांश्च शालियवसैर्हंससारससेवितान् ।

D$_{4.9}$ प्रति (for मुनिः). — ^{c}) K$_6$ V$_1$ B$_{0.6-9}$ D$_{a4}$ D$_{s1}$ शक्तोंतरीक्षेण. — ^{d}) K$_{2.4}$ B$_7$ D$_5$ क्रांतं (for क्रान्तुं). K$_6$ V$_1$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2.3.8}$ पृथ्वीं (for भूमिं). D$_8$ ससागरं.

13 ^{a}) D$_{a4}$ स गिरश्च; D$_{n4}$ सगरं (for स गिरींश्). K$_7$ D$_{4.5.7.9}$ व्यतिक्रम्य (for [श्चा]प्य°). — ^{b}) K$_6$ V$_1$ B$_{6.7.8}$ (marg.)$_{.9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_{s2}$ D$_{2.3.8}$ नदीती(K$_6$ B$_8$ [marg.] °दीं ती)र्थं; B$_0$ नदीस्तीर्थान्; D$_{s1}$ नदीस्तीर्थं; D$_5$ G$_1$ M$_1$ नदीं तीर्त्वा (for नदीस्तीर्त्वा). — ^{c}) T$_1$ G$_{2.3.6}$ M$_7$ बहुव्याळ-; T$_2$ °व्याघ्र- (for °व्याल-). Ś$_1$ K$_{1.2.4}$ बहुव्याडवृकाकीर्णा. — ^{d}) D$_7$ T$_1$ G$_6$ चोषधीस्; T$_2$ G$_{1-3}$ चौषधी(T$_2$ G$_1$ °धि)स्; M$_{1.7}$ चार्णवीस् (for चाटवीस्). K$_6$ B$_{0.6-9}$ D$_{a3.a4}$ D$_{n1.n4}$ D$_s$ D$_{2.3.8}$ ह्यटवीश्च (K$_6$ पदवीश्च; B$_0$ ह्यटवी च; D$_{s1}$ D$_2$ ह्यटवीं च) वनानि च.

